श्री

एकादशस्कन्धः

Ekadashaskandhah

स्कंधः ११

अथ
एकादश स्कंधः

भा० ए०
१
श्रीगणेशाय नमः ॥ ॐ नमः श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामाय
विजयंते परानंदकृष्णपादरजःस्रजः ॥ याधृता मूर्ध्नि जायंते महेंद्रादिमहस्रजः ॥ उक्तैकत्रिंशताध्यायैर्मुक्तिरेका
दशेन तः ॥ जायंते येतिहासाद्यैः समासव्यासरूपतः ॥ नारदो वसुदेवाय समासेनान्ववर्णयत् ॥ भगवानुद्धवाया
थ विस्तरेणोपपत्तिभिः ॥ तत्र तु प्रथमेऽध्याये यदुवंशस्य संक्षयः उपक्षिप्तो विरागाय मौसलव्यपदेशतः ॥ प्रवृत्ति
तः परानंदकृष्णक्रीडानुवर्णिता ॥ तन्निवृत्त्या परानंदपदारोहोनुवर्ण्यते ॥ एवं तावद्दशमस्कंधे भूभारावतारणाय
विभूति
निजविभूत ॥ यदुवंशस्य यदुवंशावतारितसकलसुरांशस्य भगवतः श्रीकृष्णस्य तत्तदुचितप्रवृत्तिविडंबनेन तच्छ्र
वणस्मरणादिपराणां परमानंदकारणं क्रीडा निरूपिता ॥ अथेदानीमुपरमितयोगमायावैभवस्य भक्तानामात्म
तत्त्वोपदेशपूर्वकं क्रीडार्थमवतारितानां चाधिकारिणां सुरांशानां मौसलापदेशेन तत्तदधिकारिपदप्रापण
पूर्वकं च ब्रह्मादीननुगृह्य निजपदारोहो निरूप्यते ॥ तत्र कुरुक्षेत्रयात्रायामविरक्तस्य वसुदेवस्य ॥ कर्मणा कर्मनिर्हारो
यथा स्यात्तथा तदुच्यतामेवं कर्मयोगं पृष्टवतो नारदादिभिः कर्मयोगो निरूपितः ॥ कर्मणा कर्मनिर्हार एष साधुनिरू
पितः ॥ यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पुरुषमित्यादिना ॥ तेन च विशुद्धसत्त्वस्य श्रीकृष्णरामौ परमेश्वरत्वेन ज्ञातवतः
षड्गर्भानयनाध्याये श्रीकृष्णेनात्मतत्त्वमुपदिष्टं ॥ वचो वः समवेतार्थं तातैतदुपमन्महे ॥ यन्नः पुत्रान्समुद्दिश्य तत्त्वग्रा
म उदाहृत इत्यादिना ॥ तच्च विषयभोगातिशयेन पुनस्तिरोहितमासीत् ॥ तदेवेदानीं नारदमुखेन प्रथमे पंचाध्याय्या
१

अपि च भूभारेत्यादि ॥ अन्याश्च भुवो भारभूताः राजपृतनाः राज्ञां पृतनाः सेनाः राजन्यस्तेषां पृतनाश्चेति वा ॥ स्वबाहुभिर्गुप्तैः परिर क्षितैर्यदुभिर्विवाहादिच्छलेन निरस्य हत्वा ॥ बाहुभिरिति बहुवचनं ॥ वस्तुतस्त्वचतुर्भुजत्वाभिप्रायेण ॥ मन्ये एवं श्रीकृष्णश्चिकीर्ष तीति ज्ञात्वा कथं तस्यैवं यादवानां दुर्ध्यं तिति तत्राह ॥ अप्रमेयः प्रमातुमशक्यः ॥ चिंतामाह मन्ये इति ॥ ननु निवृत्तिवितर्कैः ॥ अवनेर्भूमेर्भा रो यद्यपि लोकप्रतीत्या गतः ॥ तथाप्यहमगतं एव मन्ये ॥ यद्यस्मात् ॥ अविसह्यं सोढुमशक्यं यादवं कुलमित्यतो नैव स्ववंशत्वा

भूभारराजपृतना यदुभिर्निरस्य गुप्तैः स्वबाहुभिरचिंतयदप्रमेयः ॥ मन्येवनेर्ननु गतोप्यगतं हि भारं य द्यादवं कुलमहो अविषह्यमास्ते ॥ ३ ॥ नैवान्यतः परिभवोऽस्य भवेत्कथंचिन्मत्संश्रयस्य विभवोन्नहन स्य नित्यं ॥ अन्तःकलिं यदुकुलस्य विधाय वेणुस्तंभस्य वह्निमिव शांतिमुपैमि धाम ॥ ४ ॥ एवं व्यव सितो राजन्सत्यसंकल्प ईश्वरः ॥ शापव्याजेन विप्राणां संजह्रे स्वकुलं विभुः ॥ ५ ॥

ने २

स्वयं हननमनुचितमिति सूचितं ३ ॥ तर्हीदमप्यन्यैर्घातयितव्यं तत्राह ॥ नैवेति ॥ अन्यतः देवादिभ्योपि यादवकुलस्य परिभ वस्तिरस्कारो न भवेत् ॥ कुतो मत्संश्रयस्य ॥ मां संश्रयत इति मत्संश्रयं कुलं तस्य ॥ किंच ॥ नित्यं विभवोन्नहस्य ॥ विभवै राज तुरगादिभिः उच्छृंखलस्य ॥ यद्वा ॥ तर्हीदं किमिति संहर्त्तव्यं तत्राह ॥ विभवोन्नहनस्येति ॥ तस्मादेवं करिष्यामीत्याह ॥ अं तःकलिमिति ॥ शांतिमुपशममुपैमि ॥ वर्त्तमानसामीप्ये वर्त्तमानवत् ॥ उपैष्यामि ॥ तदनंतरं धाम च वैकुंठाख्यमुपै ष्यामीत्यर्थः ४ ॥ व्यवसितं कृतनिश्चयः सन् जह्रे उपहृतवान् ॥ ५ ॥

निरूप्यते ॥ तत्र प्रथमेऽध्याये वैराग्योत्पादनाय यदुकुलस्य ब्रह्मशापापदेशेनात्युत्कटविषयसुखानामप्यनित्यता प्रति
पाद्यते ॥ ततश्चतुर्भिर्निमिजायंतसंवादेन सपरिकरं परमतत्त्वनिरूपणं ॥ ततः षष्ठे भगवदुद्धवसंवादप्रश्नप्रस्तावः ॥ ततस्त्रयो
विंशत्या उद्धवं प्रति भगवतत्त्वनिरूपणं ॥ ततो द्वाभ्यां मौसलक्रीडेत्येवमेकत्रिंशताध्यायैरेकादशस्कंधस्य प्रवृत्तिः ॥ तत्र स्वं
यथामति व्याख्यानमारभ्यते ॥ ततो मौसलप्रसंगार्थं दशमस्कंधार्थमनुवदति श्लोकद्वयेन ॥ कृत्वेति ॥ अवतारयत् ॥ अवरोहयद्भु
वः ॥ जविष्ठं वेगवत्तरमतिशीघ्रं हिंसापर्यवसायिनमित्यर्थः ॥ कलिं कलहं ॥ १ ॥ एतद्विवृणोति ॥ ये कोपिता इति ॥ सपत्नैर्दुर्यो

श्रीबादरायणिरुवाच ॥ कृत्वा दैत्यवधं कृष्णः सरामो यदुभिर्वृतः ॥ भुवोऽवतारयद्भारं जविष्ठं जनयन्कलिं ॥
१ ॥ ये कोपिताः सुबहु पांडुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान् ॥ कृत्वा निमित्तमितरेतर
तः समेतान्हत्वा नृपान्निरहरत्क्षितिभारमीशः ॥ २ ॥ ति

धनादिभिः ॥ कोपिताः ॥ कोपं कारिताः ॥ सुबहु यथा भवति तथा बहुवारानित्यर्थः ॥ तदेवाह ॥ दुर्द्यूतहेलनकचग्रहणादिभिरि
न२ ति ॥ दुर्द्यूतं कपटद्यूतं हेलनमवज्ञा ॥ कचग्रहणं दुःशासनेन द्रौपद्याः केशाकर्षणं ॥ तानि आदिर्येषां गरदानजतुगृहदाहादी
नां तैः कृत्वा ॥ ये कोपिताः तान् पांडुसुतान्निमित्तं कृत्वा ॥ इतरेतरतः ॥ उभयोः पक्षयोः समेतान् मिलितान्हत्वा क्षितेर्भारं निरह
रत् जहार ॥ यद्वा ये कोपिताः यैश्च कोपिताः तान् इतरेतरतः ॥ परस्परं निमित्तं कृत्वेत्यन्वयः ॥ ये तावदत्र कंसदैत्याः पूतनादयस्ता मि२
न्स्वयमेव हतवान् ॥ ये तु दैत्या बांधवच्छद्मना स्थितास्तान्परस्परं निमित्तं विधाय हत्वा भूभारमपाकृतवानित्यर्थः ॥ २ ॥

भा०ए० ईश्वरेच्छैवात्र निमित्तमिति परिहरति ॥ बिभ्रदिति सकलानां सुंदरवस्तूनां संनिविन्यासविशेषो यस्मिंस्तद्वपु
३ र्बिभ्रत् ॥ तर्हि किमिति सौंदर्यादिविषयपरः ॥ न ॥ सुमंगलं कर्माचरन् ॥ तत्किं कयापि कामनया न ॥ आप्तकामः ॥ तर्हि किमि
ति कर्माचरति ॥ धाम द्वारवत्याख्यं गृहमास्थाय रममाणः ॥ रहरममाणः कर्मग्राहयितुमित्यर्थः ॥ ननु किमाप्तस्य रहर
त्या कर्माभिवीततत्राह उदारकीर्तिः ॥ बहुफलप्रदा कीर्तिर्यस्य सः ॥ कीर्तिवितानार्थमित्यर्थः ॥ एवं परमैश्वर्ये स्थवर्तमान
व एवं कुलं संहर्तुमैच्छत् ॥ तत्र कस्य हेतोः स्थितः ॥ कृत्यभूभारहरणशेषो यस्य सः ॥ ९ ॥ ईश्वरेच्छयैवात्यंतं ब्रह्मशापनिमित्तं

श्रीशुक उवाच ॥ बिभ्रद्वपुः सकलसुंदरसंनिवेशं कर्माचरन्भुवि सुमंगलमाप्तकामः ॥ आस्थाय धाम र
ममाण उदारकीर्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः ॥ ९ ॥ कर्माणि पुण्यनिवहानि सुमंगलानि गायज्ज
गत्कलिमलापहराणि कृत्वा ॥ कालात्मना निवसता यदुदेवगेहे पिंडारकं समगमन्मुनयो निसृष्टाः ॥ १० ॥

बहुमाह ॥ कर्माणीति ॥ कर्माण्यर्थमाह्वतः कर्माणि कृत्वा तानि सृष्टा मुनयः पिंडारकं समागमन्नित्यन्वयः ॥ निसृष्टाः प्रस्थापि
ताः पूर्वोक्तो ह्युदारकीर्तिः ॥ तान्विवृण्वन्कर्माणि विशिनष्टि ॥ पुण्यनिवहानीत्यादित्रिभिः पदैः ॥ कानिचिदश्वमेधादिक
र्माणि पुण्यमेव जनयंति ॥ पुत्रोपलालनादीनि तु तत्कालसुखमेव कुर्वंति ॥ प्रायश्चित्तादीनि तु पापमेवाहरंति ॥ एता र३
नि तु सर्वतोमुखानीत्याह ॥ पुण्यनिवहानि ॥ कीर्तनादिना पुण्यानि निर्वहंति प्रापयंतीति तथा ॥ सुमंगलानि ॥ अतिसुखा
त्मकानि ॥ गायतां जगतां कलिमलापहराणि कृत्वा ॥ मुनिप्रस्थापने हेतुः ॥ कालात्मना संहारकरूपेण यदुदेवगेहे
वसुदेवगृहे निवसता ॥ स्वकुलानि जिहीर्षुणेत्यर्थः ॥ पिंडारकं तन्नामातिदूरे तीर्थविशेषं ॥ १० ॥ ३

तदेवमवतारप्रयोजनं सर्वं संपाद्य स्वलोकं जगामेत्याह श्लोकद्वयेन ॥ स्वमूर्त्येति लोकानां लावण्यस्य निर्मुक्तिस्त्यागो यया ॥ या
मप्यन्यलोकेषु लावण्यं नास्तीत्यर्थः ॥ यद्वा ॥ लोकेभ्यो लावण्यस्य निर्मुक्तिर्येन ॥ यतः यस्तु पकेल्लोकालावण्यवत्तोभवेती
त्यर्थः ॥ तया मूर्त्या नृणां लोचनमाच्छिद्य ॥ आकृष्य ततोऽन्यस्यावलोकने लोचनस्याप्रवृत्तेः ॥ तथा स्वगीर्भिस्ताः गीरः स्मरतां चि
त्तं चाच्छिद्य ॥ तथा पदैस्तत्र तत्रांकितैस्तानि पदानीक्षतामीक्षमाणानां मन्यतो गमनादिका क्रियाश्चाच्छिद्य तत्रानीतवानी

स्वमूर्त्या लोकलावण्यनिर्मुक्त्या लोचनं नृणां ॥ गीर्भिस्ताः स्मरतां चित्तं पदैस्तानीक्षतां क्रियाः ॥ आच्छिद्य
कीर्त्तिं सुश्लोकां वितत्य ह्यंजसा नु कौ ॥ तमोऽनया तरिष्यंतीत्यगात्स्वं पदमीश्वरः ॥ ६ ॥ राजोवाच ॥ ब्रह्म
ण्यानां वदान्यानां नित्यं वृद्धोपसेविनां ॥ विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसां ॥ ७ ॥ यन्निमित्तः स
वै शापो यादृशो द्विजसत्तम ॥ कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ॥ ८ ॥

सर्वेषां चक्षुरादिवृत्तीः स्वैकनिष्ठाः कृ
त्वेत्यर्थः ॥ किंच ॥ इत उपरि जनिष्यमाणानां संसारेऽणायकौ पृथिव्यां शोभनाः श्लोकाः कवीनां यस्यां तां स्वकीर्त्तिं वितत्य विस्ता
र्य ॥ अनया कीर्त्या अंजसा सुखेनैव नु निश्चितं ॥ तमस्तरिष्यंतीत्यभिप्रेत्य ईश्वरः स्वं पदं स्थानमगादिति ॥ ६ ॥ अब्रह्मण्येभ्यः
अदातृभ्यो वा अवृद्धसेवकेभ्यो वा विप्राः कुप्यंति ॥ तस्य यस्तु न तथेत्याह ॥ ब्रह्मण्यानामित्यादिना ॥ किंच ॥ कोपे ज्ञातेऽपि कृ
ष्णचेतसां कथं प्रादुरभूदित्यर्थः ॥ ७ ॥ अतः स्पष्टस्य निमित्तस्याभावान्निमित्तांतरं पृच्छति ॥ यन्निमित्त इति ॥ एकात्म
नामेकचित्तानां कथं भेदः कलहः ॥ ८ ॥

आहुकः उग्रसेनः ॥ सोपि श्रीकृष्णमपृष्ट्वैव प्रास्यत ॥ अविदित्वान् ॥ अस्य मुसलस्य चूर्णीक्रियमाणस्या-
ऽवशेषितं लोहं च प्रास्यतः ॥ २१ ॥ तरलैस्तरंगैः ॥ २२ ॥ अन्यैर्मत्स्यैः सह ॥ २३ ॥ शल्ये शराग्रे ॥ २४ ॥ ज्ञाता सर्वेऽर्था येन
सः ईश्वरोपि सन् ॥ अन्यथा कर्तुं नैच्छत ॥ किंत्वन्वमोदत ॥ यतः स्वयं कालरूपी ॥ २५ ॥ इति श्री एकादशे प्रथमः ॥ द्वि

तच्चूर्णयित्वा मुसलं यदुराजः स आहुकः ॥ समुद्रसलिले प्रास्यल्लोहं चास्यावशेषितं ॥ २१ ॥ कश्चि-
न्मत्स्योऽग्रसील्लोहं चूर्णानि तरलैस्ततः ॥ उह्यमानानि वेलायां लग्नान्यासन्किलैरकाः ॥ २२ ॥ मत्स्यो
गृहीतो मत्स्यघ्नैर्जालेनान्यैः सहार्णवे ॥ तस्योदरगतं लोहं स शल्ये लुब्धकोऽकरोत् ॥ २३ ॥ भगवा-
न्ज्ञातसर्वार्थ ईश्वरोपि तदन्यथा ॥ कर्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत ॥ २४ ॥ इति श्रीमद्भाग-
वते महापुराणे एकादशस्कंधे मौसलोपक्रमणो नाम प्रथमोऽध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ गोविंदभु-
जगुप्तायां द्वारवत्यां कुरूद्वह ॥ अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालसः ॥ १ ॥

तीये निमिजायंतसंवादेनाह नारदः ॥ धर्मान्भागवतानेव तथा वसुदेवाय पृच्छते ॥ अभीक्ष्णं प्रस्थापितोपि पुनः पु-
नरवात्सीदित्यर्थः ॥ ननु नारदस्य दक्षादिशापान्नैकत्र वासः संभवतीत्याशंक्याह ॥ गोविंदभुजगुप्तायामिति ॥
न तस्य शापः पारे प्रभाव इत्यर्थः ॥ कृष्णोपासने लालसा औत्सुक्यं यस्य सः ॥ १ ॥ ॥ ऽऽ ॥ ॥ ॥ ऽऽ ॥ ॥ ॥ ऽऽ

उपसंगृह्य पादग्रहणं कृत्वा प्रश्नप्रकारमाह द्वयेन ॥ ते वेषयित्वेति ॥ २१ ॥ हे अमोघदर्शना विप्राः एषा अंतर्वत्नी गर्भिणी
वो युष्मान्सा त्वा त्रष्टुं विलज्जती ॥ विलज्जमाना अस्मन्मुखेन प्रष्टुमिच्छति ॥ प्रसोष्यंती ॥ आसन्नप्रसवा ॥ किंस्वित्संजनयिष्यति

विश्वामित्रोऽसितः कण्वो दुर्वासा भृगुरंगिराः ॥ कश्यपो वामदेवोऽत्रिर्वसिष्ठो नारदादयः ॥ क्रीडंत
स्तानुपव्रज्य कुमारा यदुनंदनाः ॥ उपसंगृह्य पप्रच्छुरविनीता विनीतवत् ॥ ते वेषयित्वा स्त्रीवेषैः सांबं
जांबवतीसुतं ॥ १ ॥ एषा पृच्छति वो विप्रा अंतर्वत्न्यसितेक्षणा ॥ प्रष्टुं विलज्जती साक्षात्प्रब्रूतामोघद
र्शनाः ॥ प्रसोष्यंती पुत्रकामा किंस्वित्संजनयिष्यति ॥ २ ॥ एवं प्रलब्धा मुनयस्तानूचुः कुपिता नृप ॥ ज
नयिष्यति वो मंदा मुसलं कुलनाशनं ॥ ३ ॥ तच्छ्रुत्वा तेऽतिसंत्रस्ता विमुच्य सहसोदरं ॥ सांबस्य ददृशु
स्तस्मिन्मुसलं खल्वयस्मयं ॥ ४ ॥ किं कृतं मंदभाग्यैर्नः किं वदिष्यंति नो जनाः ॥ इति विह्वलिता गेहा
नादाय मुसलं ययुः ॥ ५ ॥ तच्चोपनीय सदसि परिम्लानमुखश्रियः ॥ राज्ञ आवेदयांचक्रुः सर्वयादव
संनिधौ ॥ ६ ॥ श्रुत्वामो[घं] विप्रशापं दृष्ट्वा च मुसलं नृप ॥ विस्मिता भयसंत्रस्ता बभूवुर्द्वारकौकसः ॥ ७ ॥

कन्यां वा पुत्रं वा तत्र ब्रूत ॥ २ ॥ प्रलब्धा वंचिताः ॥ ३ ॥ तस्मिन्नुदरे अयस्मयं लोहमयं ॥ ४ ॥ मंदभाग्यैरस्माभिः
किमेतत्कृतं ॥ नोऽस्मान्किं वदिष्यंतीति विह्वलाः संतो मुसलमादाय गेहान्ययुः ॥ ५ ॥ राज्ञे उग्रसेनाय नत्वहं

त देवत्वं यद्यपि भगवत आगमनमात्रेणैव वयं कृतार्थास्तथापि पृच्छामः तवेति तव यैर्देर्मैः प्रसन्नो भगवान् तानि
त्यर्थः ॥७॥ ननु त्वं तोपि किं मन्या भगवत्प्रसादपात्रमस्तित्तत्राह अहं किलेति भुवि प्रज्ञार्थोः पूज्जयं पुत्रलाभप्रयो
जनः सन् पूजितवान् किलेति स्मृतौ रहे भगवदुक्तमनुस्मरति ॥८॥ अतो यथा मुच्येमहि तथा नोऽस्मान् शाधि

अहंसंस्तथापि पृच्छामो धर्मान्भागवतांस्तव ॥ यान्श्रुत्वा श्रद्धया मर्त्यो मुच्यते सर्वतो भयात् ॥७॥ अहं कि।
ल पुरानंतं प्रजार्थो भुवि मुक्तिदं ॥ अपूजयं न मोक्षाय मोक्षाय मोहितो देवमायया ॥८॥ यथा विचित्र
व्यसनाद्भवद्भिर्विश्वतो भयात् ॥ मुच्येमह्यंजसैवाद्धा तथा नः शाधि सुव्रत ॥९॥ श्रीशुक उवाच ॥ राजन्ने
वं कृतः प्रश्नो वसुदेवेन धीमता ॥ प्रीतस्तमाह देवर्षिर्हरेः संस्मारितो गुणैः ॥१०॥ श्रीनारद उवाच ॥
सम्यगेतद्व्यवसितं भवता सात्वतर्षभ ॥ यत्पृच्छसे भागवतान्धर्मांस्त्वं विश्वभावनान् ॥११॥ ॥८८

छिद्रय ॥ विचित्राणि व्यसनानि यस्मिन् ॥ तथा विश्वतः सर्वतो भयं यस्मिन् तस्मात् ॥ भवद्भिर्हेतुभूतैः अंजसा अना
यासेन ॥ अद्धा साक्षात् ॥९॥ हरेर्गुणैर्वर्णनीयत्वेन प्रस्तुतैः हरिं स्मारित इत्यर्थः ॥१०॥ प्रीतिमाविष्करोति सम्य
गिति त्रिभिः ॥ पृच्छसे ॥ पृच्छसि विश्वभावनान् सर्वशोधकान् ॥११॥

यद्वा ज्ञानेन मुक्तानामपीदृशमौत्सुक्यं ॥ तत्र को नाम न भजेदित्याह ॥ को न्विति ॥ इंद्रियवानिंद्रियवानिति ॥ इंद्रियवत्वमात्र
मेवाधिकारिविशेषणमित्यर्थः ॥ सर्वतः सर्वेष्वपि लोकेषु मृत्युर्यस्य सः ॥ २ ॥ ३ ॥ यथा पित्रोर्यात्राऽऽगमनमपत्यानां स्व
स्तये मंगलाय यथा चोत्तमश्लोकस्य वर्त्मभूतानां महतां यात्रा कृपणानां स्वस्तये तथा भगवद्रूप भवतो यात्रा सर्वदेहिनां

को नु राजन्निंद्रियवान्मुकुंदचरणांबुजं ॥ न भजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः ॥ २ ॥ तमेकदा तु देवर्षिं
वसुदेवो गृहागतं ॥ अर्चितं सुखमासीनमभिवाद्येदमब्रवीत् ॥ ३ ॥ वसुदेव उवाच ॥ भगवन्भवतो यात्रा
स्वस्तये सर्वदेहिनां ॥ कृपणानां यथा पित्रोरुत्तमश्लोकवर्त्मनां ॥ ४ ॥ भूतानां देवचरितं दुःखाय च सुखा
य च ॥ सुखायैव हि साधूनां त्वादृशामच्युतात्मनां ॥ ५ ॥ भजंति ये यथा देवान्देवा अपि तथैव तान् ॥ छायेव
कर्मसचिवाः साधवो दीनवत्सलाः ॥ ६ ॥

स्वस्तय इति ॥ ४ ॥ देवैरपि महतामुपमानमनुचितमित्याह ॥ भूतानामिति ॥ देवानां चरितमतिवृष्ट्यादिना भूतानां दुःखाया
पि भवति ॥ त्वादृशां त्वया सदृशानां ॥ अच्युतआत्मा येषां तेषां ॥ ५ ॥ किंच सुखं कुर्वंतोपि देवा भजनानुसारेण कुर्वंति
न तथा साधव इत्याह ॥ भजंतीति ॥ छायेव ॥ यथा पुरुषो यावत्करोति तावदेव तस्य छायापि ॥ तथा कर्मसचिवाः कर्मसहायाः ॥ ६ ॥

भा० ए०
६

इमां पृथ्वीं ॥ गृहान्निर्गतो हरिमुपासीनः संसेवमानः ॥१८॥ नव सुता नवद्वीपपतयः ॥ नवानां ब्रह्मावर्तादिभूखण्डानां प
तयः ॥ अस्य भारतवर्षस्य ॥ एकाशीतिः सुताः कर्ममार्गप्रवर्तकाः ॥ ब्राह्मणा अभूवन् ॥१९॥ अर्थशंसिनः ॥ परमार्थनि
रूपकाः ॥ श्रमणाः श्रमवंतः ॥ आत्माभ्यासे कृतश्रमा इत्यर्थः ॥ वातरसनाः दिगंबराः ॥ आत्मविद्यायां विशारदा नि।

स भुक्तभोगां त्यक्त्वेमां निर्गतस्तपसा हरिं ॥ उपासीनस्तत्पदवीं लेभे वै जन्मभिस्त्रिभिः ॥१८॥ तेषां नव
नवद्वीपपतयोऽस्य समंततः ॥ कर्मतंत्रप्रणेतार एकाशीतिर्द्विजातयः ॥१९॥ नवाभवन्महाभागा मुनयो
ह्यर्थशंसिनः ॥ श्रमणा वातरसना आत्मविद्याविशारदाः ॥२०॥ कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलाय
नः ॥ आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥२१॥ त एते भगवद्रूपं विश्वं सदसदात्मकं ॥ आत्म
नोऽव्यतिरेकेण पश्यन्तो व्यचरन्महीं ॥२२॥ अव्याहतेष्टगतयः सुरसिद्धसाध्यगंधर्वयक्षनरकिन्न
रनागलोकान् ॥ मुक्ताश्चरंति मुनिचारणभूतनाथविद्याधरद्विजगवां भुवनानि कामम् ॥२३॥

ष्णाताः ॥२०॥२१॥ तेषां परमहंसस्य चरितमाह द्वाभ्यां ॥ त इति ॥ भगवद्रूपं विश्वं पश्यन्तः ॥ सदसदात्मकं ॥ स्थूलसू
क्ष्मरूपम् ॥ तच्च स्वाव्यतिरेकेण पश्यंतः ॥२२॥ अव्याहता अप्रतिहता इष्टा अभिप्रेता गतिर्येषां ते मुक्ताः अ
नासक्ताः ॥२३॥ ॥

६

आदृत आस्तिक्येन गृहीतः अनुमोदितः परैः क्रियमाणः संस्तुतः सद्धर्मो भागवतो धर्मः देवद्रुहो वसुदेवेत्यर्थः ॥ यद्वा देवेभ्यो विश्वस्मै च द्रुह्यंतीति येन्तान् अपि ॥१२॥ किंच ॥ त्वया महान् उपकारः कृतः इत्याह ॥ त्वयेति ॥ पुण्ये श्रवणकीर्तने यस्य सः ॥१३॥ अत्रापि भगवद्धर्मनिर्णये विदेहस्य जनकस्य ॥१४॥ आर्षभाणामुत्पत्तिं सान्वयां विविच्य कथयति स

श्रुतोऽनुपठितो ध्यात आदृतो वानुमोदितः ॥ सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोपि हि ॥१२॥ त्वया परमकल्याणः पुण्यश्रवणकीर्तनः ॥ स्मारितो भगवानद्य देवो नारायणो मम ॥१३॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ आर्षभाणां च संवादं विदेहस्य महात्मनः ॥१४॥ प्रियव्रतो नाम सुतो मनोः स्वायंभुवस्य यः ॥ तस्याग्नीध्रस्ततो नाभिरृषभस्तत्सुतः स्मृतः ॥१५॥ तमाहुर्वासुदेवांशं मोक्षधर्मविवक्षया ॥ अवतीर्णं सुतशतं तस्यासीद्ब्रह्मपारगं ॥१६॥ तेषां वै भरतो ज्येष्ठो नारायणपरायणः ॥ विख्यातं वर्षमेतद्यन्नाम्ना भारतमद्भुतं ॥१७॥

नाभिः ॥ प्रियव्रतमिति ॥१५॥ मोक्षधर्मविवक्षया मोक्षधर्माणां प्रवर्तनेच्छया ॥ अवतीर्णं वासुदेवांशमाहुः ॥ तस्य च वेदपारगं सुतशतमासीत् ॥१६॥ तेषां मध्ये ऋषभसुतानां मध्ये नवयोगेश्वराणां चरितं वक्तुमितरेषां ॥ तत्रो विविच्यन ॥ तेषामिति ॥ एतत् अजनाभं नाम वर्षं यस्य नाम्ना भारतमित्यद्भुतं विख्यातमासीत् ॥ एतेन तस्य धर्मातिरेको

८

॥ भा० ए० ॥ हे अनघाः निरवद्याः भवन्तो युष्मान्प्रत्यंतिकं पृच्छामः ॥ यतः क्षणार्द्धकालमपि सत्संगः शेवधिर्निधिः निधिला
॥ ७ ॥ भे यथानंदो भवति ॥ तथात्र परमानंद इत्यर्थः ॥ ३० ॥ तदर्थं च भागवतान्धर्मान्ब्रूत ॥ यदि नोऽस्माकं श्रुतये श्रवणा
य तत्त्वं योग्यं भवति ॥ कथंभूतान् ॥ यैर्धर्मैः प्रपन्नाय भक्ताय अजो हरिः आत्मानमपि दास्यति तान् ॥ ३१ ॥ सहस्र
दृस्यैः ॥ ऋत्विग्भिश्च वर्त्तमानं तेऽपि भगवद्धर्मश्रवणपरा बभूवुरित्यर्थः ॥ भगवद्धर्मान्पृच्छामित्याह त्रयाणि

अत आत्यंतिकं क्षेमं पृच्छामोऽथ भवतोऽनघाः ॥ संसारेऽस्मिन्क्षणार्द्धोऽपि सत्संगः शेवधिर्नृणां ॥
३० धर्मान्भागवतान्ब्रूत यदि नः श्रुतये क्षमं ॥ यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः ॥
३१ श्रीनारद उवाच ॥ एवं ते निमिना पृष्टा वसुदेव महत्तमाः ॥ प्रतिपूज्याब्रुवन्प्रीत्या ससद
स्यर्त्विजं नृप ॥ ३२ ॥ कविरुवाच ॥ मन्येऽकुतश्चिद्भयमच्युतस्य पादांबुजोपासनमत्र नित्यं ॥
उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मना यत्र निवर्त्तते भीः ॥ ३३ ॥
च ॥ ब्रह्मकर्मावतारे हाभक्तः प्राप्य युगक्रमात् ॥ ज्ञातुं क्रमेण कृतवान्नव प्रश्नान्निमिस्तत्रैवैकैकस्योत्तरं प्रो
चुः ॥ कविमुख्या मुनीश्वराः ॥ ३२ ॥ प्रथमं प्रात्यंतिकं क्षेमं कथयति मन्य इति ॥ न कुतश्चिद्भयं यस्मात्तत्र संसा
रे असदात्मभावात् ॥ असति देहादावात्मभावनात्तः नित्यं सर्वदा उद्विग्नबुद्धेः ॥ विश्वात्मना सर्वथा निःशेषं यत्र

पादाम्बुजोपासनमिति वितितार ॥ ३३ ॥
॥ ७ ॥

महात्मनोनिमेःवितायमानमनुष्ठीयमानं ॥ अजनाभेभारतवर्षे ॥ २४ ॥ यजमानोनिमिः ॥ अग्नयः आहवनीयादयः
विप्राःऋत्विगादयः ॥ २५ ॥ अभिप्रेत्यज्ञात्वा ॥ २६ ॥ स्वरुचैवरोचमानान् ॥ नवत्वाभरणादिप्रकाशैर्ब्रह्मपुत्रोपमान् ॥ सन
कुमारादिसदृशान् ॥ २७ ॥ परमप्रीत्यातद्दर्शनमभिनंदतिद्वाभ्यां ॥ मन्यइति ॥ ननुभगवतःपार्षदानांकथमेवोपलब्धि

तएकदानिमेःसत्रमुपजग्मुर्यदृच्छया ॥ वितायमानमृषिभिरजनाभेमहात्मनः ॥ २४ ॥ तान्दृष्ट्वासू
र्यसंकाशान्महाभागवतान्नृप ॥ यजमानोऽग्नयोविप्राःसर्वएवोपतस्थिरे ॥ २५ ॥ विदेहस्तानभि
प्रेत्यनारायणपराय[illegible]णान् ॥ प्रीतःसंपूजयांचक्रेआसनस्थान्यथार्हतः ॥ २६ ॥ तान्रोच
मानान्स्वरुचाब्रह्मपुत्रोपमान्नव ॥ पप्रच्छपरमप्रीतःप्रश्रयावनतोनृपः ॥ २७ ॥ निमिरुवाच ॥ म
न्येभगवतःसाक्षात्पार्षदान्वोमधुद्विषः ॥ विष्णोर्भूतानिलोकानांपावनायचरंतिहि ॥ २८ ॥
दुर्लभोमानुषोदेहोदेहिनांक्षणभंगुरः ॥ तत्रापिदुर्लभंमन्येवैकुंठप्रियदर्शनम् ॥ २९ ॥

स्तत्राह ॥ विष्णोरिति ॥ विष्णुभक्तालोकपावनार्थंसर्वत्रपर्यटंतीत्यर्थः ॥ २८ ॥ मयादुर्लभंलब्धंमहोभाग्यमित्याह
दुर्लभइति ॥ बहवोदेहाभवंतियेषांतेदेहिनोजीवास्तेषांक्षणभंगुरोपिमानुषोदेहोदुर्लभः ॥ परमपुरुषार्थ
साधनत्वात् ॥ वैकुंठःप्रियोयेषां ॥ वैकुंठस्यवाप्रियास्तेषांदर्शनम् ॥ २९ ॥

॥भा० ११० ननु किमेवं परमेश्वरभजनेन । अज्ञानकल्पितभयस्य ज्ञानैकनिवर्त्यत्वादित्याशंक्याह । भयमिति यतो भयं तन्माय
॥८॥ या भवेत् अतो बुधो बुद्धिमान् तमेवाभजेत् । ननु भयं देहाद्यभिनिवेशतो भवति । स च देहाहंकारतः स च स्वरूपास्फुर
णात् । किमत्र तस्य माया करोति अत आह । ईशादपेतस्येति । ईशविमुखस्य तन्मायया अस्मृतिः स्वरूपास्फूर्त्तिः । ततो वि
पर्ययो देहोऽहमस्मीति । ततो द्वितीयाभिनिवेशाद्भयं भवति । एवं हि प्रसिद्धं लौकिकेष्वपि मायायाः । उक्तं च भगवता
दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते इति । एकया अव्यभिचारिण्या भ

भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः । तन्माययातो बुध आभजेत्तं भक्त्यै
कयेशं गुरुदेवतात्मा ॥ ३७ ॥ अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा । तत्क
र्मसंकल्पविकल्पकं मनो बुधो निरुंध्यादभयं ततः स्यात् ॥ ३८ ॥

क्त्या भजेत् । किं च गुरुदेवतात्मा गुरुरेव देवता ईश्वर आत्मा प्रेष्ठश्च यस्य तथा दृष्टिः सन्नित्यर्थः ॥ ३७ ॥ ननु विषयविक्षिप्त
चित्तस्य कुतोऽव्यभिचारिणी भक्तिः संभवति कुतस्तरामभयं । तत्र न तावद्विषया नाम वास्तवाः सन्ति । किंतु मनोविलास
मात्रमतो मनोनियमनेन भजनादभयं स्यादित्याह । अविद्यमानोऽपीति । द्वयः द्वैतप्रपंचः ध्यातुः पुंसः धिया मनसा स्वप्नश्च म
नोरथश्च यथेत्यर्थः । तत्तस्मात्कर्माणि संकल्पयति विकल्पयति च । यन्मनस्तन्निरुंध्यान्नियच्छेत् । ततश्चैकया भक्त्या भज
नादभयं स्यादित्यर्थः ॥ ३८ ॥

भागवतधर्मलक्षणमाह । येवैइति । मन्वादिमुखेनवर्णाश्रमादिधर्मानुक्तातिरहस्यत्वात्स्वमुखेनैवभगवताऽविदुषामपिपुंसां
अंजःसुखेनैवात्मलब्धयेयेवैउपायाःप्रोक्तास्तान्भागवतान्धर्मान्विद्धि । ३४ । अंजःपदेनोक्तंसुकरत्वंविवृणोति । यानीति । या
नास्थाय । आश्रित्ययोगादिवन्नप्रमाद्येत । विघ्नैर्नविहन्येत । किंच । निमील्यनेत्रेधावन्नपि । इहएषुभागवतधर्मेषुनस्ख
लेत् । निमीलनंनामाज्ञानं । यथाहुः । श्रुतिस्मृतीउभेनेत्रेविप्राणांपरिकीर्तिते । एकेनविकलःकाणोद्वाभ्यामंधःप्रकीर्तितइति
अज्ञात्वापीत्यर्थः । यथापदन्यासस्थानमतिक्रम्यशीघ्रंपरतःपदन्यासेनगतिर्धावनं । तद्द्वयमपिकिंचित्किंचिदितिकेम्याति

येवैभगवताप्रोक्ताउपायाह्यात्मलब्धये । अंजःपुंसामविदुषांविद्धिभागवतान्हितान् । ३४ । यानास्थायन
रोराजन्नप्रमाद्येतकर्हिचित् । धावन्निमील्यवानेत्रेनस्खलेन्नपतेदिह । ३५ । कायेनवाचामनसेंद्रिये
र्वाबुद्ध्यात्मनावानुसृतस्वभावात् । करोतियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयेत्तत् । ३६ । ॥ ५३ ।

शीघ्रमनुष्ठानंतथानुतिष्ठन्नपिनस्खलेत् । नप्रत्यवायीस्यात् । तथानपतेत् । फलान्नभ्रश्येत् । ३५ । ननुकेतेभागवताध
र्मा ईश्वरार्पितानिसर्वकर्माण्यपीत्याह । कायेनेति । आत्मनाचित्तेनाहंकारेणवानुसृतोयःस्वभावस्तस्मात् । अयमर्थः । नके
वलंविधितःकृतमेवेतिनियमः । स्वभावानुसारिलौकिकमपीति । तथाचभगवद्गीतासु । यत्करोषियदश्नासियज्जुहोषिद
दासियत् । यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमिति । यद्वा । ननुकायादीनामेवकर्मनत्वात्मनइत्याशंक्याह । अध्यासे
नानुसृतवान्ब्राह्मणत्वादिस्वभावाद्यत्करोतीत्यर्थः । तत्सकलंपरस्मैपरमेश्वरायनारायणायेतिसमर्पयेत् । तथासतिस

भा० ए० ९

नुन्त्रियमारूढयोगानामपिबहुजन्मभिर्दुर्लभाप्राप्तिः ॥ कथंनामकीर्तनमात्रेणैकस्मिन्नेवजन्मनिभवेदित्याशंक्यसदृष्टांतमाह ॥ भक्तिरिति ॥ प्रपद्यमानस्य हरिंभजतःपुंसःभक्तिःप्रेमलक्षणा ॥ परेशानुभवःप्रेमास्पदभगवद्रूपस्फूर्तिः तयानिर्वृत्तस्य ॥ ततोऽन्यत्रगृहादिषुविरक्तिरित्येषत्रिकःएककालः ॥ भजनसमकालएवस्यात् ॥ यथाऽश्नतोभुंजानस्यतुष्टिःसुखंपुष्टिरुदरभरणं ॥ क्षुन्निवृत्तिश्चप्रतिग्रासंस्युः ॥ उपलक्षणमेतत् ॥ प्रतिसिक्थमपियथास्युस्तद्वत् ॥ एवमे-

भक्तिःपरेशानुभवोविरक्तिरन्यत्रचैषत्रिकएककालः ॥ प्रपद्यमानस्ययथाश्नतःस्युस्तुष्टिःपुष्टि
क्षुदपायोनुघासम् ॥ ४२ ॥ इत्यच्युतांघ्रिंभजतोनुवृत्त्याभक्तिर्विरक्तिर्भगवत्प्रबोधः ॥ भवंतिवैभा
गवतस्यराजंस्ततःपरांशांतिमुपैतिसाक्षात् ॥ ४३ ॥ राजोवाच ॥ अथभागवतंब्रूतयद्धर्मोयादृशोनृणां ॥
यथाचरतियद्ब्रूतेयैर्लिंगैर्भगवत्प्रियः ॥ ४४ ॥

कैकस्मिन्भजने ॥ किंचित्प्रेमादित्रिकेजायमाने ॥ अनुवृत्त्याभजतःपरमप्रेमादिजायते ॥ बहुग्रासभोजिनइवपरमतुष्ट्यादि ॥ ४२ ॥ ततश्चभगवत्प्रसादेनकृतार्थोभवतीत्याह ॥ इत्यच्युतांघ्रिमिति ॥ ४३ ॥ भागवतस्यभवंतीत्युक्तेतस्यलक्षणंपृच्छति ॥ अथेति ॥ यद्धर्मः ॥ यस्मिन्धर्मेपरिनिष्ठितः ॥ यादृशःयत्स्वभावः ॥ यथाचरतिवर्तते ॥ यद्ब्रूते वायैश्चलिंगैर्भगवतःप्रियोभवति ॥ ४४ ॥

९

एतदत्यंताशक्यमित्याशंक्य सुगमं मार्गमाह ॥ शृण्वन्निति ॥ तदर्थकानि तानि जन्मानि कर्माणि च अर्थो येषां तानि ॥ एतान्यपि साक
ल्येन ज्ञातुमशक्यानीत्याशंक्याह ॥ यानि लोके गीतानि प्रसिद्धानि ॥ तानि शृण्वन् गायंश्च विचरेत् ॥ असंगो निस्पृहः ॥ ३९ ॥ एवं च भजतः
संप्राप्तप्रेमलक्षणभक्तियोगस्य संसारधर्मातीतां गतिमाह ॥ एवमिति ॥ एवं व्रतं वृत्तं यस्य सः ॥ स्वप्रियस्य हरेर्नामकीर्त्या जातोनुरा
गः प्रेमा यस्य सः ॥ अत एव द्रुतचित्तः ॥ श्लथहृदयः ॥ कदाचिद्भक्तपराजितं भगवंतमाकलय्योच्चैर्हसति ॥ एतावंतं कालमु

शृण्वन्सुभद्राणि रथांगपाणेर्जन्मानि कर्म्माणि च यानि लोके ॥ गीतानि नामानि तदर्थकानि गायन्वि
लज्जो विचरेदसंगः ॥ ३९ ॥ एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ॥ हसत्यथो रोदिति
रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ॥ ४० ॥ खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रु
मादीन् सरित्समुद्रांश्च हरेः शरीरं यत्किंच भूतं प्रणमेदनन्यः ॥ ४१ ॥

पेक्षितोस्मीति रोदिति ॥ अत्यौत्सुक्याद्रौति क्रोशति ॥ अतिहर्षेण गायति ॥ जितं जितमिति नृत्यति ॥ किं दांभिकवत् प
रान्प्रति प्रकाशयितुं ॥ न ॥ उन्मादवद्ग्रहगृहीतवत् ॥ लोकबाह्यः विवशः ॥ अलौकिक इत्यर्थः ॥ ४० ॥ किंच ॥ खमिति ॥ स
त्त्वानि भूतानि ॥ आकाशादि ॥ यत्किंचिद्भूतमात्रं ॥ हरेः शरीरमिति ज्ञात्वा प्रणमेत् ॥ संभावनायां लिङ् ॥ ४१ ॥ ॥ ६

किंचदेहादीनां संसारधर्म्मैर्जन्माप्ययादिभिर्यो हरेः स्मृत्या ऽविमुह्यमानः स भागवतप्रधानः ॥ तत्र देहस्य ज-
न्माप्ययौ ॥ प्राणस्य क्षुत्पिपासे मनसो भयं ॥ बुद्धेस्तर्षः ॥ तस्मा ॥ इंद्रियाणां कृच्छ्रः श्रमस्तैः ॥ ४९ ॥ कामाश्च कर्म्माणि च
बीजानि च वासनास्तेषां वासुदेव एको निलयः आश्रयो यस्य सः ॥ एतेन गृहीत्वापीत्यादिश्लोकत्रये एष्वेष हर्षमो

देहेंद्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ॥ संसारधर्म्मैरविमुह्यमानः स्मृत्या ह-
रेर्भागवतः प्रधानः ॥ ४९ ॥ न कामकर्म्मबीजानां यस्य चेतसि संभवः ॥ वासुदेवैकनिलयः स
वै भागवतोत्तमः ॥ ५० ॥ न यस्य जन्मकर्म्मभ्यां न वर्णाश्रमजातिभिः ॥ सज्जते ऽस्मिन्नहंभावो दे
हे वै स हरेः प्रियः ॥ ५१ ॥ न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा ॥ सर्वभूतसमः शांतः स वै भाग
वतोत्तमः ॥ ५२ ॥

हकामादिरहितश्चरतीति ॥ यथाचरतीत्यस्योत्तरमुक्तं ॥ ५० ॥ यैर्लिंगैर्भगवत्प्रिय इत्यस्योत्तरमाह ॥ न यस्येति ॥ जन्म
सत्कुलं ॥ कर्म्म तपआदि ताभ्यां जातयः ॥ अनुलोमप्रतिलोमजाः मूर्द्धावसिक्तांबष्ठादयः ॥ अस्मिन्देहे ऽहंकाररहितैः
सत्कुलकर्म्मादिलिंगैर्हरेः प्रियो भवतीत्यर्थः ॥ ५१ ॥ वित्तेषु स्वकीयं परकीयमिति ॥ आत्मनि स्वपरमिति ॥ ५२ ॥ ॥ ५

यद्धर्मे इत्यस्योत्तमाहात्म्येण सर्वभूतेष्विति ॥ आत्मनः स्वस्य सर्वभूतेषु ब्रह्मभावेन समन्वयं यः पश्येत् ॥ तथा ब्रह्मरूपे आत्मनि ॥ अधिष्ठाने भूतानि च यः पश्येत् ॥ यद्वा ॥ आत्मन तत्त्वोत्तमात्त्वादात्मा हि परमो हरिरिति तंत्रोक्तेः ॥ आत्मनो हरेः सर्वभूतेषु मशकादिष्वपि नियंतृत्वेन वर्त्तमानस्य भगवद्भावं निरतिशयैश्वर्य्यमेव यः पश्येत् ॥ न तु तस्य तारतम्यं ॥ तथात्मनि हरावेव भूतानि च पश्येत् ॥ कथंभूते भगवति ॥ अप्रच्युतैश्वर्य्यादिरूपे ॥ न पुनर्जडे मलिने भूताश्रयत्वेन जाड्यादिप्रसक्त्या ऐश्व

हरिरुवाच ॥ सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ॥ भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥ ४५ ॥ ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ॥ प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥ ४६ ॥ अर्चायामेव हरये पूजां यः श्रद्धयेहते ॥ न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥ ४७ ॥ गृहीत्वापीन्द्रियैरर्थान्यो न द्वेष्टि न हृष्यति ॥ विष्णोर्मायामिदं पश्यन्स वै भागवतोत्तमः ॥ ४८ ॥

र्य्यादिप्रच्युतिं पश्येत् ॥ स सर्वत्र परिपूर्णं भगवत्तत्त्वं पश्यन् भागवतोत्तम इत्यर्थः ॥ ४५ ॥ प्रेम च मैत्री च कृपा च उपेक्षा च ता ईश्वरादिषु चतुर्षु यः करोति स मध्यमो भागवतः ॥ एवंभूतस्य भेददर्शनात् ॥ ४६ ॥ अर्चायां प्रतिमायां पूजामीहते करोति ॥ न तद्भक्तेषु अन्येषु च सुतरां न करोति ॥ प्राकृतः प्रकृतिप्रारंभः ॥ अधुनैव प्रारब्धभक्तिः शनैः शनैरुत्तमो भविष्यतीत्यर्थः ॥ ४७ ॥ पुनरपि त्रिभिः श्लोकैरभ्यर्हितत्वादुत्तमभागवतस्यैव लक्षणमाह ॥ श्रीवासुदेवाविष्टचित्तो न गृह्णाति तावत् ॥ इन्द्रियैरर्थान्गृहीत्वा

इतिश्रीएकादशेद्वितीयः॥२॥मायातत्तरणंब्रह्मकर्मप्रश्नचतुष्टये॥तृतीयेतत्रनिरंदन्नमार्षभैर्मुनिभिःपृथक्॥१॥विष्णोर्माया
मिदंपश्यन्नितितुक्रमतोमायांपृच्छतिहेभगवंतः॥१॥ननूनंलक्षणंभागवतोभक्तोह्येतादृशःस्यात्॥किंवाप्रश्नेऽस्मिन्नत्रआहना
नुतृप्यइति॥संसारतापैर्नितरांतप्तोऽहंतस्यतापस्यभेषजंहरिकथामृतरूपंयुष्मद्वचोजुषमाणोनानुतृप्यामि॥२॥माय
यास्वरूपतोनिरूपणासंभवात्सृष्ट्यादिकार्यद्वारेणनिरूपयितुमाह॥एभिरिति॥आद्यःपुरुषःययाशक्त्याभूतानामात्मको

इतिश्रीमद्भागवतेमहापुराणेएकादशस्कंधेनारदवसुदेवसंवादेआयंतेयोपाख्यानेविदेहप्रश्नोद्वितीयोऽ
ध्यायः॥२॥राजोवाच॥परस्यविष्णोरीशस्यमायिनामपिमोहिनीं॥मायांवेदितुमिच्छामोभगवंतोब्रुवंतुनः॥१॥
नानुतृप्येजुषन्युष्मद्वचोहरिकथामृतं॥संसारतापनिस्तप्तोमर्त्यस्तत्तापभेषजं॥२॥अंतरिक्षउवाच॥एभि
र्भूतानिभूतात्मामहाभूतैर्महाभुज॥ससर्जोच्चावचान्याद्यःस्वमात्रात्मप्रसिद्धये॥३॥

एणभूतैः॥एभिःस्वसृष्टैर्महाभूतैर्हउच्चावचानिभूतानिससर्ज॥एषामायाभगवतइतिचरमश्लोकपादस्यप्रतिश्लोकम
नुषंगः॥किमर्थंससर्जस्वमात्रात्मप्रसिद्धये॥स्वंमिमीतेप्रमिमीतेयत्रपश्चात्सस्वमात्रा॥तस्यात्मनोजीवस्यप्रकृष्टायैसि
द्धये॥यद्वा॥स्वांशभूतानांजीवानांमात्राप्रसिद्धयेविषयभोगाय॥आत्मप्रसिद्धयेमोक्षायचेत्यर्थः॥तदुक्तंवेदस्तुतौ॥बुद्धी
द्रियमनःप्राणान्जनानामसृजत्प्रभुः॥मात्रार्थंचभवार्थंच॥आत्मनेकल्पनायचेति॥३॥ ऽऽ॥ ऽऽ॥ ॥ऽऽ॥

किंच ॥ त्रिभुवनेहेतवेपित्रैलोक्यराज्यार्थमपिलवार्द्धमपि ॥ निमिषार्द्धमपिभगवत्पदारविंदंभजन्योनचलतिसवै
ष्णवाग्र्यः ॥ ननुलवार्द्धमात्रभजनेपरमेचेत्तावांछाभोभवेत् ॥ ततकुतोनचलेत्तत्राह ॥ अकुंठस्मृतिः ॥ भगवत्पदारविंदतो
ऽन्यत्सारंनास्तीत्येवंस्मृत्याऽकुंठाअनपगतास्मृतिर्यस्यसः ॥ भगवत्पदारविंदादन्यत्सारंनास्तीतिकुतः ॥ अतआह ॥ अजितेह
रावेवात्मायेषांतथाभूतैःसुरादिभिरपिदुर्लभात् ॥ किंतुकेवलंविमृग्यात् ॥ तदपेक्षयासर्वस्यतुच्छत्वस्मरणेयोनचल

ता१
त्रिभुवनविभवहेतवेप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् ॥ नचलतिभगवत्पदारविंदाल्लवनि
मिषार्द्धमपिसवैष्णवाग्र्यः ॥ ५३ ॥ भगवतउरुविक्रमांघ्रिशाखानखमणिचंद्रिकयानिरस्ततापे ॥ हृदिकथ
मुपसीदतांपुनस्सप्रभवतिचंद्रइवोदितेऽर्कतापः ॥ ५४ ॥ विसृजतिहृदयंनयस्यसाक्षाद्धरिरवशाभिहितो
प्यघौघनाशः ॥ प्रणयरशनयाधृतांघ्रिपद्मः सभवतिभागवतप्रधानउक्तः ॥ ५५ ॥

तीत्यर्थः ॥ ५३ ॥ अपिचविषयाभिसंधिनाचलनंकामे नातिसंतापेसतिभवेत्तत्तुभगवत्सेवानिर्वृत्तौनसंभवतीत्याह ॥ भगवतइत्युरुविक्रमौच
तो ॥ अंघ्रीचतयोःशाखाःअंगुलयस्तासुनखाएवमणयस्तेषांचंद्रिकाशीतलाह्लादप्रभातयानिरस्तःकामादितापोयस्मिंस्तदुप
सीदतांभजतांहृदिकथंपुनःसंतापःप्रभवति चंद्रउदितेसति ॥ अर्कस्यतापइव ॥ नयस्यस्वःपरइत्यादिश्लोकत्रयेणयादृशःइत्यस्योत्त
रमुक्तंवेदितव्यं ॥ यद्वातइत्यस्यचहरिनामानीतिज्ञातव्यं ॥ ५४ ॥ उक्तंसमस्तलक्षणसारमाह ॥ विसृजतीति ॥ हरिरेवस्वयंसाक्षादघ
स्यहृदयंनविसृजतितिनमुंचति ॥ कथंभूतः ॥ अवशेनाप्यभिहितमात्रोप्यघौघनाशयतियस्सः ॥ तर्हिकिंनविसृजतियतःप्रणयरस
नयाभक्तिरज्ज्वाधृतंहृदयेबद्धमंघ्रिपद्मंयस्यसःभागवतप्र
धानउक्तोभवति ॥ ५५ ॥

भा० ए० नाशहेतुमाह ॥ शतवर्षेति ॥ तस्मिन्काले उपचितस्तप्त्यासौ उष्णः आसावर्कश्च ॥ यद्वा ॥ तेन कालेनोपचितसूक्ष्मत्वं यस्य सः ॥ ऊ-
१२ र्ध्वशिखः ऊर्ध्वज्वालः विष्वक् परितः ॥१०॥ संवर्तकः प्रलयकर्ता ॥ धाराभिर्न तु बिंदुभिः ॥ हस्तिहस्ताभिस्तत्प्रमाणाभिः ॥११॥
ततः उपाधिलयमाह हे राजन् पुरुषोऽव्यक्तं कारणं प्रविशति ॥ ननु ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ॥ परस्यांते कृतात्मा-
नः प्रविशंति परं पदमिति श्रुतेर्यावदधिकारमवस्थितिराधिकारिणामिति न्यायाच्च ॥ वैराजस्याभिधेयस्य ब्रह्म-

शतवर्षा ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि ॥ तत्कालोपचितोष्णार्को लोकांस्त्रीन्प्रतपिष्यति ॥९॥ पाताल-
तलमारभ्य संकर्षणमुखानलः ॥ दहन्नूर्ध्वशिखो विष्वग्वर्धते वायुनेरितः ॥१०॥ संवर्तको मेघगणो वर्ष-
ति स्म शतं समाः ॥ धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट् ॥११॥ ततो विराजमुत्सृज्य वैराजः पु-
रुषो नृप ॥ अव्यक्तं विशते सूक्ष्मं निरिंधन इवानलः ॥१२॥ वायुना हृतगंधा भूः सलिलत्वाय कल्पते ॥
सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते ॥१३॥

णः परमभागवतत्वान्मोक्षएवसंगच्छते नान्येषामिव ॥ कारणमात्रप्रवेशः सत्यं ॥ अश्वमेधादिना सत्यलोकं गतानामप्य-
भक्तानामावृत्तिश्रवणादमे ऋत्विग्ब्रह्मणोऽपि प्रकृतौ लयः पुनरुत्पत्तिश्चेति मोक्षहेतुभ्यः सचनायेवमुक्तमित्यविरोधः ॥ अ- हरिः
द्यापि केनापि प्रमाणेन नन्वाज्यत इत्यव्यक्ते प्रवेशैव ॥ तत्प्रवेशेन च मोक्षएवोक्त इति द्रष्टव्यं ॥१४॥ एवं विराजो लयमुक्त्वा तत्कारणानां हरिः
महदादिसृष्टिपर्यंतानां प्रातिलोम्येन लयमाह वायुनेति ॥ वायोर्हि गंधरसहारित्वं प्रसिद्धं संवर्तकेन वायुना हृतगंधा ॥ अत-
एव गंधस्याभावात्तत्कस्य गतत्वात्सलिलत्वाय कल्पते ॥ सलिले लीयत इत्यर्थः ॥ तद्धृतरसं तेन वायुनैव हृतो रसो य- १२

एवं जीवोपकरणार्थैः पंचधातुभिर्महाभूतैः सृष्टानि भूतान्यंतर्यामिरूपेण प्रविष्टः ॥ एकधा मनसा । दशधा बाह्येंद्रियरूपे
ण आत्मानं विभजन् गुणान् तत्तद्विषयान् जुषते जोषयतीत्यर्थः ॥ यद्वा । तमात्मानं प्रति गुणान् विभजन् जुषते प्रीयत इत्य
र्थः ॥४६॥ स च जीवः ॥ आत्मनांतर्यामिणा प्रद्योतितैर्गुणैरिंद्रियैर्गुणान् विषयान् भुंजानोऽनीश इदं सृष्टं शरीरमात्मानं मन्य

एवं सृष्टानि भूतानि प्रविष्टः पंचधातुभिः ॥ एकधा दशधात्मानं विभजन् जुषते गुणान् ॥४६॥ गुणैर्गु
णान्स भुंजान आत्मप्रद्योतितैः प्रभुः ॥ मन्यमान इदं सृष्टमात्मानमिह सज्जते ॥४७॥ कर्माणि कर्मभिः
कुर्वन्सनिमित्तानि देहभृत् ॥ तत्तत्कर्मफलं गृह्णन्भ्रमतीह सुखेतरं ॥४८॥ इत्थं कर्मगतीर्गच्छन्बह्व
भद्रवहाः पुमान् ॥ आभूतसंप्लवात्सर्गप्रलयावश्नुतेऽवशः ॥४९॥ धातूपप्लव आसन्ने व्यक्तं द्रव्यगु
णात्मकं ॥ अनादिनिधनः कालो ह्यव्यक्तायापकर्षति ॥५०॥

मान इह शरीरादौ सज्जते ॥४७॥ अत एव संसरतीत्याह ॥ कर्मभिः ॥ कर्मेंद्रियैः सनिमित्तानि सवासनानि क
वा २ र्माणि कुर्वन् सुखेतरं ॥ सुखदुःखात्मकं कर्मफलं ॥४८॥ बह्वभद्राणि वहंतीति तथा ताः ॥ सर्गप्रलयावुत्प
त्तिमरणे ॥४९॥ धातूनां महाभूतानामुपप्लवे नाशहेतावासन्ने व्यक्तं कार्यं द्रव्यं स्थूलं गुणाः सूक्ष्मं तदात्मकं म
व्यक्ताय ॥ अव्यक्तप्राप्तिं नेतुमाकर्षति ॥५०॥

भा० ए० भक्तिव्यतिरेकेण नास्त्यन्य उपाय इत्यभिप्रेत्य भक्तिमेव ससाधनां निरूपयति ॥ तत्र प्रथमं वैराग्यहेतुं गुरूपसत्तिमाह चतुर्भिः
१३ कर्म्माणीति ॥ दुःखहत्यै ॥ दुःखप्रतीकाराय पाकविपर्य्यासं ॥ फलवैपरीत्यं ॥ मिथुनीचारिणां मिथुनीभूय प्रवर्त्तमानानां ॥१९
कर्म्मभिः साधितानामपि वित्तादयो न सुखहेतव इति च पश्येदित्याह ॥ नित्यार्तिदेनेति ॥ आत्मनः स्वस्य मृत्युरूपेण ॥ च
लैरनित्यैरपायिभिश्च ॥२०॥ एवं लोकं परमिति कर्म्मनिर्मितत्वान्नश्वरं ॥ तथा च श्रुतिः ॥ तद्यथेह कर्मजितो लोकः ॥

प्रबुद्ध उवाच ॥ कर्म्माण्यारभमाणानां दुःखहत्यै सुखाय च ॥ पश्येत्पाकविपर्य्यासं मिथुनीचारिणां नृ
णां ॥१९॥ नित्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना ॥ गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः ॥२०॥
एवं लोकं परं विद्यान्नश्वरं कर्म्मनिर्मितं ॥ सतुल्यातिशयध्वंसं यथा मंडलवर्त्तिनां ॥ तस्माद्गुरुं प्रपद्येत
जिज्ञासुः श्रेय उत्तमम् ॥ शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ॥२१॥

क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति किंच ॥ वर्त्तमानसमयेपि दुःखयुक्तं पश्येदित्याह ॥ सतुल्यातिश
यध्वंसं ॥ सह तुल्येनातिशयेन ध्वंसेन च वर्त्तमानं ॥ अतस्तुल्ये स्पर्द्धा अतिशये असूया ध्वंसालोचने भयादिकं चापरि
हार्य्यमित्यर्थः ॥ यथा खंडमंडलपतीनां मिथः स्पर्द्धादिस्तद्वत् ॥ उत्तमं श्रेयो ज्ञातुमिच्छुः शाब्दे ब्रह्मणि वेदाख्ये न्यायतो
निष्णातं तत्त्वज्ञं ॥ अन्यथा संशयनिरासकत्वायोगात् ॥ परे ब्रह्मणि ॥ अपरोक्षानुभवेन निष्णातं ॥ अन्यथा स्वबोधसंचा
रणायोगात् ॥ परब्रह्मनिष्णातद्योतकमाह उपशमाश्रयमिति ॥२१॥ ॥ ६६ ॥ १३

तमसश्च रूपतिरस्कारित्वं प्रसिद्धं ॥ सांवर्त्तकेन तमसा आवकाशेनँ स्वकारणेन ॥ १४ ॥ कालात्मना ॥ शब्दस्य हि कालत एव नाशः प्रसिद्धः ॥ तद्रूपेणात्मनाईश्वरेण ॥ आत्मनि तामसाहंकारे ॥ १४ ॥ इंद्रियाणि बुद्धिश्च राजसाहंकारं ॥ मनोवैकारिकैर्देवैः सह सात्विकाहंकारं ॥ एवं त्रिविधैः स्वगुणैः स्वकार्यैः सहितः ॥ अहं अहंकारः ॥ आत्मनि महति स च महान् प्रकृतौ विलिये

हृतरूपं तु तमसा वायौ ज्योतिः प्रलीयते ॥ हृतस्पर्शोवकाशेन वायुर्नभसि लीयते ॥ १४ ॥ कालात्मना हृ
तगुणं नभ आत्मनि लीयते ॥ १४ ॥ इंद्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप ॥ प्रविशंति ह्यहंकारं स्व
गुणैरहमात्मनि ॥ १५ ॥ एषा माया भगवतः सर्गस्थित्यंतकारिणी ॥ त्रिवर्णा वर्णितास्माभिः किं भूयः
श्रोतुमिच्छसि ॥ १६ ॥ राजोवाच ॥ यथैतामीश्वरीं मायां दुस्तरामकृतात्मभिः ॥ तरंत्यंजः स्थूलधियो
महर्ष इदमुच्यतां ॥ १७ ॥ स्व १

एवं ॥ १६ ॥ त्रिवर्णा त्रिगुणा माया श्रवणभीतं राजानं ॥ तन्निवृत्त्युपायश्रवणे छंदयति किं भूय इति ॥ एवमनुकंपितस्तन्निवृत्त्युपायमेव पृच्छति ॥ १७ ॥ यथैतामिति ॥ यद्यपि तन्मायातोबुधः आभजेन्नमिति भक्तिस्तत्तारकत्वेनोक्तैव ॥ तथापि किं भक्तिरेवान्योपि वा ॥ तत्रोपायोस्तीति जिज्ञासुः पुनः प्रश्नः ॥ अकृतात्मभिरवशीकृतांतःकरणैः ॥
स्थूलधियः स्थूले शरीरे अहंधीर्येषां ते ॥ १८ ॥

हरेर्जन्मकर्मगुणानां श्रवणादि ॥ तदर्थे हर्युद्देशेन सर्वं कर्म विशेषतश्च यजनादि तत्तदर्थे शिक्षेत ॥ इष्टं दत्तमिति या
दयो भावे निष्ठाः वृत्तं सदाचारः ॥ आत्मनः प्रियं गंधपुष्पादि ॥ दारादीनप्यात्मत्वं परस्मै परमेश्वराय निवेदनं तत्सेवकत्वा
समर्पणं यत्र चिछिद्यते ॥ घं ॥ कृष्ण एव आत्मा नाथश्च येषां ॥ केवलमात्मनो जीवस्य नाथो येषामिति वा ॥ तेषु उभयत्रस्था
वरे जंगमे च या परिचर्या तां विशेषतो नृषु तत्रापि साधुषु स्वधर्मशीलेषु ॥ तत्रापि च महत्सु श्रीभागवतेषु ॥ ७ ॥ तैर्भाग

श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः ॥ जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितं ॥ इष्टं दत्तं तपो जप्तं
वृत्तं यच्चात्मनः प्रियं ॥ दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनं ॥ हं ॥ एवं कृष्णात्मनाथेषु मनुष्येषु च
सौहृदं ॥ परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥ ७ ॥ परस्परानुकथनं पावनं भगवद्यशः ॥ मिथो रतिर्मि
थस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥ ट ॥ २९ ॥ स्मरंतः स्मारयंतश्च मिथोऽघौघहरं हरिं ॥ भक्त्या संजातया भ
क्त्या बिभ्रत्युत्पुलकां तनुम् ॥ २३ ॥

वतैः ॥ सह संगम्य ॥ यत्पावनं भगवद्यशस्तस्य परस्परानुकथनं शिक्षेत ॥ यद्वा
यशः प्रति तत्र संस्पर्द्धादि परित्यागेन मिथो या रतिः ॥ रमणं ॥ या च तुष्टिः ॥ सुखं ॥ या च निवृत्तिः ॥ समस्तदुःखानि
वृत्तिस्तां च शिक्षेत ॥ ट ॥ २९ ॥ एवं वर्तमानानां परमानंद[illegible] प्राप्तिमाह ॥ स्मरंत इति हृदयेन ॥ भक्त्या साधनभ
क्त्या संजातया प्रेमलक्षणया भक्त्या ॥ २३ ॥ ss ॥ ss ॥ ७ ॥ ७ ॥ ss ॥ ss ॥ ७ ॥

श्री

गुरुरेवआत्मादैवतंचयस्यसः ॥ अनुवृत्यासेवया यैर्धर्मैः वस्तुतआत्मा ॥ आत्मप्रदश्चोपासकानां यथाबलिप्रभृतीनां ॥ २२ ॥ य
थोचितमिति ॥ हीनेषुदयां ॥ समेषुमैत्री ॥ उत्तमेषुप्रश्रयंचशिक्षेतेत्यर्थः ॥ २३ ॥ शौचंबाह्यंमृज्जलादिभिः ॥ आभ्यंतरंवादंभमा
नादिभिःशिक्षेत ॥ तपःस्वधर्माचरणं ॥ तितिक्षांक्षमां ॥ मौनंवृथावाचामनुच्चारणं ॥ स्वाध्यायमधिकारानुरूपंवेदपाठादि
कं ॥ आर्जवमवक्रतां ॥ ब्रह्मचर्यंयथायथमुचितं ॥ अस्त्रीषुस्वदारनियमादि ॥ अहिंसांभूतेष्वद्रोहं ॥ द्वंद्वसंज्ञयोःशीतोष्ण

तत्रभागवतान्धर्मान्शिक्षेद्गुर्वात्मदैवतः ॥ अमाययानुवृत्त्यायैस्तुष्येदात्मात्मदोहरिः ॥ १ ॥ सर्वतोम
नसोऽसंगमादौसंगंचसाधुषु ॥ दयांमैत्रीप्रश्रयंचभूतेष्वद्धायथोचितं ॥ २ ॥ शौचंतपस्तितिक्षांच
मौनंस्वाध्यायमार्जवं ॥ ब्रह्मचर्यमहिंसांचसमत्वंद्वंद्वसंज्ञयोः ॥ ३ ॥ सर्वत्रात्मेश्वरान्वीक्षांकैवल्यम
निकेततां ॥ विविक्तचीरवसनंसंतोषंयेनकेनचित् ॥ ४ ॥ श्रद्धांभागवतेशास्त्रेऽनिंदामन्यत्रवापि
हि मनोवाक्कर्मदंडंचसत्यंशमदमावपि ॥ ५ ॥ ची

सुखदुःखादिरूपयोःसमत्वंहर्षविषादराहित्यं ॥ ३ ॥ आत्मेश्वरान्वीक्षांसच्चिद्रूपेणात्मनोनियंतृरूपेणेश्वरस्येक्षांच ॥ कै
वल्यमेकांतशीलत्वं ॥ अनिकेततांगृहाद्यभिमानराहित्यं विविक्तचीरवसनं विजनपतितानांशुद्धानांवाससांव
ल्कलानांवापरिधानं ॥ ४ ॥ भागवतेभगवत्प्रतिपादके ॥ अन्यत्रशास्त्रादौयात्वनिंदितांमनसःप्राणायामैः ॥ वाचोमौ
नेनकर्मणोऽनीहयादंडं ॥ सत्यंयथार्थभाषणं ॥ शमदमौअंतःकरणबाह्येंद्रियनिग्रहौ ॥ ५ ॥

भा०द०
१५

अवेहीत्यनेन विषयत्वं निषेधयति। नैतदिति एतत्परं तत्त्वं मनो न विशति। न विषयीकरोति। वाग् उत वागपि। चक्षुश्च आ
त्मा बुद्धिश्च प्राणश्च क्रियाशक्त्या न प्राप्नोति। अन्यानि चेन्द्रियाणि। यथानलं स्वाः स्वांशभूता अर्चिषो विस्फुलिंगा येन प्रका
शयन्ति। न दहन्ति च। तथा जडजसमनआदिवृत्तिषु अभिव्यज्यमानस्यात्मप्रकाशस्य तत्तद्वृत्तिप्रकाशकस्य। न तत्प्रकाशवि
षयत्वं प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुरिति। तथा यतो वाचो निवर्तंते
अप्राप्य मनसा सहेत्यादिश्रुतेः। ननु त्वं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतेः। शब्दगोचरत्वं प्रतीयते तत्राह। शब्दोपीति

नैतन्मनो विशति वागुत चक्षुरात्मा प्राणेंद्रियाणि च यथानलमर्चिषः स्वाः। शब्दोपि
बोधकनिषेधतयात्ममूलमर्थोक्तमाह यदृते न निषेधसिद्धिः॥२८॥ ॥५५॥

शब्दोपि आत्ममूलं। आत्मनि प्रमाणं सत्। अर्थोक्तं। अर्थादुक्तं यथा भवति तथाह। न साक्षात्। कुतः बोधकनिषेधतया
स्वस्यैव बोधकस्य निषेधरूपत्वात्। यतो वाचो निवर्तंते अप्राप्य मनसा सह। यद्वाचानभ्युदितं येन वागभ्युद्यते। तदे
व ब्रह्म त्वं विद्धि। यन्मनो न मनुते। न चक्षुषा पश्यति कश्चनैनमित्यादिश्रुतेः। ननु तर्हि नैवाह श्रुतिः। किमिदमुच्यते
अर्थोक्तमाहेति तत्राह। यदृत इति। अथात आदेशो नेति नेति। अस्थूलमनणु। यतो वाचो निवर्तंते। यद्वाचानभ्यु
दितमित्यादिनिषेधस्य यत् अवधिभूतं ब्रह्म तत् ऋते विना सिद्धिर्नास्ति। सर्वस्य निषेधस्य सावधित्वात्। २८॥ १५

अजंहरिमनुशीलयंतितल्लीलामभिनैर्यंति ॥ एवंपरमेत्यप्राप्यनिर्वृताःसंतस्तन्मयीभवंति ॥ ३२ ॥ उपसंहरति ॥ इतीति भा
गवतधर्मीत्यन्वयाभक्त्या ॥ ३३ ॥ नारायणपरोमायांतरतीत्युक्ते पृच्छति ॥ नारायणाभिधानस्येति ॥ निष्ठांस्वरूपं ॥ स्वयंभावः
ब्रह्मैवतावन्नारायणइतिभगवानितिपरमात्मेतिचोच्यते ॥ तदुक्तं ॥ वदंतितत्तत्त्वविदस्तत्त्वंयज्ज्ञानमद्वयं ॥ ब्रह्मेतिपरमात्मेति
भगवानितिशब्द्यतइति ॥ तथानारायणेभगवतितदिदंविश्वमाहितं ॥ गृहीतमायोरुगुणःसर्गादावगुणःस्वतइत्यादिषु ॥ तत्रकिं

क्वचिद्रुदंत्यच्युतचिंतयाक्वचिद्धसंतिनंदंतिवदंत्यलौकिकाः ॥ नृत्यंतिगायंत्यनुशीलयंत्यजंभवंतितूष्णीं
परमेत्यनिर्वृताः ॥ ३२ ॥ इतिभागवतान्धर्मान्शिक्षन्भक्त्यातदुत्थया ॥ नारायणपरोमायामंजस्तरतिदुस्तरां ॥ ३३ ॥
राजोवाच ॥ नारायणाभिधानस्यब्रह्मणःपरमात्मनः ॥ निष्ठामर्हथनोवक्तुंयूयंहिब्रह्मवित्तमाः ॥ ३४ ॥ पिप्प
लायनउवाच ॥ स्थित्युद्भवप्रलयहेतुरहेतुरस्ययत्स्वप्नजागरसुषुप्तिषुसद्बहिश्च ॥ देहेन्द्रियासुहृदया
निचरंतियेनसंजीवितानितदवेहिपरंनरेंद्र ॥ ३५ ॥ भिन्नोनारायणादिभिःशब्दैर्निर्विशेषंतदेववस्तूच्यते ॥ अस्तिवाको
पिविशेषइति ॥ ३४ ॥ अत्रोत्तरंस्थित्युद्भवेति ॥ अयमर्थः ॥ अस्यविविधस्यविश्वस्यस्थित्युद्भवप्रलयानांहेतुः ॥ स्वयंचअहेतुः ॥ हेतुर
हितः सनारायणइतिपरमेवतत्त्वमवेहि ॥ स्वप्नजागरसुषुप्तिषुसतत्रअनुवर्तमानंयत् ॥ वस्त्यतिच ॥ तुरीयं
त्रिषुसंततमइति ॥ बहिश्चसमाध्यादौयत् ॥ तद्ब्रह्मेतिपरमेवतत्त्वमवेहि ॥ देहेंद्रियप्राणमनांसियेन ॥ संजीवितानिसंतिजीवंतीतिप्रव
र्तंतेतत्परमात्मेतिपरमेवतत्त्वमवेहि ॥ एवंलक्षणभेदेनोनारायणादिनामभिरुच्यमानमपिपरमेकमेवतत्त्वंजानीहि ॥ ३५ ॥

भा० ए० ननु सर्वात्मकं चेद्ब्रह्म ॥ तर्हि सर्वस्य कार्यस्य जन्मादिविकारत्वात् ॥ ब्रह्मणोऽपि तत्प्रसंगः स्यादत आह ॥ नात्मेति ॥ आत्मा
१६ ब्रह्म न जजान ॥ न जातः ॥ जन्माभावादेव तदंतरास्तितोलक्षणो विकारो नास्ति नैधते ॥ न वर्द्धते ॥ देहवृद्ध्यादिपरिणा वा २
मोऽपि निरस्तः ॥ कुतः ॥ हि यस्माद्व्यभिचारिणामागमापायिनां बालयुवादिदेहानां सवनवित्तत्कालद्रष्टा ॥ न ह्यव ल ३
स्थावतां ॥ द्रष्टा तदवस्थो भवतीत्यर्थः ॥ निरवस्थः ॥ कोसावात्मा ॥ अत आह ॥ उपलब्धिमात्रमिति ॥ नन्वायातं तर्हि

नात्मा जजान न मरिष्यति नैधतेऽसौ न क्षीयते सवनविद्व्यभिचारिणां हि ॥ सर्व
त्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेंद्रियबलेन विकल्पितं सत् ॥ ३० ॥

क्षणिकत्वं ॥ नेत्याह ॥ सर्वत्रेति ॥ सर्वत्र देशे ॥ शश्वत्सर्वदा अनपायि ॥ अनुवर्त्तमानं ॥ ननु नीलं ज्ञानं जातं ॥ पीतं ज्ञा
नं नष्टमिति प्रतीतिः ॥ सर्वज्ञानस्यानपायित्वे अत आह ॥ इंद्रियबलेनेति ॥ सदेव ज्ञानमिंद्रियबलेन विविधं कल्पि
तं ॥ नीलाद्याकारवत्तया एव ज्ञायंते ॥ न पश्यंति च ॥ न ज्ञानमिति भावः ॥ व्यभिचारिष्वव्यभिचारे दृष्टांतः ॥ प्राणो यथे
ति ॥ ३० ॥

ननु तर्हि प्रमाणाविषयत्वान्नास्ति ब्रह्मेति प्रसज्यते अत आह ॥ सत्त्वमिति ॥ सत् स्थूलं कार्यम् असत् सूक्ष्मं कारणं त
त्सर्वं ब्रह्मैव भाति ॥ कुतः यद्यस्मात्तयोः सदसतोः परं कारणं कार्यं ॥ कारणाद्भिन्नं न भवति ॥ वाचारंभणमिति
श्रुतेः ॥ ननु कथमेकं बहुविधस्य कारणं तत्राह ॥ उरुशक्ति ॥ अनेकशक्तिमत् ॥ उरुर्महती मायालक्षणा शक्ति
र्यस्य तदिति वा ॥ बहुधाभानमेव दर्शयति ॥ आदौ यदेकं ब्रह्म ॥ तदेव सत्त्वं रजस्तम इति त्रिवृत्प्रधानं प्रव

सत्त्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदंति जीवं ॥ ज्ञा
नक्रियार्थफलरूपतयोरुशक्ति ब्रह्मैव भाति सदसच्च तयोः परं यत् ॥ २९ ॥

दंति ॥ ततः क्रियाशक्त्या सूत्रं ॥ ज्ञानशक्त्या महानिति तदेव प्रवदंति ॥ ततोऽहमिति ॥ जीवं जीवोपाधिमहंकारं ॥
च तदेव प्रवदंति ॥ ततश्च ज्ञानक्रियार्थफलरूपतया ज्ञानशब्देन देवता क्रियाइंद्रियाणि ॥ अर्था विषयाः फलं
तत्प्रकाशः ॥ सुखादि वा तद्रूपतया ब्रह्मैव भाति ॥ नहि स्वरूपेण स्वतोभासमानस्य ब्रह्मणः स्वसिद्धौ प्रमाणापेक्षेति
भावः ॥ २९ ॥

भा० ११
७१

ननु यदि सुषुप्तौ कूटस्थ आत्मा न भवेत्कथं पुनरपि संसारः स्यात्॥ अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत्तदा तर्हि तन्नि-
वृत्तेः को नु भवो भवेदत आह॥ यर्हीति॥ विशेषणाद्विविह यके वलमब्जनाभस्यैव चरणेच्छया उरुभक्तिस्तया पुमान्चेत
सो मलानि विधमेत्तन्नाशयेत्॥ चेत एव कर्तृ स्वगतानि मलानि तया भक्त्या क्षालयेत्॥ तदा तस्मिन्विशुद्धे चेतसि स-
त्ति साक्षाद्व्यवधानेनात्मतत्त्वमुपलभ्यते॥ अमलयोः दृशोः सत्योर्यथा पूर्वमेव सिद्धः सवितृप्रकाश इति॥ ३॥ भक्तेः

यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमेद्गुणकर्मजानि॥ तस्मिन्विशुद्ध उपलभ्यत आत्म-
तत्त्वं साक्षाद्यथामलदृशोः सवितृप्रकाशः॥ ३२॥ राजोवाच॥ कर्मयोगं वदत नः पुरुषो येन संस्कृतः॥ वि-
धूयेहाशु कर्माणि नैष्कर्म्यं विन्दते परं॥ ३३॥ एवं प्रश्नमृषीन्पूर्वमपृच्छं पितुरन्तिके॥ नाब्रुवन्ब्रह्मणः
पुत्रास्तत्र कारणमुच्यतां॥ ३४॥ श्रीआविर्होत्र उवाच॥ कर्माकर्मविकर्मेति वेदवादो न लौकिकः॥ वेदस्य चेश्वरा-
त्मत्वात्तत्र मुह्यन्ति सूरयः॥ ३५॥

कर्मयोगाधीनत्वात्तत्पृच्छति॥ कर्मयोगमिति॥ नैष्कर्म्यं कर्मनिवृत्ति-
साध्यं ज्ञानं॥ ३३॥ प्रश्नोत्तरमाह॥ एवमिति॥ प्रश्नं प्रष्टव्यमर्थं पितुरिक्ष्वाकोः ब्रह्मणः पुत्राः सनकादयः सर्वज्ञा अपि नाब्रुवन्॥ ३४॥
गहनत्वद्योतनाय प्रथमं द्वितीयप्रश्नस्योत्तरमाह॥ कर्मेति॥ कर्म विहितं॥ अकर्म तद्विपरीतं निषिद्धं॥ विकर्म विगीतं कर्म विहि-
ताकरणं॥ ईश्वरात्मत्वात् ईश्वरादुद्भूतत्वात् अपौरुषेयत्वादित्यर्थः॥ पुंवाक्ये हि वक्तुरभिप्रायतोऽर्थज्ञानं शक्यं॥ अपौरुषेये
तु केवलं वाक्यपौर्वापर्यालोचनतात्पर्यावधारणं॥ तच्च दुष्करमिति॥ तत्र कर्मादौ विद्वांसोऽपि मुह्यन्ति॥ किमुतान्ये॥ अतस्तव

७

दृष्टांतेविदृएवमिंद्रियादिलयेननिर्विकारात्मोपलब्धिंदर्शयति ॥ अंडेष्विति ॥ पेशिषुजरायुजेषु तरुषु उद्भि-
ज्जेषु ॥ अविनिश्चितेषुस्वेदजेषु उपधावत्यनुवर्त्तते ॥ एवंदृष्टांतेनिर्विकारित्वंप्रदर्श्यदार्ष्टांतिकेऽपिदर्शयति ।
कथंतर्हिदेवात्मासविकारइवप्रतीयते ॥ यद्यदाजागरेइंद्रियगणः ॥ यदाचस्वप्नेतत्संस्कारवानहंकारः ॥ यदात्वप्रसु-
प्ते ॥ तदातस्मिन्प्रसुप्तेइंद्रियगणेसन्नेलीनेअहमितिअहंकारेचसन्ने ॥ कूटस्थोनिर्विकारएवात्माकुतः ॥ आस-

॥ अंडेषुपेशिषुतरुष्वविनिश्चितेषुप्राणोहिजीवमुपधावतितत्रतत्र ॥
॥ सन्नेयदिंद्रियगणेहमिचप्रसुप्तेकूटस्थआशयमृतेतदनुस्मृतिर्नः ॥ ३९ ॥

यस्मात्तेलिंगशरीरमुपाधिंविनाविकारहेतोरुपाधेरभावादित्यर्थः ॥ नन्वहंकारपर्यंतस्यसर्वस्यलयेशून्यमेवा-
वशिष्यते ॥ कुतस्तदाकूटस्थआत्मा अतआह ॥ तदनुस्मृतिर्नः ॥ तस्यविशेषणस्तानस्मृत्यस्यसुखात्मनःसुषुप्तिसा-
क्षिणःस्मृतिर्नोऽस्माकंभवति ॥ एतावंतंकालंसुखमहंसुप्तोनकिंचिदवेदिषमिति ॥ अननुभूतस्यास्मरणात्तस्यैव
सुषुप्तावात्मानुभावः विषयसंबंधाभावात्तुनस्पष्टइतिभावः ॥ तथाचश्रुतिः ॥ यद्वैतन्नपश्यति ॥ पश्यन्वैतन्नद्रष्टव्यंन
पश्यति नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतइति ॥ ३९ ॥

तस्माद्वेदोक्तमेवकुर्वाणः ॥ नतुनिषिद्धं ॥ नतुकर्मणिक्रियमाणेतस्मिन्नासक्तिस्तत्फलंचस्यात् ॥ नतुनैष्कर्म्यसंसा
सिद्धिरतआह ॥ निःसंगः अनभिनिवेशवान् ॥ ईश्वरेर्पितं ॥ नतुफलोद्देशेन ॥ नतुफलस्यश्रुतत्वात्कस्मैहेतोतेफले
भवेदेव ॥ न ॥ रोचनार्थेति ॥ कर्मणिप्रवृत्त्युत्पादनार्थं ॥ अगदपानेखंडलड्डुकादिवत् ॥ ततश्चकर्माभिरुच्यावेदा
र्थंसम्यग्विचारयति ॥ तदाहच योवाएतदक्षरमविदित्वागार्ग्यस्माल्लोकात्प्रैतिसकृपणः ॥ इत्यनात्मज्ञस्यकृपण

वेदोक्तमेवकुर्वाणोनिःसंगोऽर्पितमीश्वरे ॥ नैष्कर्म्यांलभतेसिद्धिंरोचनार्थाफलश्रुतिः ॥ ४६ ॥
यआशुहृदयग्रंथिंनिर्जिहीर्षुःपरात्मनः ॥ विधिनोपचरेद्देवंतंत्रोक्तेनचकेशवं ॥ ४७ ॥ लब्ध्वाऽ
नुग्रहआचार्यात्तेनसंदर्शितागमः ॥ महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्मनः ॥ ४८ ॥ ॥

तां ॥ तमेतंवेदानुवचनेनब्राह्मणाविविदिषंति ॥ ब्रह्मचर्येणतपसाश्रद्धयायज्ञेनाऽनाशकेनचेति ॥ यज्ञादीनांहि
नशेषत्वाच्चावधार्यनिष्कामेषुकर्मसुप्रवर्त्तते ॥ नतुस्वर्गकामोयजेतेत्यादिभिःकामितस्यैवस्वर्गादेःफलत्वे
नावगमात्सकामितोऽसौनभवतीतिनैष्कर्म्यसिद्धिरेवभवतीतिभावः ॥ ४६ ॥ वैदिककर्मयोगमुक्त्वातांत्रिकमाह ॥ य
आश्विति ॥ परात्मनः ॥ परस्यैवसतः ॥ आत्मनोजीवस्यहृदयग्रंथिं ॥ अहंकारबंधंनिर्हर्त्तुमिच्छुःसन् ॥ तंत्रोक्तेनचविधिना
प्रकारेणाभ्यर्चेत्तत्रमंत्रश्चचकाराद्वैदिकेनसहसमुच्चयमाह ॥ ४७ ॥ तमेवविधिमाह ॥ लब्ध्वानुग्रहइत्यादिनातेनाचार्ये

दुर्ज्ञेयंवेदतात्पर्यमाह।परोक्षवादइति।यत्रान्यथास्थितोऽर्थःसंगोपयितुमन्यथाकथ्यतेसपरोक्षवादः।तथाच
श्रुतिः।तंवाएतंचतुर्होतारंसंतंचतुर्होतेत्याचक्षते।परोक्षेणपरोक्षप्रियाइवहिदेवाइति।परोक्षवादत्वमेवाह।कर्म
मोक्षायेतिनतुस्वर्गाद्यर्थंकर्माणिविधत्तेनैष्कर्म्यमोक्षार्थंतत्राह।बालानामनुशासनंयथाभवतितथा।अत्रदृष्टां
तः।अगदमौषधंयथाबालमगदंपाययन्।खंडलड्डुकादिभिःप्रलोभयन्पाययति।ददातिचतानि।नैतावता

होवे१

परोक्षवादोवेदोऽयंबालानामनुशासनं।कर्ममोक्षायकर्माणिविधत्तेह्यगदंयथा।३६।

नाचरेद्यस्तुवेदोक्तंस्वयमज्ञोऽजितेंद्रियः।विकर्मणाह्यधर्मेण

मृत्योर्मृत्युमुपैतिसः।३७।

नि।नैतावताऽगदपानस्यतल्लाभःप्रयोजनं।अपितुआरोग्यं।तथावेदोऽप्यवांतरफलैःप्रलोभय
नकर्ममोक्षायैवकर्माणिविधत्ते।३६।ननुकर्ममोक्षश्चेत्पुरुषार्थस्तर्हिप्रथममेवकर्मत्यज्यतामत्तआ
ह।नाचरेदिति।अजितेंद्रियत्वादज्ञःस्वयंयदिनाचरेत्तर्हिविकर्मणाकर्मणोनाचरणलक्षणेनाधर्मेण
मृत्योरनंतरंमृत्युमेवप्राप्नोति।तथाचश्रुतिः।मृत्वापुनर्मृत्युमापद्यतेअद्यमानःस्वकर्मभिरिति।३७।

भा० ए० १५ तांत्रिकंकर्मयोगमुपसंहरति एवमिति॥५५॥ इतिश्रीएकादशेटीकायांतृतीयोऽध्यायः॥३॥ चतुर्थेत्ववतारेहाप्रश्नस्योत्तरमुक्तवा-
न्॥ जयन्तीनन्दनोनाम्नाद्रुमिलोनवसप्तमः॥ नत्वाभिमतमात्मानमित्यनेनात्मनःप्रियमवतारंपूजयेदित्युक्तेऽवतार-
ज्ञानमपेक्षितंतथास्तवैःस्तुत्वानमेद्धरिमित्युक्तेगुणकर्मज्ञानंचापेक्षितमतःपृच्छति॥ यानियानीति॥ कर्त्ताकरिष्यति॥१॥

एवमग्न्यर्कतोयादावतिथौहृदयेचयः यजेदीश्वरमात्मानमचिरान्मुच्यतेहिसः॥५५॥ इतिश्रीमद्भा-
गवतेमहापुराणेएकादशस्कंधेवसुदेवनारदसंवादेजायंतेयोपाख्यानेविदेहप्रश्नेतृतीयोऽध्यायः॥३॥ नि-
मिरुवाच॥ यानियानीहकर्माणियैर्यैःस्वच्छंदजन्मभिः॥ चक्रेकरोतिकर्त्तावाहरिस्तानिब्रुवंतुनः॥१॥
द्रुमिलउवाच॥ योवाअनंतस्यगुणाननंताननुक्रमिष्यन्सतुबालबुद्धिः॥ रजांसिभूमेर्गणयेत्कथंचि-
श्र १ त्कालेननैवाखिलशक्तिधाम्नः॥२॥

त्वयापृष्टानिकालत्रयसंबंधिसकलावतारगुणकर्माणिकथयितुमशक्या-
नि॥ संक्षेपतस्तुकानिचित्कथयिष्यामीत्याह॥ योवाइत्यादिना॥ अनुक्रमिष्यन्॥ गणयितुमिच्छतियः॥ सतुबालाना-
मिवतुच्छधियस्यसमंदमतिः॥ कालेनमहताकोऽपिमहामतिःरजांसिगणयेदपि॥ अखिलशक्तिधाम्नः॥ सर्वशक्त्या-
श्रयस्य॥ भगवतोगुणांस्तुनैवगणयेत्॥ तथाचश्रुतिः॥ विष्णोर्नुकंवीर्याणिप्रवोचं॥ यःपार्थिवानिविममेरजांसीत्या-

१५

श्रीमूर्तेः संमुखमासीनः ॥ आदिशब्देन भूतशुद्ध्यापि पिंडं देहं विशोध्य षडङ्गन्यासैः कृतरक्षायेनसः ॥ ५१ ॥ आदावेव द्रव्या
णि पुष्पादीनि जंत्वादिशोधनेन क्षितिं मार्ज्जनादिना ॥ आत्मानमव्यग्रतया ॥ लिंगं मूर्त्तिमनुलेपक्षालनादिना निष्पा
द्य योग्यानि कृत्वा पाद्यादिपात्राण्युपकल्प्य संनिधाप्य इह हि संपूजितं श्रीमूर्त्तौ ध्यात्वा हृदादिभिः ॥ हृदयशिरःशिखाक
वचनेत्रास्त्रमंत्रैः मूलमंत्रेण च देवे कृतन्यासो मूलमंत्रेणार्चयेत् ॥ ५२ ॥ अंगानि हृदयादीनि ॥ उपांगानि सुदर्शनादीनि

शुचिः संमुखमासीनः प्राणसंयमनादिभिः ॥ पिंडं विशोध्य सन्न्यासकृतरक्षोऽर्चयेद्धरिं ॥ ५१ ॥ अर्चा
दौ हृदये वापि यथालब्धोपचारकैः ॥ द्रव्यक्षित्यात्मलिंगानि निष्पाद्य प्रोक्ष्य चासनं ॥ पाद्यादीनुप
कल्प्याथ संनिधाप्य समाहितः ॥ हृदादिभिः कृतन्यासो मूलमंत्रेण चार्चयेत् ॥ ५२ ॥ सांगोपांगां सपा
र्षदां तां तां मूर्त्तिं स्वमंत्रतः ॥ पाद्यार्घाचमनीयाद्यैः स्नानवासोविभूषणैः ॥ गंधमाल्याक्षतस्रग्भिर्धूप
दीपोपहारकैः ॥ सांगं संपूज्य विधिवत्स्तवैः स्तुत्वा नमेद्धरिं ॥ ५३ ॥ आत्मानं तन्मयं ध्यायन्मूर्त्तिं संपूजयेद्धरेः ॥
शेषामाधाय शिरसा स्वधाम्न्युद्वास्य सत्कृतम् ॥ ५४ ॥

तत्सहितां ॥ सपार्षदां सपरिवारां केरूपचारैरर्चयेत् ॥ तदाह पाद्येति ॥ आद्यशब्देन मधुपर्कमाचमनं च ॥ अस्नातानास्तित
कालंकारेन तु पूजायां ॥ नाद्यैतैरर्चयेद्धि सुनकेतकाम हेश्वरमिति निषेधात् ॥ उपहारो नैवेद्यं ॥ ५३ ॥ शेषां निर्माल्यं
स्वधाम्नि स्वस्थाने ॥ देवं हृदि ॥ मूर्त्तिकांडके ॥ उद्वास्य स्थापयित्वा ॥ पूजाविधिं समापयेदिति शेषः ॥ ५४ ॥ ॥ ऽऽ ॥ ॥

पेरुणी

श्रीनारायणावतारमाह ॥ धर्मस्य भार्यायां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेनाजनिष्ट ॥ जातः
तच्चरितमाह ॥ नैष्कर्म्यमात्म[illegible] स्वरूपं लक्ष्यते येन तत्कर्म ॥ कर्मनिर्हारूपं वा ॥ उवाच नारदादिभ्यः स्वयं च
चार ॥ योऽद्यापि कर्म्माचरन्नास्ते ॥ ऋषिवर्यैर्निषेवितावंघ्री यस्य सः ॥ ६ ॥ भगवदवतारद्योतकं परमोपशमं द
र्शयितुमितिहासमाह ॥ इंद्र इति दशभिः ॥ धाम स्थानं ॥ तपसा ग्रहीतुमिच्छतीति विशंक्य तपोनाशाय कामं ॥ सपरि

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर ऋषिप्रवरः प्रशांतः ॥ नैष्कर्म्यलक्षणमुवाच चचा
र कर्म योऽद्यापि चास्त ऋषिवर्यनिषेवितांघ्रिः ॥ ६ ॥ इंद्रो विशंक्य मम धाम जिघृक्षतीति कामं न्य
युंक्त सगणं स बदर्युपाख्यं ॥ गत्वाप्सरोगणवसंतसुमंदवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ॥ ७ ॥ वि
ज्ञाय शक्रकृतमक्रममादिदेवः प्राह प्रहस्य गतविस्मय एजमानान् ॥ मा भैष्ट भो मदन मारुत देववध्वो
गृह्णीत नो बलिमशून्यमिमं कुरुध्वं ॥ ८ ॥

वारं प्रेषयामास ॥ स कामः बदरीत्युपाख्यायते यस्त ॥ तस्याश्रमम् अप्सरोगणादिभिः सह गत्वा स्त्रीणां प्रेक्षणान्येवेषवो
बाणास्तैरविध्यत ॥ न तस्य महिम्नि हिमानं जानातीति अतन्महिज्ञः ॥ ७ ॥ अक्रमम् अपराधं ॥ अहो अहं धीर इति ॥ विस्मयो गर्वस्त
द्रहितः ॥ एजमानान् शापभिया कंपमानान् ॥ मो विभीत समर्था ॥ हे देववध्वः ॥ मा भैष्ट ॥ बलिं आतिथ्यं तान् प्रार्थयते ॥ इममस्मा
कमाश्रमं आतिथ्याभावे शून्यप्रायः स्यादित्यर्थः ॥ ८ ॥ ॥ ॥ ॥ ऽऽ ॥ ॥ ॥ ॥ राम ॥ ॥ ॥ ऽऽ ॥ ॥ ॥ राम ॥

तत्रादौ पुरुषावतारमाह॥ भूतैरिति॥ यदा स्वसृष्टैर्भूतैर्विराजं ब्रह्माण्डं पुरं निर्माय तस्मिंल्लीलया प्रविष्टः॥ न तु भोक्तृत्वेन
प्रसृतपुण्यस्य जीवस्य तत्र भोक्तृत्वात्॥ ३॥ अस्य गुणकर्माण्याह द्वयेन॥ यत्काय इति यस्याधिष्ठाय॥ काय एषः काय इति सप्त
मी वा॥ तनुभृतां समष्टिव्यष्टिजीवानां॥ ज्ञानकर्मेंद्रियाणि॥ यस्य स्वतः स्वरूपभूतात्सत्वात्तनुभृतां ज्ञानं॥ यस्य स्वतः सिद्ध
ज्ञानमिति वा॥ यस्य श्वसनतः प्राणाद्बलं देहशक्तिः॥ ओजः इंद्रियशक्तिः॥ ईहा क्रिया यश्च सत्वादिभिर्विश्वस्थितिल

भूतैर्यदा पंचभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिं॥ स्वांशेन विष्टः पुरुषाभिधानमवाप
नारायण आदिदेवः॥ ३॥ यत्काय एष भुवनत्रयसंनिवेशो यस्येंद्रियैस्तनुभृतामुभयेंद्रियाणि
ज्ञानं स्वतः श्वसनतो बलमोज ईहा सत्वादिभिः स्थितिलयोद्भव आदिकर्ता॥ ४॥ आदावभूच्छ
तधृती रजसास्य सर्गे विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः॥ रुद्रोप्ययाय तमसा पुरुषः स
आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु॥ ५॥

योद्भवं॥ आदिकर्ता॥ ४॥ आदिकर्तेत्यनेन तत्सर्वैककर्तृत्वमपि सूचितं॥ तद्दर्शयितुं गुणावतारद्वारा चराचरस्य
स्यादिकर्तृत्वमाह॥ आदाविति यस्येत्यनुषंगः॥ यस्य रजसा अस्य जगतः सर्गे कार्ये शतधृतिर्ब्रह्माऽभूत् स्थितौ च
विष्णुः॥ यस्य सत्वेनेति शेषः॥ क्रतुपतिः तत्फलदाता॥ द्विजातीनां तद्धर्माणां च सेतुः पालक इत्यर्थः॥ यस्य तमसा॥ अप
याय रुद्रोऽभूत्॥ इत्येतैर्ब्रह्मादिभिर्निमित्तभूतैः॥ प्रजासु उद्भवादयो यतो भवंति स आद्यः पुरुषः॥ ५॥

त्वदर्भक्तानां तु केवलं तत्पश्चरतां ह्यीरातिः ॥ अस्मा कं त्वा वशं यांति ॥ क्रोधस्य वा ॥ तत्रा स्मद्दशाः कामोपभोगमपि ता वदनु
भवंति क्रोधस्य वशाः पुनरतिमं दाहत्या दुःखः ॥ हृष्टडिति ॥ त्व्येवं तच्च त्रिकालगुणाश्च शीतातपवर्षा निम मारुतश्च प्राणस्य
वाद्योवा जैक्ष्णाः जिह्वोपभोगाश्च ॥ एवं नानस्मान पारजलधिरूपा नैतीर्या विलंघ्य गोष्पदे मज्जंति ॥ कुतः यतः क्रोधस्य विफल
स्य वशं यांति ॥ गच्छंति किंच ॥ जलेमज्जंते येय था विवशाः संतो मस्तकारोपितं भारमस्य जंति ॥ तथा स्ट थैव ॥ नमो त्वाप्यनघ भो

स्तु त्वद त्रिकालगुणमारुतं जेष्ट्र शेष्वानस्मान पारजलधीन तितीर्य केचित ॥ क्रोधस्य यांति विफलस्य
वशं पदे गोर्मज्जंति दुश्चरतपश्च वृथोत्स्रजंति ॥ ११ ॥ इति प्रगृणतां तेषां स्त्रियो त्यद्भुतदर्शनाः ॥ द
र्शयामास शुश्रूषा स्वर्चिताः कुर्वतीर्विभुः ॥ १२ ॥ ते देवा नुचरा दृष्ट्वा स्त्रियः श्रीरिव रूपिणीः ॥ गंधेन मु
मुहुस्तासां रूपौदार्यहतश्रियः ॥ १३ ॥ तानाह देवदेवेशः प्रणतान्प्रहसन्निव ॥ आसामेकतमां वृध्वं सवर्णां स्वर्ग
भूषणम् ॥ १४ ॥
गायक्षमर्पाद्नादुश्चरंतपत्स्रजंति ॥ ११ ॥ स्त्रियो योगनिर्मिताः स्त्रीः शुश्रूषां कुर्वतीः स्वर्चि
ताः सुष्ठु अलंकृताः तेषां स्वलावण्यादिदर्पोपशमनाय दर्शयामास ॥ १२ ॥ रूपिणी मूर्तिः श्रीरिव ताः स्त्रीर्दृष्ट्वा
तासां तु रूपस्यौदार्येण महत्त्वेन हताश्रीः कांतिर्येषां ते ॥ १३ ॥ वृध्वं ॥ वृणीध्वम् ॥ कं वयं वराकाः ॥ कं चेमा इति चेत
त्राह ॥ सवर्णां समानरूपां ॥ नैकाप्यस्मदनुरूपेति चेमाभवतु ॥ तथापि स्वर्गस्य भूषणरूपाम् ॥ १४ ॥ राम राम राम राम

हे नरदेव ॥ अभयदे श्रीनारायणे इत्थं ब्रुवति सति ॥ देवाः ॥ कामाद्यः सव्रीडानि नम्राणि शिरांसि येषां ते ॥ लज्जाभरेणाव
नतशिरस्का इत्यर्थः ॥ सघृणं यथा भवति ॥ कृपां जनयंत इत्यर्थः ॥ कृपायुक्तं तमिति वा ॥ मायातः परे ॥ अतोऽविकृते स्वारामाश्च
ते धीराश्च तेषां निकरेणानतं पादपद्मं यस्य तस्मिन् त्वयि ॥ एतत् अस्तोभानुकंपादि न चित्रं ॥ ९ ॥ अस्माकं चापराधाचर
णं स्वभावसिद्धत्वान्न चित्रमित्याहुः ॥ त्वामिति ॥ त्वां सेवमानानां सुरैरिंद्रादिभिः कृतांतराया विघ्ना भवंति ॥ कस्मादित्यत

इत्थं ब्रुवत्यभयदे नरदेव देवाः सव्रीडनम्रशिरसः सघृणं तमूचुः ॥ नैतद्विभो त्वयि परेऽविकृते विचि-
त्रं स्वारामधीरनिकरानतपादपद्मे ॥ ९ ॥ त्वां सेवतां सुरकृता बहवोंऽतरायाः ॥ स्वौको विलंघ्य परमं व्रजतां
पदं ते ॥ नान्यस्य बर्हिषि बलीन् ददतः स्वभागान् धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ॥ १० ॥

आहुः ॥ स्वौक इति स्वस्य स्थानं स्वर्गमतिक्रम्य परमं तव स्थानं व्रजतां ॥ नान्यस्य त्वामसेवमानस्य त्वामसेवमानस्य कुतः
बर्हिषि यज्ञे स्वभागान् पुरोडाशादीन् बलीन् ॥ करान् कर्षक इव राज्ञे इंद्रादिभ्यो ददतः ॥ प्रयच्छतः ॥ तर्हि किं मद्भक्तो
पि विघ्नैर्भ्रंशयति ॥ नेत्याहुः ॥ धत्त इति ॥ यदीति निश्चये ॥ यतस्त्वं सर्वसुराधीश्वरोऽविता रक्षकः ॥ अतोऽसौ विघ्नानां मूर्ध्नि
पदं अंघ्रिं धत्ते कुतः पुनस्तस्य विघ्नशंकेति भावः ॥ १० ॥

भा०ए०
२२

अंतरेषु सर्वमन्वंतरेषु कलाभिः मूर्तिभिर्भुवनानि अदधात् अपालयत् इमां क्ष्मां समदात् ददौ ॥१९॥ हैहयानां कुलस्याप्यया
य भार्गवरूपोऽग्निः स रामो दाशरथिः सन् ॥ सलंकं लंकया सहितं सच जयति वर्तमानकालेऽनोऽवतार इत्यर्थः ॥२०॥ भाविते

देवासुरे युधि च दैत्यपतीन्सुरार्थे हत्वांतरेषु भुवनान्यदधात्कलाभिः ॥ भूत्वाथ वामन इमामहरद्बलेः
क्ष्मां याच्ञाछलेन समदाददितेः सुतेभ्यः ॥१९॥ निःक्षत्रियामकृत गां च त्रिःसप्तकृत्वो रामस्तु हैहयकुलाप्य
य भार्गवाग्निः ॥ सोऽब्धिं बबंध दशवक्त्रमहन्सलंकं सीतापतिर्जयति लोकमलघ्नकीर्तिः ॥२०॥ भूमेर्भ
रावतरणाय यदुष्वजन्मा जातः करिष्यति सुरैरपि दुष्कराणि ॥ वादैर्विमोहयति यज्ञकृतोऽत
दर्हान् शूद्रान्कलौ क्षितिभुजो न्यहनिष्यदंते ॥२१॥ एवंविधानि कर्माणि जन्मानि च जगत्पतेः ॥ भू
रीणि भूरियशसो वर्णितानि महाभुज ॥२२॥ इति श्रीमद्भागवते महापुराणे एकादशस्कंधे वसुदेव
नारदसंवादे जायंतेयोपाख्याने विदेहप्रश्ने चतुर्थोऽध्यायः ॥ ४ ॥

मत्स्यावतारमाह ॥ भूमेरिति ॥ बुद्धावतारमाह ॥ वादैरिति ॥ अतदर्हान् अतदर्हान् यज्ञानर्हान् ॥ दैत्यान्विमोहयिष्य
ति ॥ कल्क्यवतारमाह ॥ शूद्रानिति ॥ न्यहनिष्यत् ॥ निहनिष्यति ॥२१॥ २२ ॥ इति श्रीएकादशे चतुर्थः ॥४॥ ॥

कृ०२

२२

सुरवंदिनः देवभृत्याः ॥ १५ ॥ ऐंद्रायवरं ददे प्रतिनारायणं वलमच्युः ॥ शक्रः तत्रैस त्रासं प्राप्य ॥ विस्मितश्च ॥ तत्र विस्मितत्रा
सेतिवा ॥ १६ ॥ अन्यानप्यवतारांस्तस्य हरिर्नानि चाह ॥ हंसस्वरूपी तद्दत्तात्रेयः कुमारः सनकादिः ॥ नः पिता ऋषभश्च वि
स्नुरेव कल्पयावतीर्णः सन्नात्मयोगमवदत ॥ तेन विस्मृता हयास्येह यग्रीवावतारमधुभिदा सतातततः श्रुतयः आहृताः
इमित्यादेशमादाय नत्वा तं सुरवंदिनः ॥ उर्वशीमप्सरः श्रेष्ठां पुरस्कृत्य दिवं ययुः ॥ १४ ॥ ऐंद्रायान्यसदसि प्र
स्वर्ता त्रिदिवौकसां ॥ ऊचुर्नारायणं वलं शक्रस्तत्रासं विस्मितः ॥ १६ ॥ हंसस्वरूप्यवदद च्युत आत्मयोगं दत्तः ॥
कुमार ऋषभो भगवान् पिता नः ॥ विस्नुः शिवाय जगतां कलयावतीर्णस्तेनाहृतं मधुभिदा श्रुतयो हयास्ये ॥ १७
गुप्तोप्यये मनुरिलौषधयश्च मात्स्ये क्रौडे हतो दितिज उद्धरतांभसः क्ष्मां ॥ कौर्मे धृतोऽद्रिरमृतोन्मथने स्वपृष्ठे ग्रा
हात्प्रपन्नमिभराजममुंचदार्तं ॥ संस्तुन्वतोऽब्धिपतितान् श्रमणानृषींश्च शक्रं च वृत्रवधतस्तमसि प्रविष्टं ॥ दे
वस्त्रियोऽसुरगृहे पिहिता अनाथा जघ्नेऽसुरेंद्रमभयाय सतां नृसिंहे ॥ १८ ॥
१ ॥ रत्नाएष्ठाउषधयश्च गुप्ता ॥ क्रौडे वराहावतारे ग्राहाद्गजेंद्रममुंचत मोचयामास ॥ एवमाद्यो यत्रावतारस्तमनाख्यि ॥ तत्र विस्नुः
शिवाय जगतां कलयावतीर्णः इत्यनुवर्तनीयं ॥ संस्तुन्वतः स्तुतिं कुर्वाणान् ॥ ऋषीन्वालखिल्यान् कश्यपार्थे समिदाहरणे गोष्प
देनिमग्नानिंद्रेणोपहसितान्नु हत्यापदः श्रमोचत ॥ तमसि ब्रह्महत्यायां प्रविष्टं शक्रं मोचयामास ॥ असुरगृहे पिहिता निरुद्धाः

सुरवंदिनः देवभृत्याः ॥ १५ ॥ ऐंद्रायच्छंदं प्रतिनारायण एवलमभ्युः ॥ शक्रः तत्र संत्रासं प्राप्य ॥ विस्मितश्च ॥ तत्र विस्मितश्चा
सेतिवा ॥ १६ ॥ अन्यानप्यवतारांस्तच्चरितानि चाह ॥ हंसस्वरूपीतिदत्तात्रेयः कुमारः सनकादिः ॥ नः पिता ऋषभश्च वि
ष्णुरेव कलयावतीर्णः सन्नात्मयोगमवदत ॥ तेन विष्णुना हयास्ये हयग्रीवावतारे मधुभिदा सता ततः श्रुतयः आहृताः
इमित्यादेशमादाय नत्वा तं सुरवंदिनः ॥ उर्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः ॥ १४ ॥ ऐंद्रायानप्यसद्दसिष्ट
एवं तांत्रिदिवौकसः ॥ ऊचुर्नारायण एवलं शक्रस्त्रासविस्मितः ॥ १६ ॥ हंसस्वरूप्यवददच्युत आत्मयोगं दत्तः ॥
कुमार ऋषभो भगवान्पिता नः ॥ विष्णुः शिवाय जगतां कलयावतीर्णस्तेनाहृता मधुभिदा श्रुतयो हयास्ये ॥ १७
गुप्तोप्यये मनुरिलौषधयश्च मात्स्ये क्रोडे हतो दितिज उद्धरतांभसः क्ष्मां ॥ कौर्मे धृतोऽद्रिरमृतोन्मथने स्वपृष्ठे ग्रा
हात्प्रपन्नमिभराजममुंचदार्त्तं ॥ संस्तुन्वतो निपतिता ऋमणानृषींश्च शक्रं च वृत्रवधतस्तमसि प्रविष्टं ॥ दे
वस्त्रियोऽसुरगृहे पिहिता अनाथा जघ्नेऽसुरेंद्रमभयाय सतां नृसिंहे ॥ १८ ॥
॥ रत्नाः पृथ्वी उषधयश्च गुप्ताः ॥ क्रोडे वराहावतारे ग्राहगृहीतं गजेंद्रममुंचत मोचयामास ॥ एवमादेः ॥ यत्रावतारस्य नाम नास्ति ॥ तत्र विष्णुः
शिवाय जगतां कलयावतीर्ण इत्यस्य तु वर्त्तनीयं ॥ संस्तुन्वतः स्तुतिं कुर्वाणान् ॥ ऋषीन् वालखिल्यान् कश्यपार्थे समिदाहरणोद्यो
ऐनिमग्नानिंद्रेणोपहसितानुद्धृत्यापदः ॥ मोचत ॥ तमसि ब्रह्महत्यापापप्रविष्टं शक्रं मोचयामास ॥ असुरगृहे पिहिता निरुद्धा य

ना१

भा० ए० त्वान्नन्तर्दुर्विदग्धांस्त्वचिकित्स्यत्वादुपेक्ष्याः इत्याशयेनाह । विप्र इति । श्रौतेन । उपनयनाख्येन । उपलक्षणमेतत् । अध्य
२३ यनादिनापि । हरेः पदान्तिकं तद्भजनोत्तमाधिकारं प्राप्ता अपि मुह्यंति । कर्मफलेषु सज्जंते । कुतः । आम्नायेषु ये वादा अर्थ
वादास्तेषु मोहकस्तया विधं तेषां ते । तदुक्तं गीतासु । यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः । वेदवादरताः पार्थ नान्यद
स्तीति वादिन इत्यादिना । अभक्तिमार्गाद्द्रापि तेषां मोहं प्रपंचयन्निन्दति । कर्मणीत्यादिना । अकोविदाः यथावद्ध

विप्रो राजन्यवैश्यौ च हरेः प्राप्ताः पदांतिकं । श्रौतेन जन्मनाऽथापि मुह्यंत्याम्नायवादिनः ॥ ५ ॥ कर्मण्यको
विदाः स्तब्धा मूर्खाः पंडितमानिनः । वदंति चाटुकान्मूढा यया माध्व्या गिरोत्सुकाः ॥ ६ ॥ रजसा घोरसंक
ल्पाः कामुका अहिमन्यवः । दांभिका मानिनः पापा विहसंत्यच्युतप्रियान् ॥ ७ ॥

कं न भवंति । तथा कर्तुं न ज्ञाः । न चाभिज्ञान् पृच्छंति । यत स्तब्धाः अ
नम्राः स्तब्धत्वे हेतुः । यतो मूर्खा अपि पंडिता वयमिति मानवंतः । अतः । अपाम सोमममृतत्वं ह वै चातुर्मास्ययाजिनः सु
कृतं भवति । यत्र नोष्णं न च शीतं स्यान्न ग्लानिर्नाप्यरातयः इत्यादिकया यया माध्व्या गिरोत्सुकाः संतो मूढाः चाटुकान्द
प्सरोभिः सह विचरिष्याम इत्यादि प्रियान् शब्दान्वदंति ॥ ६ ॥ किंच । तेषां कर्माभिनिवेशात्कामक्रोधदंभादयो व
र्द्धंत इत्याह त्रयेण । रजसेति घोराः । अभिचारादिसंकल्पा येषां ते । अहिवन्मन्युर्येषां ते ॥ ७ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ

गे१

पंचमेभक्तिहीनानांकानिष्ठाकोयुँयुगो॥ प्रजाविधिरितिप्रश्नद्वयस्योत्तरमुच्यते॥ त्वांसेवतांसुरकृताबहवोंऽतरायाइत्य
नेनश्रीहरिभक्तानांविघ्नमूर्द्ध्निपदंदत्वापरांगतिंयांति॥ अभक्तानांतुविघ्नाभवंतीत्युक्तेतर्हितेषांकागतिर्भवतीतिपृच्छति
भगवन्निति॥ हेआत्मवित्तमाः॥ अजितात्मनामतएवशांतकामानांकानिष्ठा॥ किंप्राप्यमित्यर्थः॥१॥ स्वजनकस्यपु
रोर्भगवतोभ्नादराद्भुस्ट्रोहेणदुर्गतिंयांतीतिवक्तुंभगवतःसकाशाद्वर्णाश्रमाणामुत्पत्तिमाह॥ मुखेतिगुणैःसत्वे

निमिरुवाच॥ भगवंतंहरिंप्रायोनभजंत्यात्मवित्तमाः॥ तेषामशांतकामानांकानिष्ठाऽविजितात्मनां
॥१॥ चमसउवाच॥ मुखबाहूरुपादेभ्यःपुरुषस्याश्रमैःसह॥ चत्वारोजज्ञिरेवर्णागुणैर्विप्रादयःपृ
थक्॥२॥ यएषांपुरुषंसाक्षादात्मप्रभवमीश्वरं॥ नभजंत्यवजानंतिस्थानाद्भ्रष्टाःपतंत्यधः॥३॥ दू
रेहरिकथाःकेचिद्दूरेवाच्युतकीर्त्तनाः॥ स्त्रियःशूद्रादयश्चैवतेऽनुकंप्याभवादृशाम्॥४॥

नविप्रः॥ सत्वरजोभ्यांक्षत्रियः॥ रजस्तमोभ्यांवैश्यः॥ तमसाशूद्रइति॥२॥ एषांमध्येयेज्ञात्वान्नभजंति॥ येचज्ञा
त्वाप्यवजानंति॥ आत्मनःप्रभवोजन्मयस्मात्तं॥ दूरइति॥ तदभजनेकृतघ्नतामप्याह॥ ईश्वरमिति॥ स्थानाद्व
र्णाश्रमाद्भ्रष्टाः॥३॥ तत्रयेऽज्ञास्तेभवद्विधानामनुग्राह्याइत्याह॥ दूरइति॥ दूरेहरिकथाश्रवणंयेषांते॥ अतएवदू
रेवच्युतकीर्त्तनंयेषांते॥ दूरेऽच्युतकीर्त्तनायेषामितिवा॥४॥ २३

ननु व्यवायादीनामपि ॥ ऋतौ भार्य्यामुपेयात् ॥ हुतशेषं भक्षयेदित्यादिना विहितत्वात्किमिति निंद्यते अत आह ॥ लो-
क इति ॥ व्यवायः स्त्रीसंगः ॥ नित्यास्वभावात [illegible] एव नित्यप्राप्ताः ॥ जंतोः प्राणिमात्रस्य ॥ अतस्तत्र तासु चोदना विधिर्नास्ति ॥ न-
नु ऋतावुपेयादित्यादिविधिर्दृश्यते ॥ सत्यं ॥ न त्वयमपूर्वविधिः ॥ रागतः प्राप्तत्वात् ॥ किंतु नियमविधिरूपस्तत्रापि नियमम[illegible]तु-
ज्ञामात्रं क्रियते तदाह ॥ व्यवस्थितेरिति ॥ तेषु व्यवायादिषु ॥ कैः ॥ विवाहयज्ञसुराग्रहैः ॥ विवाहविषय एव व्यवायः कार्य्यः ॥ य-
ज्ञ एवामिषसेवा ॥ सौत्रामण्यां सुराग्रहान्गृह्णातीति श्रुतेस्तत्रैव मद्यसेवेति नियमः क्रियते ॥ ननु च नियममपालयतः प्रत्य-
वायकल्पना निंदायुक्तात आह ॥ आसु निवृत्तिरिष्टेति ॥ अयं भावः ॥ नायं नियमविधिरपि ॥ नित्यप्राप्तत्वात् ॥ अतो

लोके व्यवायामिषमद्यसेवा नित्यास्तु जंतोर्न हि तत्र चोदना ॥ व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहै-
रासु निवृत्तिरिष्टा ॥ ११ ॥

निवृत्तिः परिसंख्यैव ॥ आसु व्यवायामिषमद्यसेवासु विधिरिष्टा ॥ कथं तर्हि व्यवस्थितिरित्युक्तं उच्यते ॥ न तावत्परि-
संख्याविधिना श्रुत्या निवृत्तिरुच्यते ॥ तथा सति स्वार्थत्यागः परार्थकल्पना प्राप्तबाधश्चेति दोषत्रयं स्यात् ॥ अतः केचिन्नि-
यमेनापि अर्थस्य प्रापणमनर्थकमित्यपूर्वविधिद्वारान्यनिवृत्तिः [illegible] फलतां भवति ॥ तद्यथा ॥ इमामगृभ्णन्रशनामृत-
स्येति ॥ अश्वाभिधानीमादत्त इत्यत्र रशनालिंगतो गर्दभाश्वाभिधानीरशनालिंगतो गर्दभाश्वाभिधानीरशनालि-
गतो गर्दभाश्वाभिधानीरशनाद्वयप्राप्तौ मंत्रस्यापूर्वविधिद्वारा परिसंख्योच्यते ॥ यथाऽऽह तंत्रवार्तिककृता ॥ अप्रा-
प्तविधिरेवायमतो मंत्रस्य निश्चितः ॥ परिसंख्याफले नोक्तो न विशेषः पुनः श्रुतेरिति केचित्तु रागतो नित्यप्राप्तस्याप्रा-
प्तांशपूरणलक्षणस्य नियमफलस्याप्यभावान्निय

कामुकत्वं प्रपंचयति ॥ वदंतीति ॥ उपासिताः स्त्रियो यैस्ते तु गृहास्ते ॥ मैथुन्यं मिथुनसुखमेव परं तत्त्वमिति ॥ आदि ये षु पुरु
हेषु तत्प्राशिषो च वदंति ॥ इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथं ॥ इदमस्तीदमपि मे भविष्यति ॥ पुनर्धनमित्याकारः
दांभिकत्वं प्रपंचयति ॥ यजंतीति ॥ असृष्टान्नविधानदक्षिणं न सृष्टानि संपादितानि अन्नविधानदक्षिणा यस्मिन्यथा तथा यजं
ति ॥ तत्र च वृत्त्यै जीविकार्थं परं केवलं पशून् घ्नंति ॥ अतद्विदः हिंसादोषानभिज्ञाः ॥ ८ ॥ मानित्वं प्रपंचयति श्रियेति

५१ वदंति तेन्योन्यमुपासितस्त्रियो गृहेषु मैथुन्यपरेषु चाशिषः ॥ यजंत्यसृष्टान्नविधानदक्षिणं वृत्त्यै परं
घ्नंति पशूनतद्विदः ॥ ८ ॥ श्रिया विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्म्मणा ॥ जातस्मयेनां
धधियः सहेश्वरान्सतोवमन्यंति हरिप्रियान्खलाः ॥ ९ ॥ सर्वेषु शश्वत्तनुभृत्स्ववस्थितं यथा खमात्मा
नमभीष्टमीश्वरं ॥ वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां प्रवदंति वार्त्तया ॥ १० ॥

श्रिया धनादिसंपदा ॥ विभूत्या ॥ ऐश्वर्येण श्रियादिना जातो यः स्मयो गर्वस्तेनांधा धीर्येषां ते ॥ ईश्वरसहितान्सतः ॥ अव
मन्यंते ॥ ९ ॥ किं च एवं वर्त्तमाना नास्ते चेदं तत्त्वार्थं स्फुटमपि न जानंतीत्याह ॥ सर्वेष्विति केन रूपेणावस्थितं तदाह ॥ आ
त्मानमभीष्टमीश्वरं ॥ आत्मतया ॥ ईश्वरतया चावस्थितं ॥ एवमप्यसंगतमाह ॥ यथा खमिति ॥ पुरुषार्थमाह ॥ अभीष्टमिति
स्फुटत्वं चाह ॥ वेदोपगीतं चेति न शृण्वतेऽबुधाः ॥ यतो मनोरथानां व्यवायामिषमद्यसेवाविषयाणां वार्त्तयैव प्रवदंति ॥ १० ॥

किंच ॥ व्यवस्थयापि व्यवायाद्यभ्यनुज्ञा न यथेष्टं ॥ अपि त्वन्यथैवेत्याह ॥ यदिति ॥ यस्मात्सुरायाः घ्राण
भक्षः ॥ अवघ्राणं स एव विहितः ॥ न पानं ॥ तथा पशोरप्यालंभनमेव विहितं ॥ न तु हिंसा ॥ अयमर्थः ॥ देवतोद्दे
शेन यत्पशुहननं तदालभनं वायव्यं श्वेतं छागमालभेतेत्यादिश्रुतेः ॥ न तु हिंसायां वेदविहिता हिंसा सो
न हिंसेति कीर्त्यते इति वचनात् ॥ भक्षणं हि शनैस्तु क्रियमाणं लौकिके हनन एव वध्यहिंसैव ॥ अत्र त्वालभनमेव वि

यद्घ्राणभक्षो विहितः सुरायास्तथा पशोरालभनं न हिंसा ॥ एवं व्यवायः प्रजया न रत्या इमं विशु
द्धं न विदुः स्वधर्मं ॥ १३ ॥ ये त्वनेवंविदोऽसंतः स्तब्धाः सदभिमानिनः ॥ पशून्द्रुह्यंति विश्रब्धाः प्रे
त्य खादंति ते च तान् ॥ १४ ॥ द्विषंतः परकायेषु स्वात्मानं हरिमीश्वरं ॥ मृतके सानुबंधेऽस्मिन्बद्धस्ने
हाः पतंत्यधः ॥ १५ ॥

हितं न तु हिंसा ॥ अतो न यथेष्टं भक्षणाभ्यनुज्ञेत्यर्थः ॥ व्यवायोऽपि प्रजायानिमि
त्तं भक्षयाने तु रत्यै ॥ अतो मनोरथवादिन इमं विशुद्धं स्वधर्मं न विदुरिति ॥ १३ ॥ एवं भगवत्पराङ्मुखानां बहुदोषतां
प्रपंचयन् निष्ठां प्रपंचयति पंचभिः ॥ ये त्विति ॥ अनेवंविदः ॥ न एवंधर्मं विदंतीति ये ते विश्रब्धा निःशंकाः ॥ अनेनेम
नोरथाभिविष्यतीति विस्वस्तावा तेरानीतं न पापं एनं बान्तेः पशुभिर्विश्वस्ताः ते च पशवः प्रेत्य अमुत्र तान्खादंति
मां स भक्षयिता मुत्र यस्य मांसमिहाद्म्यहं ॥ एतन्मांसत्वं प्रवदंति मनीषिण इति वचनात् ॥ १४ ॥ अभिचारादिना हिंसे

मविधिर्ह्यप्राप्तफलतः परिसंख्याभवति ॥ यथा पंचपंचनखाभक्ष्या इति तथात्र रागतो नित्यवत्प्राप्तस्य व्यवायापेक्षे वि
वाहानियमेना[illegible]भ्यनुज्ञाद्वारा परिसंख्यैवेति ॥ ननु यद्यभ्यनुज्ञामात्रमेतर्ह्येवं नो हि ॥ ऋतुस्नातां तु यो भार्यां संनि
धौ नोपगच्छति ॥ घोरायां भ्रूणहत्यायां पच्यते नात्र संशयः ॥ इत्यादिदोषश्रवणं न स्यात् ॥ नैष दोषः ॥ मनसि कामसत्य
पि तस्यामेरुच्याहेत्वादिना वा तामनुगच्छतो दोषश्रवणोपपत्तेरिति सर्वमनवद्यम् ॥ ११ ॥ तदेवं व्यवायादिमनोरथा

धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशांति ॥ गृहे
षु युंजंति कलेवरस्य मृत्युं न पश्यंति दुरंतवीर्यम् ॥ १२ ॥ श्र

कुत्सितत्वादभीष्टमात्मानं न मृष्यंतीत्युक्तं ॥ इदानीं धनस्यापि धर्मद्वारा परमार्थप्रापकस्य देहोपभोगा
र्थे विनियोगान्नात्माज्ञानं गधोपीत्याह ॥ धनं चेति धर्म एवैकं फलं यस्य तत् ॥ यतो धर्मात्सविज्ञानं ॥ अपरोक्ष
ज्ञानसहितं ॥ इदं परोक्षज्ञानं भवति ॥ कथंभूतं ॥ अनुप्रशांति ॥ अनु अनंतरमेव प्रकृष्टा शांतिर्निर्वाणलक्षणा
यस्मात्तत् ॥ एवंभूतं धनं गृहेषु देहाद्यर्थं युंजंति ॥ १२ ॥

भा० ए० तद्देववर्णादिचतुष्टयमाह कृतइत्यादिना ॥ कृष्णाजिनादीन्बिभ्रदिति ब्रह्मचारिवेषोदर्शितः ॥ २१ ॥ तपसा
२६ ध्यानेन ॥ २२ ॥ २३ ॥ त्रिगुणादीत्यांगभूता मेखला यस्य सः ॥ यज्ञमूर्त्तिः ॥ हिरण्यकेशः पिशंगकेशः ॥ २४ ॥ त्रय्या
विद्यया वेदत्रयोक्तकर्म्मभिः ॥ २५ ॥ पृश्निगर्भः ॥ तस्याः पुत्रः ॥ वृषाकपिः स्मृतः सन् ॥ वर्षति कामानाकंपति

कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलांबरः ॥ कृष्णाजिनोपवीताक्षान्बिभ्रद्दंडकमंडलून् ॥ २१ ॥ म
नुष्यास्तु तदा शांता निर्वैराः सुहृदः समाः ॥ यजंति तपसा देवं शमेन च दमेन च ॥ २२ ॥ हंसः सुप
र्णो वैकुंठो धर्म्मो योगेश्वरोऽमलः ॥ ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते ॥ २३ ॥ त्रेतायां रक्तव
र्णोऽसौ चतुर्बाहुस्त्रिमेखलः ॥ हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः ॥ २४ ॥ तं तदा मनुजा
देवं सर्वदेवमयं हरिं ॥ यजंति विद्यया त्रय्या धर्म्मिष्ठा ब्रह्मवादिनः ॥ २५ ॥ विष्णुर्यज्ञः पृश्निगर्भः स
र्वदेव उरुक्रमः ॥ वृषाकपिर्जयंतश्च उरुगाय इतीर्यते ॥ २६ ॥ द्वापरे भगवान्श्यामः पीतवासा नि
जायुधः ॥ श्रीवत्सादिभिरंकैश्च लक्षणैरुपलक्षितः ॥ २७ ॥

केशानिति तथा ॥ जयत्येव सर्वथा जयंतः ॥ २६ ॥ श्यामः अतसीपुष्पसंकाशः ॥ निजानि चक्रादीन्यायुधानि य
स्य सः ॥ श्रीवत्सो नाम वक्षसो दक्षिणभागे रोमणां प्रदक्षिणावर्त्तः ॥ २७ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ

अज्ञास्तु तैरनुकंपितास्तरंतीति ॥ न त्वज्ञास्तु स्वतः ॥ ये तु नात्यंतमूढा न च तत्वज्ञास्तेंऽतरालवर्त्तिनः पतंतीत्याह ॥ ये
इति ॥ कैवल्यं तत्वज्ञानमसंप्राप्ताः ॥ अत्र हेतुः ॥ त्रिवर्गप्रधानाः उपशांतिहृत्स्मरहिताः ॥ देहाद्यभिनिवेशेषु दृढा वा ॥ स्वयमेवा
त्मानं घातयंतीति ॥ १६ ॥ तदाह ॥ एत इति ॥ आत्महनः ॥ आत्मानं प्रवंचकर्त्तारः ॥ अज्ञाने कर्मणि ॥ तथा च श्रुतिः ॥ असुर्या

ये कैवल्यमसंप्राप्ता ये चातीताश्च मूढतां ॥ त्रैवर्गिका ह्यक्षणिका आत्मानं घातयंति ते ॥ १६ ॥ ए
त आत्महनोऽशांता अज्ञाने ज्ञानमानिनः ॥ सीदंत्यकृतकृत्या वै कालध्वस्तमनोरथाः ॥ १७ ॥ हि
त्वात्मायासरचिता गृहापत्यसुहृच्छ्रियः ॥ तमो विशंत्यनिच्छंतो वासुदेवपराङ्मुखाः ॥ १८ ॥
निमिरुवाच ॥ कस्मिन्काले स भगवान्किं वर्णः कीदृशो नृभिः ॥ नाम्ना वा केन विधिना पूज्यते तदि
होच्यतां ॥ १९ ॥ करभाजन उवाच ॥ कृतं त्रेता द्वापरं च कलिरित्येषु केशवः ॥ नानावर्णाभिधाकारो ना
नैव विधिनेज्यते ॥ २० ॥

नाम ते लोका अंधेन तमसावृताः ॥ तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जना इति ॥ १७ ॥ गृहापत्यसुहृच्छ्रियः ॥ ता हित्वे
ति ॥ १८ ॥ तदेवं भक्तिरेव कर्त्तव्येति स्थिते ॥ तत्र विशेषं पृच्छति ॥ कस्मिन्काल इति ॥ किं वर्णः ॥ कीदृशः ॥ कीदृगाकारः ॥ केन वा ना
म्ना केन वा विधिना ॥ १९ ॥ एषु कृतादिषु कालेषु नानाप्रकारा वर्णाभिधाकारा यस्य सः ॥ नानैव विधिना विविधेन व

स्तुतिमाह ॥ ध्येयमिति ॥ हे प्रणतपाल ॥ हे महापुरुष ॥ ते चरणारविंदं वंदे ॥ कथंभूतं ॥ ध्येयं ध्यातुं योग्यं ॥ सदेति सर्वत्र संबध्यते ॥ ध्येयत्वे हेतवः ॥ इंद्रियकुटुंबादिभिर्यः परिभवस्तिरस्कारस्तं हंतीति तथा तत् ॥ किंच ॥ अभीष्टदोहं मनोरथपूरकं ॥ किंच ॥ तीर्थास्पदं ॥ गंगाया आश्रयत्वेन परमपावनं ॥ शिवविरिंचिभ्यां नुतं स्तुतं महत्तमं ॥ न तु तो कृतार्थाववकिमर्थं ताभ्यां नुतं ॥ तत्राह ॥ शरण्यं ॥ आश्रययोग्यं ॥ सुखात्मकमित्यर्थः ॥ तर्हि ब्रह्मादिभिः स्तुत्य ॥ प्राकृतस्य कस्य गोचरस्यात् ॥ न ॥ भृत्यार्तिहं यस्य कस्यापि भृत्यमात्रस्यार्तिं हंति न केवलमागंतुकार्तिमा

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचिनुतं शरण्यं ॥ भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं वंदे महापुरुष ते चरणारविन्दं ॥३३॥ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यं ॥ मायामृगं दयितयेप्सितमन्वधावद्वंदे महापुरुष ते चरणारविंदं ॥३४॥

त्रं हंति ॥ किंतु भवाब्धिपोतं संसारार्णवतारकं ॥३३॥ इदानीं स्वयमाप्तकामत्वान्नैरपेक्ष्यं भक्तार्थं च सापेक्षतां दर्शयन् श्रीरामचंद्रं स्तौति ॥ त्यक्त्वेति ॥ अन्यैः सुदुस्त्यजां या सुरेप्सिता राज्यलक्ष्मीस्तां त्यक्त्वा ॥ यदिति पदस्यार्थः ॥ यो ऽरण्यमगात् ॥ किं राज्यवैकल्यदर्शनेन ॥ न ॥ धर्मिष्ठः कुतः आर्यस्य गुरोर्दशरथस्य वचसा ॥ किंच ॥ एवं राज्यं त्यक्त्वापि भक्तवा
या४ त्सल्येन दयितया सीतयेप्सितं मायामृगं ॥ स्वर्णमृगाकारं यो ऽन्वधावच्च तस्य भगवतश्चरणारविंदं वंदे ॥ यद्वा हे धर्मिष्ठेति संबोधनं ॥ तथाप्यविवक्षितत्वादार्यपदेन संधिर्न भवति ॥ तथा यदगादिति चरणारविन्दमेवोच्यते ॥ यन्माया

महाराजोपलक्षणंछत्रचामरादियुक्तं॥वेदतंत्राभ्यांवैदिकेनागमिकेनचमार्गेणयजंतिपूजयंति॥पर
मीश्वरंज्ञातुमिच्छवः॥२८॥नामान्याह॥नमस्तइति॥२९॥३०॥नानातंत्रविधानेनेति॥लोकतंत्रेमार्गस्यप्राधा

तंतदापुरुषंमर्त्यामहाराजोपलक्षणं॥यजंतिवेदतंत्राभ्यांपरंजिज्ञासवोनृप॥२८॥
नमस्तेवासुदेवायनमःसंकर्षणायच॥प्रद्युम्नायानिरुद्धायतुभ्यंभगवतेनमः॥२९॥
नारायणायऋषयेपुरुषायमहात्मने॥विश्वेश्वरायविश्वायसर्वभूतात्मनेनमः॥३०॥इ
तिद्वापरउर्वीशस्तुवंतिजगदीश्वरं॥नानातंत्रविधानेनकलावपियथाशृणु॥३१॥कृ
ष्णवर्णंत्विषाकृष्णंसांगोपांगास्त्रपार्षदं॥यज्ञैःसंकीर्त्तनप्रायैर्यजंतिहिसुमेधसः॥३२॥

न्यंदर्शयति॥३१॥कृष्णंव्यावर्णयति॥त्विषाकांत्या॥अकृष्णंइंद्रनीलमणिवदुज्ज्वलं॥यद्वात्विषाकृष्णंकृ
ष्णावतारं॥अनेनकलौकृष्णावतारस्यप्राधान्यंदर्शयति॥अंगानिहृदयादीनि॥उपांगानिकौस्तुभादीनि॥अस्त्राणि
सुदर्शनादीनि॥पार्षदाःसुनंदादयः॥तत्सहितं॥यज्ञैः॥अर्चनैः॥संकीर्त्तनंनामोच्चारणं॥स्तुतिश्च॥तत्प्रधानैः

एकादशटीका॥६९॥
ति२

भक्तस्य विधिनिषेधनिवृत्तेः कृतकृत्यतामाह ॥ देवर्षीति ॥ आप्ताः पोष्याः कुटुंबिनः ॥ इतरे देवादयः ॥ पंचय
ज्ञदेवताः ॥ एतेषां यथान्यो भक्त ऋणी ॥ अत एव तेषां किंकरः ॥ तदर्थं नित्यं पंचयज्ञं करोति ॥ तथा च स्मृतिः ॥ हीन
जातिं परिक्षीणमृणार्थं कर्म कारयेदिति ॥ अयं तु न तथा ॥ कोऽसौ यः सर्वभावेन श्रीमुकुंदं शरणागतः कर्तं कृत्यं प
रिहृत्य ॥ यद्वा ॥ कर्तं भेदं परिहृत्य ॥ कृती छेदने इत्यस्मात् ॥ यद्वा ॥ सर्वमिति बुद्ध्या ॥ ४१ ॥ विहितकर्मनिवृ

देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन् ॥ सर्वात्मना यः शरणं शरण्यं ग
तो मुकुंदं परिहृत्य कर्तं ॥ ४१ ॥ स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ॥ विक
र्म यच्चोत्पतितं कथंचिद्धुनोति सर्वं हृदि संनिविष्टः ॥ ४२ ॥ श्रीनारद उवाच ॥ धर्मान्भागवता
नित्थं श्रुत्वाथ मिथिलेश्वरः ॥ जायंतेयान्मुनीन्प्रीतः सोपाध्यायो ह्यपूजयत् ॥ ४३ ॥

त्तिमुक्त्वा निषेधनिमित्तप्रायश्चित्तनिवृत्तिमाह ॥ स्वपादमूलमिति ॥ त्यक्तोऽन्यस्मिन्देहादौ देवतांतरे वा भा
वो येन ॥ अत एव तस्य विकर्मणि प्रवृत्तिस्तु संभवति ॥ यच्च कथंचित्प्रमादादिना उत्पतितं तं मेवं तत्तदपि हरिः
धुनोति ॥ ननु यमस्तत्क्षमन्येत तत्राह ॥ परेशः ॥ ननु च श्रुतिस्मृती ममैवाज्ञे इति भगवद्वचनात् ॥ स्वाज्ञाभंगं कथं
सहेत तत्राह ॥ प्रियस्य ॥ ननु नायं पापं त्यजेदिति ॥ भजेन तत्राह ॥ हृदि संनिविष्टः ॥ न हि वस्तुशक्तिरर्थितामपेक्षते तत्र

स्कं० ११ टी० अ० ५

युगानुरूपाभ्यां ॥ ३५ ॥ एतेषु चतुर्षु युगेषु कलिरेव श्रेष्ठ इत्याह ॥ कलिमिति ॥ गुणज्ञाः कलेर्गुणं जानन्ति ये ते तु दो
षाणां वकृत्वात्कलिं सभाजयंति तत्राह ॥ सारभागिनो गुणांशग्राहिणः ॥ कोऽसौ गुणस्तमाह ॥ यत्रेति ॥ यदुक्तं ॥ ध्यायन्
कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ॥ यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवमिति ॥ ३६ ॥ इतः स्मात्कलेः ॥ अतोऽ

एवं युगानुरूपाभ्यां भगवान्युगवर्त्तिभिः ॥ मनुजैरिज्यते राजन्श्रेयसामीश्वरो हरिः ॥ ३५ ॥ क
लिं सभाजयंत्यार्या गुणज्ञाः सारभागिनः ॥ यत्र संकीर्त्तनेनैव सर्वः स्वार्थोऽभिलभ्यते ॥ ३६ ॥ न
ह्यतः परमो लाभो देहिनां भ्राम्यतामिह ॥ यतो विंदेत परमां शांतिं नश्यति संसृतिः ॥ ३७ ॥ कृतादि
षु प्रजा राजन्कलाविच्छंति संभवं ॥ कलौ खलु भविष्यंति नारायणपरायणाः ॥ क्वचित्क्वचिन्म
हाराज द्राविडेषु च भूरिशः ॥ ३८ ॥ ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ॥ कावेरी च महापुण्या
प्रतीची च महानदी ॥ ३९ ॥ ये पिबंति जलं तासां मनुजा मनुजेश्वर ॥ प्रायो भक्ता भगवति वासुदे
वेऽमलाशयाः ॥ ४० ॥

स्मात्संकीर्त्तनात्परमो लाभो नास्ति ॥ यतः संकीर्त्तनात् ॥ ३७ ॥ किंच ॥ कृतादिष्विति ॥ ३८ ॥ ३९ ॥ अमलाश
याः संतः ॥ प्रायः प्रायशो भगवति भक्ता भवन्ति ॥ ४० ॥ रामराम रामराम रामराम रामराम रामराम ॥ ॥ ४० ॥

भा० ए० ननु पुत्रस्नेहश्चेन्मोक्षहेतुः । तर्हि सर्वे मुच्येरन् तत्राह । मापत्यबुद्धिमिति । अपत्यबुद्धिं माकृथाः । आडागम
२६ श्चाद्सः ४९ । ननु कथमीश्वरो मानुषः स्यात् । कथं वा तस्य विस्मयघ्नादिकर्तृत्वं पूतनाशोषणादिकर्म
श्चर्यमिव निरूप्यते तत्राह । भूभाररूपा असुरा एव ये राजन्यास्तेषां हंतवे तत्वेन हंतुं निर्वृत्यै मोक्षाय । ५० । ५१
अपत्यबुद्धिमाकृथाः कृष्णे सर्वात्मनीश्वरे । मायामनुष्यभावेन गूढैश्वर्ये परेऽव्यये । ४९ । भू
भारासुरराजन्यहंतवे गुप्तये सतां । अवतीर्णस्य निर्वृत्यै यशो लोके वितन्यते । ५० । श्रीशुक उ
वाच । एतच्छ्रुत्वा महाभागो वसुदेवोऽतिविस्मितः । देवकी च महाभागा जहतुर्मोहमात्मनः । ५१ ।
इतिहासमिमं पुण्यं धारयेद्यः समाहितः । स विधूयेह शमलं ब्रह्मभूयाय कल्पते । ५२ । इति श्री
रा मद्भागवते महापुराणे एकादशस्कंधे वसुदेवनारदसंवादे जायंतेयोपाख्याने पंचमोध्यायः । ५ । श्रीबाद
रायणिरुवाच । अथ ब्रह्मात्मजैर्देवैः प्रजेशैरावृतोऽभ्यगात् । भवश्च भूतभव्येशो ययौ भूतगणैर्वृतः । १
इह अस्मिन्नेव देहे शमलं मोहं विधूय ब्रह्मतायै कल्पते । ५२ । इति श्री एकादशे पंचमः । ५ । षष्ठे ब्रह्मादिभिः स्तुत्वा
गंतुं विज्ञापितो हरिः । उद्धवः प्रार्थयामास स्वधाम नय मामिति । अतः परमतिविस्तरेणात्मविद्यां निरूपयितुं तस्य
स्तावमाह । अथेति । आत्मजैः सनकादिभिः । अभ्यगात् द्वारकामिति चतुर्थेनान्वयः । १ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥

२६

उपातिष्ठन् अनुतिष्ठन् ॥ ४४ ॥ निःसंगो भूत्वा ॥ ४५ ॥ शास्त्रप्रक्रियेयमुक्ता युवांतु प्रसंगत एव कृतार्थावित्याह ॥ यु
वयोरिति ॥ वां युवयोः ॥ ४६ ॥ न च सर्वकर्मार्पणादिभागवतधर्मैरन्येषामिव युवयोः सत्वशुद्धिरापादनीया ॥ पुत्रोपला
लनेनैव भागवतधर्मसर्वस्वं निष्पन्नमित्याह ॥ दर्शनेति ॥ कृष्णे पुत्र इति स्नेहं प्रकुर्वतोर्वां तस्य दर्शनादिभिरात्मा

ततोऽंतर्दधिरे सिद्धाः सर्वलोकस्य पश्यतः ॥ राजा धर्मानुपातिष्ठन्नवाप परमां गतिं ॥ ४४ ॥ त्वमप्ये
तान्महाभाग धर्मान्भागवतान्श्रुतान् ॥ आस्थितः श्रद्धया युक्तो निःसंगो यास्यसे परं ॥ ४५ ॥ युवयोः ख
लु दंपत्योर्यशसा पूरितं जगत् ॥ पुत्रतामगमद्यद्वां भगवानीश्वरो हरिः ॥ ४६ ॥ दर्शनालिंगनालापैः
शयनासनभोजनैः ॥ आत्मा वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्वतोः ॥ ४७ ॥ वैरेण यं नृपतयः शिशुपाल
पौंड्रसाल्वादयो गतिविलास[illegible]विलोकनाद्यैः ॥ ध्यायंत आकृतधियः शयनासनादौ तत्सा
म्यमापुरनुरक्तधियां पुनः किं ॥ ४८ ॥

पावितः ॥ ४७ ॥ एतदेव कैमुत्यन्यायेन स्फुटयति ॥ वैरेणेति ॥ यं शयनासनादौ ॥ वैरेणापि ध्यायंतस्तस्य गति
विलासाद्यैः ॥ आकृतधियः ॥ तत्तदाकाराधीर्येषां ते तत्सारूप्यमापुः ॥ किं पुनर्वक्तव्यमनुरक्तधियां तत्साम्यं भव ॥ २८ ॥

भा० ए०
३०

ननु मम मापिहितादृष्टकर्मकरणात्॥ कुतो मत्पादारविंदचिंतनं कर्मपाशान्मुमुक्षुभिः क्रियते तत्राहुः॥
त्वमिति॥ हे अजित॥ आस्तामिदानींतनमिदम[illegible]ल्यं कर्म त्वं व्यक्तं महदादिप्रपंचं सृजसि पालयसि ह-
रसि च॥ तदप्यात्मन्येव न पृथक्॥ दुर्विभाव्यं मनसाप्यनूह्यं वितर्क्यं॥ तद्गुणस्थः मायागुणेषु नियंतृत्वेन स्थि-
तः॥ अथ च॥ एतैः कर्मभिर्भवान्नोज्यते॥ न लिप्यते॥ कुतः॥ यो भवान् अनवद्यः रागादिदोषरहितः॥ यतः स्वस्मा-

त्वं मायया त्रिगुणयात्मनि दुर्विभाव्यं व्यक्तं सृजस्यवसि लुंपसि तद्गुणस्थः॥ नैतैर्भवा-
नजित कर्मभिरज्यते वै यः स्वे सुखेऽव्यवहितेभिरतोऽनवद्यः॥ ७॥ शुद्धिर्नृणां न तु तथे-
ड्य दुराशयानां विद्याश्रुताध्ययनदानतपःक्रियाभिः॥ सत्त्वात्मनामृषभ ते यशसि
प्रवृद्ध सच्छ्रद्धया श्रवणसंभृतया यथा स्यात्॥ ८॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ॥

त्मस्वरूपे सुखेऽव्यवहिते॥ अनावृतेऽभिरतः॥ अतस्त्वं कर्म कुर्वन्नप्यात्मारामः॥ परमेश्वर इति मुमुक्षुभि-
श्चिंत्यत इति भावः॥ ७॥ नन्वात्मारामस्य किं कर्मकरणेन॥ अत आहुः॥ शुद्धिरिति॥ हे ईड्य॥ हे ऋषभ॥ दुराशयाना-
रागिणां विद्योपासनाविद्यादिभिस्तथा शुद्धिर्न भवति॥ सत्त्वात्मनां सतां॥ ते यशसि श्रवणेन॥ संस्कृतया परिपुष्ट-
या॥ अनिरूढया सच्छ्रद्धया यथा स्यात्॥ परमपावनस्य यशसो वितानायैव कर्माचरणमिति भावः॥ ८॥ ॥ ऽऽ

३०

२॥ ननु तेषां सुरेंद्रादिरूपं भगवंतं नित्यं पश्यतां कीयन्मति दिदृक्षाश्च तत्राह॥ वपुषेति॥ येन वपुषा नरलोकमनोरमः
सन्॥ सर्वलोकेषु यशो वितेने तदिति संदर्शं वपुर्हे देव तवः॥३॥ व्यचचक्षुस्तत्र पश्यन्॥४॥ स्वर्गोद्यानस्यैव माल्यैश्चित्राणि स्रजं स्वकेले
बंधप्रायाणि राणि निश्रयार्थाश्चयास्तु ताभिर्गीर्भिः॥५॥ बुद्धींद्रियादिभिर्देशेनादिना प्राणेन च वल्लहेतुना दंडवत्प्रणिपा

इंद्रो मरुद्भिर्भगवानादित्या वसवोऽश्विनौ॥ ऋभवोऽङ्गिरसो रुद्रा विश्वे साध्याश्च देवताः॥ गंधर्वाप्सर
स२ सो नागाः सिद्धचारणगुह्यकाः॥ ऋषयः पितरश्चैव विद्याधरकिन्नराः॥ द्वारकामुपसंजग्मुः सर्वे
कृष्णदिदृक्षवः॥२॥ वपुषा येन भगवान्नरलोकमनोरमः॥ यशो वितेने लोकेषु सर्वलोकमलापहं॥
३॥ तस्यां विभ्राजमानायां समृद्धायां महर्द्धिभिः॥ व्यचक्षतावितृप्ताक्षाः कृष्णमद्भुतदर्शनं॥४॥ स्वर्गोद्या
नोपगैर्माल्यैश्छादयंतो यदूत्तमं॥ गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरं॥५॥ देवा ऊचुः॥ नताः
स्मते नाथ पदारविंदं बुद्धींद्रियप्राणमनोवचोभिः॥ यच्चिंत्यतेऽन्तर्हृदि भावयुक्तैर्मुमुक्षुभिः कर्म
मयोरुपाशात्॥६॥

तेन नता वयं नमस्कृतवंतः स्मेति विस्मये॥ यथाहुः॥ दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा दृशा॥ मनसा व
चसा चेति प्रणामोऽष्टांग ईरितः इति॥ स्म शब्दोक्त विस्मयाय विशेषणं कर्ममयोरुपाशान्मुमुक्षुभिर्भावयुक्तै
रपि यत्केवलमंतर्हृदि चिंत्यते॥ न तु दृश्यते॥ तद्वयं नताः॥ अहो भाग्यमित्यर्थः॥६॥ ॥ ॥ऽऽ॥ ॥ ॥

भा० ए० एतेषां च मुनिसनकादीनां मुमुक्षूणां सेवकानां मध्ये परमभागवतेषु लक्ष्म्या अपि तव प्रीतिरधिकेति स्तुवंति पर्युष्ट
३१ येति ॥ हे उ भावस्थानादसः ॥ अहं यत्र वसामि ॥ तत्रैव वक्षसि पर्युषितम्लानीयं वसतीति प्रतिपत्नीवत् ॥ स पत्नीवत् ॥
श्रीः संस्पर्द्धमाना भवति ॥ तथापि त्वां स्पर्द्धमानां श्रियमनादृत्य यो भवान् पर्युषितयापि अमुया वनमाले
या भक्तैरर्पितेयमिति प्रीत्या सुप्रणीतं सुष्ठु संपादितं यथा भवति तथार्हणं पूजामाददत् ॥ स्वीकृतवा

प१

पर्युष्टया तव विभो वनमालयेयं संस्पर्द्धिनी भगवती प्रतिपत्निवच्छ्रीः ॥ यः
सुप्रणीतममुयार्हणमाददन्नो भूयात्सदांघ्रिरशुभाशयधूमकेतुः ॥ ११ ॥

न् ॥ सुप्रणीतमित्यर्हणविशेषणं वा ॥ तस्य तवांघ्रिर्नोऽशुभाशयधूमकेतुर्भूयात् ॥ यद्वा ॥ योऽङ्घ्रिरमुया सुप्रणीतमर्ह
णमाददत्स नोऽशुभाशयधूमकेतुर्भूयादित्यन्वयः ॥ अथवैवं संबंधः ॥ एतेभ्यो नानार्हणादिनिषेवेभ्योऽपि वक्षसि
प्रवृद्धस्नेहभावं तत्व एव कृतार्थो ॥ भगवतो यशः प्रियतामित्याहुः पर्युष्टयावशक्रान्तावित्यस्माद्धेतोः ॥ पतितः स
वौगोत्सृष्टया क्लान्तया शोभितया वनमालया ॥ वक्षसि एकदेशे वर्त्तमाना श्रीः संस्पर्द्धमाना भवति ॥ तथाप्यायय
मधुव्रतैर्वंदुधा वर्णितस्याकीर्त्तिमय्या वैजयंत्या वनमालयैव यो भवान् ॥ सुप्रणीतमर्हणमाददत् इत्यादि पूर्वे

तदेवं त्वद्यशः श्रवणस्य शुद्धिहेतुः ॥ अस्माभिस्तु तवांघ्रिः दृष्टः ॥ अतस्तवांघ्रिर्नोऽस्माकमशुभाशयानां विषयवासनानां धू
मकेतुर्दाहकः स्यात् ॥ कथंभूतः ॥ यः क्षेमाय मोक्षाय मुनिभिर्मुमुक्षुभिः ॥ प्रेमार्द्रहृदा उह्यमानश्चिंत्यमानः ॥ यश्च सात्व
तैर्भक्तैः समविभूतये समानैश्वर्याय वासुदेवादिव्यूहेऽर्चितः ॥ तेषु च केश्चिदात्मवद्भिर्धीरैः ॥ स्वरतिक्रमाय स्वर्गमति
क्रम्य वैकुंठप्राप्तये सवनशस्त्रिकालमर्चितः ॥ ९ ॥ किंच ॥ प्रयतपाणिभिः संयतहस्तैर्हविर्गृहीत्वा ॥ अध्वराग्नौ

स्यान्नस्तवांघ्रिरशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः ॥ यः सात्वतैः समवि
भूतय आत्मवद्भिर्व्यूहेऽर्चितः सवनशः स्वरतिक्रमाय ॥ ९ ॥ यश्चिंत्यते प्रयतपाणिभिरध्वराग्नौ
त्रय्या निरुक्तविधिनेश हविर्गृहीत्वा ॥ अध्यात्मयोग उत योगिभिरात्ममायां जिज्ञासुभिः परम
भागवतैः परीष्टः ॥ १० ॥

आहवनीयादौ याज्ञिकैर्यश्चिंत्यते ॥ ननु यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्निति वचनात्तत्त
द्देवताश्चिंत्यंते ॥ अत आह ॥ त्रय्या निरुक्तेन विधिना इंद्रादिरूपेणैव यज्ञपुरुषश्चिंत्यत इत्यर्थः ॥ उत किंचाध्य
ध्यात्मयोगे आत्माधिकारे योगे योगिभिरपि ॥ आत्मनस्तव मायां अणिमादिसिद्धिं जिज्ञासुभिस्त्वत्कामैर्यश्चिं
त्यते ॥ परमभागवतैस्तु मुक्तैर्यः परीष्टः सर्वतः पूजितः स तवांघ्रिर्नोऽशुभाशयधूमकेतुः स्यादिति पूर्वेणान्व

प्रकृतिपुरुषाभ्यां परत्वमुपपादयन्नतः॥ कालत्वेन पुरुषोत्तमत्वमाहुः॥ अस्येति॥ अस्य जगत उदयादीनां हे
तुरसि कुतः॥ अव्यक्तं प्रकृतिः॥ जीवः पुरुषः॥ महान्महत्तत्त्वं॥ तेषां कालं नियंतारं त्वामाहुः॥ अक्षरात्परतः
परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः॥ पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरित्याद्याः श्रुतयः॥ किंच
अयं संवत्सरात्मको यः कालः त्रिनाभिः॥ त्रीणि चातुर्मास्यानि नाभयो यस्य सोऽपि त्वमेव॥ अतस्त्वमुत्तमपुरुष इति

अस्यासि हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि कालमाहुः॥ सोऽयं त्रिनाभिरखिला
पचये प्रवृत्तः कालो गभीररय उत्तमपुरुषस्त्वम्॥ १४॥ त्वत्तः पुमान्समधिगम्य ययास्य वीर्यं ध
त्ते महान्तमिव गर्भममोघवीर्यः॥ सोऽयं तयानुगत आत्मन आण्डकोशं हैमं ससर्ज बहिराव
रणैरुपेतं॥ १५॥

तथा च गीतासु॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः॥ अतोऽस्मि लोके
रितुर वेदे च प्रथितः पुरुषोत्तम इति॥ १४॥ त्वमेव प्रकृत्यादिद्वारा जगत्सृष्ट्यादिहेतुरुक्तं॥ तत्केन प्रकारेण
तदाहुः॥ त्वत्त इति॥ त्वत्तः पुरुषो वीर्यं शक्तिं समधिगम्य प्राप्य ययामायया सह महान्तं धत्ते कमिव॥ अस्य
विश्वस्य गर्भमिव॥ सोऽयं महान् तयैव माययानुगतः सन्॥ आत्मनः सकाशादाण्डकोशं ससर्ज॥ तयानुगत
इति पाठेऽपि तया मायया त्वयाधिष्ठितः सन्निति॥ १५॥ ॥ ऽऽ ॥ ॥ऽऽ ॥ ॥ ऽऽ

त्वच्चरणस्य भक्त्युपहृतापातः प्रसिद्ध एवेति स्तुवंतः प्रार्थयंते । केतुरिति । बलिबंधने त्रिभिर्विक्रमैर्युतः । तत्र द्वितीये विक्रमे सत्यलोकं गतस्तव पादः केतुः अत्युच्छ्रितो विजयध्वज एव तत्संपादयंतीति । त्रिपतत्पताकः । त्रिधा पतंती त्रिषु लोकेषु आपतंती गंगा पताका यस्य सः । तथा असुरदेवचम्वोः तत्सेनयोः क्रमेण भयाभये याभ्यां भयाभयकरः । साधुषु सुरेषु स्वर्गाय खलेषु असुरेषु इतराय अधोगमनाय । यः एवं केतुरूपस्तव पादः स भजतां नः अघं पुनातु । अघाद्विनिर्णोधि भजतां न इति कर्मणि षष्ठ्यौ । अघाद्भजतोऽस्मान्पुनात्विति । तथा च श्रुतिः । चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि । ते

केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते भयाभयकरोऽसुरदेवचम्वोः । स्वर्गाय साधुषु खलेष्वितराय भूमन्पादः पुनातु भगवन्भजतामघं नः ॥ १२ ॥ नस्योतगाव इव यस्य वशे भवंति ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः । कालस्य ते प्रकृतिपूरुषयोः परस्य शं नस्तनोतु चरणः पुरुषोत्तमस्य ॥ १३ ॥

न पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम । लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत् । अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके सुधितां दधात्विति ॥ १२ ॥ ननु युद्धे देवासुरादयः परस्परं जयंति । जायंते वा किमहं तत्रेत्याह । नसीति । मिथुर्मिथः अर्द्यमानाः युद्धादिभिः पीड्यमानाः ब्रह्मादयोऽपि यस्य तव वशे भवंति न तु जये पराजये वा स्वतंत्राः । क इव । नसि नासिकायां ओताः नासिकामाविध्य बद्धाः गावो बलीवर्दा इव । कुतः । कालस्य कलयितुः प्रवर्तकस्य । तदेव कुतः । प्रकृतिपुरुषयोरपि परस्य तस्य ते पुरुषोत्तमस्य पादः नः शं तनोतु ॥ १३ ॥ ॥ ४१

भा०ए० तस्मात्त्वामृतरूपायाः कथायाः तदेवंउदमुदकंवहंतीतिकथाकीर्त्तिनद्यः॥तथापादावनेजसरितोगंगाद्याश्च
३२ त्रिलोक्याःशमलानिहंतुविभ्व्यःकेनप्रकारेण॥आनुश्रवंगुरोरुच्चारणमनुश्रूयतइत्यनुश्रवोवेदः॥तत्रभ

विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याःपादावनेजसरितःशमलानिहंतुं॥आनुश्रवंश्रु
तिभिरंघ्रिजमंगसंगैस्तीर्थद्वयंशुचिषदस्तउपस्पृशंति॥१८॥श्रीशुकउवाच॥इत्यभिष्टू
यविबुधैःसेशःशतधृतिर्हरिं॥अभ्यभाषतगोविंदंप्रणम्यांबरमाश्रितः॥१९॥ब्रह्मोवाच
भूमेर्भारावतारायपुराविज्ञापितःप्रभो॥त्वमस्माभिरशेषात्मंस्तत्तथैवोपपादितं॥धर्म
श्चस्थापितःसत्सुसत्यसंधेषुवैत्वया॥कीर्तिश्चदिक्षुविक्षिप्तासर्वलोकमलापहा॥२०॥
अवतीर्ययदोर्वंशेबिभ्रद्रूपमनुत्तमं॥कर्माण्युद्दामवृत्तानिहितायजगतोऽकृथाः॥२१॥या
नितेचरितानीशमनुष्याःसाधवःकलौ॥शृण्वंतःकीर्तयंतश्चतरिष्यंत्यंजसातमः॥२२॥ ॥

वंकीर्तिरूपंतीर्थंश्रुतिभिःश्रवणेंद्रियैःअंघ्रिजंचांगसंगैः॥एवंशुचिषदःस्वाश्रमधर्मस्थितास्तेनवती
र्थद्वयमुपस्पृशंति॥सेवंतइति॥१८॥विबुधैःसह॥१९॥विक्षिप्ताविस्तारिता॥२०॥उद्दामानि॥रत्नानिविक्रमाये

हरिहरिहरिहरि॥१८॥१८॥

३३

नन्वेवंभूतमीश्वरंत्वमकुतोऽवगतंतत्राहुः॥ तदिति॥ तत्तस्मात्तस्थुषःस्थावरस्यजगतोजंगमस्यचभगवानधी
शः यद्यस्मान्मायया उत्थाया उज्जृंभितायाम्गुणविक्रियाइंद्रियवृत्तिःतयोपनीतान्॥ अर्थान्विषयान्जुषमाणो
पि॥ हेहृषीकपते॥ नलिप्तस्त्वं॥ येत्वन्येज्ञीवायोगिनोवास्वतःपरिहृतादपिअविद्यमानात्त्यक्ताद्वा॥ विषयजोषा॥
त्तू बिभ्यतिस्मवासनामात्रेणाबध्यंतइत्यर्थः॥ ३६॥ अलिप्तत्वमाहुः॥ स्मायेति॥ स्मायावलोकोमंदस्मि

तत्तस्थुषश्चजगतश्चभवानधीशोयन्माययोत्थगुणविक्रिययोपनीतान्॥ अर्थान्जु
षन्नपिहृषीकपतेनलिप्तोयेऽन्येस्वतःपरिहृतादपिबिभ्यतिस्म॥ ३६॥ स्मायावलोकलव
दर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः॥ पत्न्यस्तुषोडशसहस्रमनंगबाणैर्य
स्येंद्रियंविमथितुंकरणैर्नविभ्व्यः॥ ३७॥

तविलसितोयोऽवलोकस्तस्यलवःकटाक्षः॥ तेनदर्शितःयोभावोऽभिप्रायस्तेनअलिप्तत्वमाहुः॥ मनोहारि
यद्भ्रूमंडलंतेनप्रहितायेसौरतामंत्रास्तैः॥ शौंडैः॥ प्रागल्भ्यैः॥ अनंगबाणैःकामस्यबाणैःसंमोहनैःकरणैः॥
कामकलाभिः॥ षोडशसाहस्रंपत्न्यः॥ यस्येंद्रियंमनःविमथितुंक्षोभयितुंनविभ्व्यःनसमर्थाः॥ अतःसभगवा

भा० ए० ॥ ३३ ॥ प्रभासं यास्याम इति वदतोऽयमभिप्रायः ॥ एते देवांशाः स्वाधिकारान्नेवार्हंतीति ॥ न तु सद्यो मोक्षं द्वारवत्याम्
३४ तामुच्चैरन् ॥ तस्मादभ्युदयफलं प्रभासं नेष्यामीति ॥ ३३ ॥ दक्षशापाद्यक्ष्मणा गृहीतश्चंद्रो यत्र स्नानमात्रं कृत्वा

श्रीभगवानुवाच ॥ एते वै सुमहोत्पाता व्युत्तिष्ठंतीह सर्वतः ॥ शापश्च नः कुलस्यासीद्ब्राह्मणेभ्यो
दुरत्ययः ३२ ॥ न वस्तव्यमिहास्माभिर्जिजीविषुभिरार्यकाः ॥ प्रभासं सुमहत्पुण्यं यास्यामोऽ
द्यैव मा चिरं ॥ ३३ ॥ यत्र स्नात्वा दक्षशापाद्गृहीतो यक्ष्मणोडुराट् ॥ विमुक्तः किल्बिषात्सद्यो भेजे भू
यः कलोदयं ॥ ३४ ॥ वयं च तस्मिन्नाप्लुत्य तर्पयित्वा पितॄन्सुरान् ॥ भोजयित्वोशिजो विप्रान्ना
नागुणवतांधसा ॥ तेषु दानानि पात्रेषु श्रद्धयोप्त्वा महांति वै ॥ वृजिनानि तरिष्यामो दानैर्नौ
भिरिवार्णवं ॥ ३५ ॥ श्रीशुक उवाच ॥ एवं भगवतादिष्टा यादवाः कुरुनंदन ॥ गंतुं कृतधियस्तीर्थं स्यं
दनान्समयूयुजन् ॥ ३६ ॥ तन्निरीक्ष्योद्धवो राजन्श्रुत्वा भगवतोदितं ॥ दृष्ट्वारिष्टानि घोराणि नि
त्यं कृष्णमनुव्रतः ॥ विविक्त उपसंगम्य जगतामीश्वरेश्वरं ॥ प्रणम्य शिरसा पादौ प्रांजलिस्तमभाषत

किल्बिषात्तस्माद्रोगदुःखात्सद्यो विमुक्तः सन् कलावृद्धिं भेजे ॥ ३४ ॥ उशिजः कमनीयान् शुद्धान् अंध
साऽन्नेन ॥ उप्त्वेति ॥ यथा सुक्षेत्रे बीजं उप्तं बहुफलं भवति ॥ तथा दानं सत्पात्र इति द्योतयति ॥ ३५ ॥ ३६ ॥ ३७ ॥
३४

२३॥२४॥२५॥२६॥ वीर्यशौर्ययुक्तयाश्रिया॥२७॥ उद्वेलेनलंघितमर्यादेन॥२८॥ वैकुंठयास्यनंतवभवनंया

चे१

यदुवंशेवतीर्णस्यभवतःपुरुषोत्तम॥शरच्छतंव्यतीतायपंचविंशाधिकंप्रभो॥२३॥नाधुनातेखिव
लाधारदेवकार्यावशेषितं॥कुलंचविप्रशापेननष्टप्रायमभूदिदं॥२४॥ततःस्वधामपरमंविश
स्वयदिमन्यसे॥सलोकांल्लोकपालान्नःपाहिवैकुंठकिंकरान्॥२५॥श्रीभगवानुवाच॥अवधारि
तमेतन्मेयदात्थविबुधेश्वर॥कृतंवःकार्यमखिलंभूमेर्भारोवतारितः॥२६॥तदिदंयादव
कुलंवीर्यशौर्यश्रियोद्धतं॥लोकंजिघृक्षद्रुद्धंमेवेलयेवमहार्णवः॥२७॥यद्यसंहृत्यदृ
प्तानांयदूनांविपुलंकुलं॥गंतास्म्यनेनलोकोयमुद्वेलेनविनंक्ष्यति॥२८॥इदानींनाश
आरब्धःकुलस्यद्विजशापजः॥यास्यामिभवनंब्रह्मन्नेतदंतेतवानघ॥२९॥श्रीशुकउवा
च॥इत्युक्तोलोकनाथेनस्वयंभूःप्रणिपत्यतं॥सहदेवगणैर्देवःस्वधामसमपद्यत॥३०॥अ
थतस्यांमहोत्पातान्द्वारवत्यांसमुत्थितान्॥विलोक्यभगवानाहयदुवृद्धान्समागतान्॥३१॥

यामि॥२९॥ ३०॥ ३१॥ रामराम श्रीहरयेनमोनमः॥रामरामगोविंदगोपालहरेमुकुंद॥रामरामरामरामराम

भा० ए० तावकैर्भक्तैः सुखदुस्तरतया क्ष्वेली परिहासः ॥ द्वंद्वैकत्वं ॥ ४९ ॥ एकांतिनमित्यादि स्वाभिप्रायावचने हेतुः ॥ ५० ॥
३५ इति श्री एकादशे षष्ठः ॥ ६ ॥ सप्तमे तद्धवस्यात्मज्ञाननिष्ठो हरिः स्वयं ॥ अवधूतेतिहासोक्त्या गुरूनष्टावव ॥

वयं त्विह महायोगिन्भ्रमंतः कर्मवर्त्मसु ॥ त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः ॥ स्मरंतः की-
र्तयंतस्ते कृतानि गदितानि च ॥ गत्युत्स्मितेक्षणक्ष्वेलि यन्नृलोकविडंबनं ॥ ४९ ॥ श्रीशुक उवाच
एवं विज्ञापितो राजन्भगवान्देवकीसुतः ॥ एकांतिनं प्रियं भृत्यमुद्धवं समभाषत ॥ ५० ॥ इति श्री
मद्भागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्धवसंवादे षष्ठोध्यायः ॥ ६ ॥ श्रीभगवानुवा
च ॥ यदात्थ मां महाभाग तच्चिकीर्षितमेव मे ॥ ब्रह्मा भवो लोकपालाः स्वर्वासं मेभिकांक्षिणः ॥ १ ॥
मया निष्पादितं ह्यत्र देवकार्यमशेषतः ॥ यदर्थमवतीर्णोहमंशेन ब्रह्मणार्थितः ॥ २ ॥ कुलं वै
शापनिर्दग्धं नंक्ष्यत्यन्योन्यविग्रहात् ॥ समुद्रः सप्तमे ह्येनां पुरीं च प्लावयिष्यति ॥ ३ ॥ यर्ह्ये
को १ वायं मया त्यक्तो लोकोयं नष्टमंगलः ॥ भविष्यत्यचिरात्साधो कलिनापि निराकृतः ॥ ४ ॥ ॥

ईयत ॥ यदात्थ त्वं संहृत्यैतत्कुलमिति ॥ स्वर्वासं वैकुंठवासं प्रति ॥ १ ॥ २ ॥ त्वं च सर्वत्यागेनात्मनिष्ठो भवेति
वक्तुमाह ॥ कुलमिति त्रयेण ॥ ३ ॥ नष्टमंगलो भविष्यति ॥ ४ ॥ ॥ ॥ ऽऽ ॥ ऽऽ ३५

लोकं मर्त्यलोकं न प्रत्यहन् च प्रतिहतवान् ॥ ३८ ॥ ३९ ॥ ४० ॥ शय्यादिषु त्वां भक्ताः ॥ नित्यं सेवितवंतो वयं कथं त्य-
जेम ॥ ४१ ॥ त्यक्तुमशक्नुवन् प्रार्थयंते ॥ न मायाभयादित्याह ॥ त्वयेति ॥ चर्चिताः ऽलंकृताः हि निश्चितं जयेम

उद्धव उवाच ॥ देवदेवेशयोगेश पुण्यश्रवणकीर्तन ॥ संहृत्यैतत्कुलं नूनं लोकं संत्यक्ष्यते भ-
वान् ॥ विप्रशापं समर्थोऽपि प्रत्यहन्न यदीश्वरः ॥ ३८ ॥ नाहं तवांघ्रिकमलं क्षणार्द्धमपि केश-
व ॥ त्यक्तुं समुत्सहे नाथ स्वधाम नय मामपि ॥ ३९ ॥ तव विक्रीडितं कृष्ण नृणां परममंग-
लं ॥ कर्णपीयूषमास्वाद्य त्यजत्यन्यस्पृहां जनः ॥ ४० ॥ शय्यासनाटनस्थानस्नानक्रीडा-
शनादिषु ॥ कथं त्वां प्रियमात्मानं वयं भक्तास्त्यजेमहि ॥ ४१ ॥ त्वयोपभुक्तस्रग्गंधवासोऽलं-
कारचर्चिताः ॥ उच्छिष्टभोजिनो दासास्तव मायां जयेमहि ॥ ४२ ॥ वातरशना य ऋषयः श्र-
मणा ऊर्द्ध्वमंथिनः ॥ ब्रह्माख्यं धाम ते यांति शांताः संन्यासिनोऽमलाः ॥ ४३ ॥

४२ ॥ संन्यासिनो हि ब्रह्मचर्यादिक्लेशैः ॥ कथंचित्तरंति ॥ वयं त्वनायासेनैव तरिष्याम इत्याह ॥ वा-
तरशना इति ॥ ऊर्द्ध्वमंथिनः ॥ ऊर्द्ध्वरेतसः ॥ ४३ ॥

त्त ४

भा० ११० ननु एवं युक्तचित्तत्वेन कर्माकरणे देवादयो विघ्नान्करिष्यंति तत्राह ॥ ज्ञानेति ॥ ज्ञानं वेदशास्त्रार्थं वेदा अपि तस्य
३६ ज्ञानिनः अन्तराये विपत्तये ॥ न ईशते न समर्था भवंति ॥ कुतः ॥ हि यस्मात्तस्य ज्ञानी देवादीनामात्मा भवतीति नि
श्चयः ॥ विज्ञानं [illegible] तद् दर्शनानुभवः ताभ्यां सम्यग् युक्तः ॥ ततश्च आत्मानुभवेनैव तुष्टचित्तः अ
तः शरीरारंभि देवादीनामन्तः ॥ अन्तरायैर्न प्रतिहन्यसे ॥ अयं भावः ॥ यावदनुभवं यथा संभवं वर्णाश्रम
ज्ञानविज्ञानसंयुक्त आत्मभृतः शरीरिणां ॥ आत्मानुभवतुष्टात्मा नांतरायैर्विहन्यसे ॥ १० ॥
दोषबुद्ध्या गुणातीतो निषेधान्न निवर्तते ॥ गुणबुद्ध्या च विहितं न करोति यथार्भकः ॥ ११ ॥ सर्वभू
तसुहृच्छांतो ज्ञानविज्ञाननिश्चयः ॥ पश्यन्मदात्मकं विश्वं न विपद्येत वै पुनः ॥ १२ ॥ श्रीशुक
उवाच ॥ इत्यादिष्टो भगवता महाभागवतो नृप ॥ उद्धवः प्रणिपत्याह तत्त्वजिज्ञासुरच्युतं ॥ १३ ॥
कर्माणि कुर्यादेव ॥ तदनंतरं सर्वेषामात्मभूतत्वान्न कोऽपि विघ्नानाचरतीति ॥ तथा च श्रुतिः ॥ तस्य ह न देवाश्च
नाभूत्या ईशते ॥ आत्मा ह्येषां स भवतीति ॥ १० ॥ तद्बोधस्य ज्ञानस्याप्युपयोगमाचरणप्रसंगे इत्याह ॥ दोषबुद्ध्येति ॥ गुण
दोषबुद्ध्यतीतो नापि शास्त्रेण संस्कारतो निषिद्धान्निवर्तते एव ॥ किंतु न दोषबुद्ध्या विहितं प्रायशः करोति न गुणबुद्ध्या ॥ य
थार्भकः ॥ संकल्पविकल्परहितः ॥ किंचित्करोति ॥ कुतश्चिन्निवर्तते न वत ॥ ११ ॥ एवंभूतस्य न पुनः संसार इत्याह ॥ सर्वभू

J ४

ज्ञानविज्ञानसंपन्न ॥ ९ ॥ ८ ॥ १३ ॥ (margin, vertical)

३६

या१

न वस्तव्यमेव त्वया ॥५॥ ६॥ ननु गुणदोषाभ्यां विषमे लोके कुतः समदृष्टिः स्यामत आह ॥ यदिदमिति ॥ मन
आदिभिर्गृह्यमाणं ॥ मनोमयत्वात् मायेति विद्धि ॥ तदपि न स्थिरं किं तु नश्वरं च विद्धि ॥७॥ मनोमयत्वे हे
तुः ॥ पुंस इति ॥ अयुक्तस्य विक्षिप्तमनसः ॥ नानार्थो भेदविषयो भ्रमः ॥ स च भ्रम एव गुणदोषभाक् ॥ ननु

गे १

न वस्तव्यं त्वयैवेह मया त्यक्ते महीतले ॥ जनोऽधर्मरुचिर्भद्र भविष्यति कलौ युगे ॥५॥ त्वं
तु सर्वं परित्यज्य स्नेहं स्वजनबंधुषु ॥ मय्यावेश्य मनः सम्यक् समदृग्विचरस्व गां ॥६॥ यदिदं
मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ॥ नश्वरं गृह्यमाणं च विद्धि मायामनोमयं ॥७॥ पुंसोऽयु
क्तस्य नानार्थो भ्रमः स गुणदोषभाक् ॥ कर्माऽकर्मविकर्मेति गुणदोषधियो भिदा ॥८॥ तस्मा
द्युक्तेंद्रियग्रामो युक्तचित्त इदं जगत् ॥ आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरे ॥९॥

वेदेनैव विधिनिषेधाभ्यां वेदस्य सत्यतोक्ता ॥ न ॥ भ्रमविजृंभितं गुणदोषद्वैः ॥ पुंसः कर्म विहितं ॥ अक
र्म तल्लोपः ॥ विकर्म निषिद्धमिति भिदा भेदः ॥ अविद्यावद्विषयस्यैव वेद इत्यर्थः ॥८॥ कथमात्मविपरिछि
न्ने विततम् ॥ जगदीक्षणीयं तत्राह ॥ आत्मानमिति ॥ मयि ब्रह्मणि तद्रूपेणेक्षस्व ॥९॥ ॥ ६ ॥ रामराम राम ॥

है१ नै१

भा० ११० ३७ मयासंक्षेपत उक्तं विस्तरतस्त्वन्यान्पृच्छेति चेदत आह ॥ सत्यस्येति ॥ स्वदृशः स्वप्रकाशस्य सत्यस्यात्मनः ॥ आ
त्मनो मां प्रतिवक्तारं तेभ्योऽन्यं नानुपश्ये न पश्यामि ॥ स्वदृशः स्वतः सिद्धः ॥ सिद्धत्वान्नान्यत्वं नोऽन्यमिति वाकुत इत्य
त आह ॥ सर्वइति ॥ बहिरर्थभावा विषयेष्वर्थबुद्धयः ॥ १७ ॥ तस्मादिति ॥ केचिद्धंसी लाभवंति ॥ केचित्सेविता ॥ फ
लेकाले विनश्यंति ॥ केचिद्दज्ञाः ॥ केचिद्द्वंद्वेनाऽसमर्थाः ॥ केचित्तु स्थानभ्रष्टाः ॥ तद्व्रत्यर्थमनवद्यमित्यादि

सत्यस्यते स्वदृश आत्मन आत्मनोऽन्यं वक्तारमीश विबुधेष्वपि नानुचक्षे ॥ सर्वे विमोहि
तधियस्तव माययेमे ब्रह्मादयस्तनुभृतो बहिरर्थभावाः ॥ १७ ॥ तस्मा द्भवंतमनवद्यमनं
तपारं सर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यं ॥ निर्विण्णधीरहमु ह वृजिनाभितप्तो नारायणं
नरसखं शरणं प्रपद्ये ॥ १८ ॥ श्रीभगवानुवाच ॥ प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः ॥ स
मुद्धरंति ह्यात्मानमात्मनैवाशुभाशयात् ॥ १९ ॥

निष्पंचविशेषणानि ॥ नअंतः कालतः पारं च देशतो यस्य तं ॥ कालादिभिरकुंठो विकुंठो लोको धिष्ण्यं स्थानं यस्य तं उ
हेभगवन् हंस्फुटं निर्वेदहेतुः वृजिनैः दुःखैरभितप्तः ॥ हकारो घोरवाय वक्रा रोयुक्तेऽव्यपगनीयः ॥ नन्वनवद्यत्वा
दीनि कुतो भवतदाह ॥ नारायणमिति ॥ अनुकंपितात्माह ॥ नरो जीवस्तस्य सखायं भवंतं शरणं प्रपद्ये ॥ १८ ॥ तदेवमस्य
भावनाविपरीतभावनामुपदिष्टं तत्त्वमनवद्या हमानप्रतीतिस्थिरं तये गुरूपदेशं विनापि स्वान्वयव्यतिरेकाभ्यामेव

३७

त्वं तु सर्वं परित्यज्येत्याद्युपदेशमात्मनो योग्यमनन्वानः पुनः पृच्छति ॥ योगेशेति ॥ योगफलदायिन् ॥ योगविदां न्या
सः ॥ न्यासो नाम आत्तिर्णोप्योनि तेयाविशेषः ॥ यद्व ॥ योगाविन्यस्यन्ते क्रियन्ते यस्मिन् योगात्मन् ॥ योगेश्चात्मप्रकटो भ
वति यस्य योगस्वरूपेति वा ॥ योगस्य संभवो यस्मात् ॥ चतुर्भिरेतैः संबोधनैः स्वमहिम्ना के
वलत्वेयापदिष्टं न तु मदधिकारं पर्य्यालोच्येति द्योतितं ॥ निःश्रेयसायेति ॥ न चारोग्याय सर्वे स्वदानादि वदयेत्या

उद्धव उवाच ॥ योगेश योगविन्यास योगात्मन् योगसंभव ॥ निःश्रेयसाय हि प्रोक्तस्त्यागः संन्या
सलक्षणः ॥ १४ ॥ त्यागोऽयं दुष्करो भूमन् कामानां विषयात्मभिः ॥ सुतरां त्वयि सर्वात्मन्नभक्तैरिति
मे मतिः ॥ १५ ॥ सोहं ममाहमिति मूढमतिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबंधे ॥ तत्त्वंजसा नि
गदितं भवता यथाहं संसाधयामि भगवन्ननुशाधि भृत्यं ॥ १६ ॥

गः ॥ किं तु संन्यासलक्षणः ॥ अप्रत्यापत्तिरूपः ॥ १४ ॥ १५ ॥ यं प्रति त्यागाद्युपदिष्टं सोहं मूढमतिः ॥ कुत्र
ममेति ॥ अहमिति च सानुबंधे पुत्रादिसहिते ॥ त्वन्मायया विरचिते ॥ आत्मनि देहे विगाढो निमग्नः ॥ अ
तस्तत्तु भगवता निगदितम् ॥ यथाहमंजसा संसाधयामि ॥ तथा त्वं मामनुशाधि ॥ शनैः शिक्षय ॥ १६ ॥

भा० ए०
३८

भूयोऽन्वयव्यतिरेकाभ्यामसंभावनादिनिवृत्त्यावितिहासमाह॥ अत्रापीति॥२४॥२५॥ सुविशारदात्यंतनिपुणा
सर्वलोकविलक्षणा॥२६॥ सर्वलोकवैलक्षण्यमेवाह॥ प्राय इति॥ धर्मादिषु॥ विवित्सायामात्मविचारे च मानवाः॥

अत्राप्युदाहरंतीममितिहासंपुरातनं॥ अवधूतस्यसंवादंयदोरमिततेजसः॥२४॥ अवधूतं
द्विजंकंचिच्चरंतमकुतोभयं॥ कविंनिरीक्ष्यतरुणंयदुःपप्रच्छधर्मवित्॥२५॥ यदुरुवाच॥ कु
तोबुद्धिरियंब्रह्मन्नकर्त्तुःसुविशारदा॥ यामासाद्यभवाल्लोकंविद्वांश्चरतिबालवत्॥२६॥ प्रायो
धर्मार्थकामेषुविवित्सायांचमानवाः॥ हेतुनैवसमीहंतेआयुषोयशसःश्रियः॥२७॥ त्वंतुक
ल्पःकविर्दक्षःसुभगोमितभाषणः॥ नकर्त्तानेहसेकिंचिज्जडोन्मत्तपिशाचवत्॥२८॥ जने
षुदह्यमानेषुकामलोभदवाग्निना॥ नतप्यसेऽग्निनामुक्तोगंगांभस्थइवद्विपः॥२९॥॥

समीहंते प्रवर्त्तंते॥ तत्रापि आयुरादेर्हेतुनाकामनैव॥२७॥ त्वंतुनकस्यचित्कर्मणःकर्त्ताभवसि॥ नकिंचि
दीहसे॥ इच्छसि॥ नन्वशक्तत्वाद्वा॥ अज्ञानेनवा अनैपुण्येनवाविरूपत्वेनवा॥ अवामितयावा॥ औदासीन्यंघ
टत एवनेत्याह॥ कल्प इत्यादिना॥२८॥ महानानंदस्तवकुतइति॥ जनेष्विति॥२९॥॥ ॥ऽऽ॥ ॥ऽऽ॥ ॥

३८

तदुपपादयति॥आत्मनः परस्मादिशरीरेष्वात्मैवहितोहितन्नानेगुरुः॥२०॥तत्रप्रत्यक्षं दर्शयति॥पुरुषत्वे चेति॥त
थाचश्रुतिः॥पुरुषत्वेचेति॥तथाचश्रुतिः॥पुरुषत्वेचाविस्तरामात्मासहितःप्रज्ञानेनसंपन्नतमोविज्ञातंवदतिविज्ञातं
पश्यतिवेदश्वस्तनं॥वेदलोकालोकौमर्त्येनामृतमीप्सत्येवंसंपन्नोऽथेतरेषांपशूनामशनापिपासेएवाभिविज्ञा
नमिति॥२१॥आत्मःपुरुषत्वंचस्तौति॥एकेति॥२२॥अनुमानमाह॥अत्रेति॥अत्रपौरुष्यांपरियुक्ताअप्रमत्ताःआग्राह्यं॥
आत्मनोगुरुरात्मैवपुरुषस्यविशेषतः॥यत्प्रत्यक्षानुमानाभ्यांश्रेयोऽसावनुविंदते॥२०॥पुरु
षत्वेचमांधीराःसांख्ययोगविशारदाः॥आविस्तरांप्रपश्यंतिसर्वशक्त्युपबृंहितं॥२१॥एकद्वित्रिच
तुष्पादोबहुपादस्तथाऽपदः॥बह्व्यःसंतिपुरःसृष्टास्तासांमेपौरुषीप्रिया॥२२॥अत्रमांमार्ग
यंत्यद्धायुक्ताहेतुभिरीश्वरं॥गृह्यमाणैर्गुणैर्लिंगैरग्राह्यमनुमानतः॥२३॥ ॥ ॥८८॥॥
ग्राह्येभ्योऽहंकारादिभ्योव्यतिरिक्तं॥अद्धासाक्षान्मृगयति॥मार्गणेप्रकारद्वयमाह॥गृह्यमाणैःबुद्ध्यादिभिर्गुणै
र्हेतुभिर्जडानांप्रकाशःस्वप्रकाशंविनानघटतइत्यनुपपत्तिमुखेनलक्षणैः॥तथातैरेवलिंगैर्व्याप्तिमुखेनानु
मानतईश्वरंप्रवर्तकंमृगयंते॥बुद्ध्यादिकरणानिकर्तृप्रयोज्यानि॥करणत्वाद्वास्यादिवदिति॥तदुक्तं॥भगवान्सर्व
भूतेषुलक्षितःस्वात्मनाहरिः॥दृश्यैर्बुद्ध्यादिभिर्द्रष्टालक्षणैरनुमापकैरिति॥नचैतावतात्रअनुमा...क॥आत्म
नि

तिमंतेदेहादिव्यतिरिक्तत्वं।परार्थप्रवृत्तिमात्रस्यैवानुमा
नेनविवक्षितत्वात्॥२३॥

क्षितेः क्षमां शिक्षितवानित्याह ॥ भूतैरिति ॥ आक्रम्यमाणः ॥ पीड्यमानः ॥ तद्विहान्भूतानां दैववशानुवर्तित्वं
विद्वान् ॥ व्रतनियमं ॥ ३६ ॥ पर्वतरूपा वृक्षरूपा च या पृथिवी तस्याः शिक्षितमाह ॥ शश्वदिति ॥ सर्वदा परार्थी
: सर्वा ईहा यस्य सः ॥ परार्थैकान्तं अतिशयेन संभवो यस्य सः ॥ भूभृतः पर्वतात् ॥ तस्य हि वृक्षादेर्वा
निर्झरप्रसवक्रियाः परार्था एव यथा तद्वत् ॥ तथा नगशिष्यः ॥ वृक्षशिष्यः ॥ सन् परात्मतः ॥ पराधीनात्मता ॥

भूतैराक्रम्यमाणोऽपि धीरो दैववशानुगैः ॥ तद्विद्वान्न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतं ॥ ३६ ॥ श
श्वत्परार्थसर्वेहः परार्थैकान्तसंभवः ॥ साधुः शिक्षेत भूभृतो नगशिष्यः परात्मतां ॥ ३७ ॥
प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेन्द्रियप्रियैः ॥ ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः ॥
३८ ॥ विषयेष्वाविशन्योगी नानाधर्मेषु सर्वतः ॥ गुणदोषव्यपेतात्मा न विषज्जेत वायुवत् ॥ ३९ ॥
वक्ष्यमाणस्य बहुवचनस्य ... ॥ ३७ ॥ वायुरपि द्विविधः ॥ प्राणो बाह्यश्च ॥ तत्र प्राण
स्य गुरुत्वमाह ॥ प्राणवृत्त्येति ॥ प्राणधारणार्थाहारादिमात्रेण प्रवर्तेत ॥ रूपरसादीनिंद्रियविषयांस्तु नापेक्षेत ॥ तथा च
निरपि भवेदित्यर्थः ॥ प्राणवृत्तेरकरणे मनोवैकल्येन ज्ञाननाशः स्यात् ॥ अतो देहनिर्वाहः कर्तव्यः ॥ गुणलिप्या
यातु वाङ्मनश्चाविक्षिप्यते ॥ ३८ ॥ अतो नाधिकं लिप्सेदित्यादि ज्ञानमिति नावकीर्येत ॥ न विक्षिप्येत ॥ विषयान्से
वमानोऽपि तेष्वनासक्तिं बाह्याद्वायोः शिक्षेदित्याह विषयेष्विति ॥ नानाधर्मेषु शीतोष्णादिधर्मकेषु ॥ न हि वा

स्पर्शविहीनस्य विषयभोगरहितस्य॥ अत्र हेतुः॥ केवलात्मनः कलत्रादिशून्यस्य॥३०॥३१॥ बुद्धैर्वीपाश्रिताः
स्वीकृता नानात्पदेशेन॥ अटामि पर्यटामि॥३२॥ शोभनं रूपं कीदृस्य करोतीति सुपेशाकृत॥३३॥ मे मया आश्रि

त्वेहिनः प्रच्छतां ब्रह्मन्नात्मन्यानंदकारणं॥ ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः॥३०॥ श्री
भगवानुवाच॥ यदुनैवं महाभागो ब्रह्मण्येन सुमेधसा॥ पृष्टः सभाजितः प्राह प्रश्रयावनतं
द्विजः॥३१॥ ब्राह्मण उवाच॥ संति मे गुरवो राजन्बहवो बुद्ध्युपाश्रिताः॥ ततो बुद्धिमुपादाय मुक्तो
ऽटामीह तान्शृणु॥३२॥ पृथिवी वायुराकाशमापोग्निश्चंद्रमा रविः॥ कपोतोऽजगरः सिंधुः
पतंगो मधुकृद्गजः॥ मधुहा हरिणो मीनः पिंगला कुररोऽर्भकः॥ कुमारी शरकृत्सर्प ऊर्ण
नाभिः सुपेशकृत॥३३॥ एते मे गुरवो राजंश्चतुर्विंशतिराश्रिताः॥ शिक्षा वृत्तिभिरेतेषामन्व
शिक्षमिहात्मनः॥३४॥ यतो यदनुशिक्षामि यथा वा नाहुषात्मज॥ तत्तथा पुरुषव्याघ्र
निबोध कथयामि ते॥३५॥
तः॥ तदाह॥ एतेषां वृत्तिभिरात्मनः शिक्षा शिक्षणीयान्॥ अर्थान् हेयोपादेयादीनन्वशिक्षं॥ अनुशि
क्षितेष्वानस्मि॥३४॥ नाहुषो ययातिः॥३५॥

भा० ११०
४०

स्वछत्वादिभिर्गुणैरुदकंजगत्पुनातीति॥तद्गुणमयाशिक्षितेत्याह॥स्वछोनिर्मलः॥प्रकृतितःस्वभा
वतः॥स्निग्धोजनेषुवत्सलःरागवान्॥माधुर्यः॥मधुरालापीतीर्थभूः॥तीर्थस्थानं॥अपांमित्रं॥उदकतुल्यः॥अघा
दितिपाठे॥सर्वाण्यपापात्पुनाति॥स्वच्छत्वादिगुणैरर्थादुदकसादृश्यंज्ञातव्यं॥४३॥अग्नेःशिक्षितमाह तेज
स्वीति॥ज्ञानातिशयात्॥विशेषतस्तपसादीप्तः॥दुर्धर्षोग्राह्योऽभ्यस्चासाउदरभाजनश्च॥अपरिग्रहः॥युक्ता

स्वच्छःप्रकृतितःस्निग्धोमाधुर्यस्तीर्थभूर्नृणां॥मुनिःपुनात्यपांमित्रमीक्षोपस्प
र्शकीर्तनैः॥४३॥तेजस्वीतपसादीप्तोदुर्धर्षोदरभाजनः॥सर्वभक्ष्योऽपियुक्तात्माना
दत्तेमलमग्निवत्॥४४॥क्वचिच्छन्नःक्वचित्स्पष्टउपास्यःश्रेयइच्छतां॥भुंक्तेसर्वत्रदा
तॄणांदहन्प्रागुत्तराशुभं॥४५॥स्वमाययासृष्टमिदंसदसल्लक्षणंविभुः॥प्रविष्टईयते
तत्तत्स्वरूपोऽग्निरिवैधसि॥४६॥

युक्तात्मामुनिः॥४४॥अग्नेरेवशिक्षितांतरमाह॥क्वचिदिति.यथाग्निःपरोक्षयैवहविर्गृह्णाति॥तथा
मुनिरित्याह॥दातॄणामिति॥प्रागुत्तराशुभंभूतंभविष्यच्चपापं॥४५॥आत्मनोदेहोपाधिकमेवोच्चनीचं
त्वादिनस्वाभाविकमित्यप्यग्निदृष्टांतेनसंभावितमित्याह॥स्वमाययेति॥स्वमाययास्वाविद्ययासृष्टंस

यथावायुर्गंधादिधर्मैर्योगेनप्रतीयमानोऽपिवस्तुतोनतद्योगी॥एवंदेहादिधर्मयोगेनाहंप्रत्ययेप्रतीयमानोऽप्यात्मा
नतद्धर्मवानितिसंभावितमिति॥वायोरेवशिक्षितमाह॥पार्थिवेष्विति॥४०॥एकस्यैवाद्वितीयस्यात्मनःसर्वदेहि॥
भावेनवर्तमानत्वमसंगत्वंचेति॥आकाशाच्छिक्षितंसंभावनाद्वयमाह॥अंतर्हितश्चेतिद्वयेन॥अंतर्हितश्चदेहां
तर्गतोऽपिमुनिरात्मनोदेहाद्यसंगमं॥अतएवाव्यवच्छेदंचभावयेत्॥कुतः॥स्थिरजंगमेषुसमन्वयेनयाव्या

पार्थिवेष्विहदेहेषुप्रविष्टस्तद्गुणाश्रयः॥गुणैर्नयुज्यतेयोगीगंधैर्वायुरिवात्मदृक्॥
४०॥अंतर्हितश्चस्थिरजंगमेषुब्रह्मात्मभावेनसमन्वयेन॥व्याप्त्याव्यवच्छेदम
संगमात्मनोमुनिर्नभस्त्वंविततस्यभावयेत्॥४१॥तेजोवन्नमयैर्भावैर्मेघाद्यै
र्वायुनेरितैः॥नस्पृश्यतेनभस्तद्वत्कालसृष्टैर्गुणैःपुमान्॥४२॥ ॥ ऽऽ

प्तिः॥न॥विततस्यसर्वगतस्य॥तत्कुतः॥ब्रह्मात्मभावेनब्रह्मस्वरूपभावनया॥तत्त्वमसीतिश्रुतेः॥नन्वेत
त्सर्वंकथंसंभवतीतितत्राह॥नभसस्तुल्यत्वंसंभावयेत्॥यथानभसःसर्वगतस्यनघटादिभिःसंगःपरिच्छे
दोवा॥एवमात्मनोऽपिसंभवतीति॥४१॥किंच॥कूटस्थात्मनोनागमापायिदेहादिसंबंधइत्याह॥तेजोव
न्नमयैः॥तेजश्चआपश्चअन्नंपृथिवीचतन्मयैः॥कालसृष्टैःगुणैःदेहादिभिःप्रमा

णैःसंस्पृश्यतइतिनभोवत्संभवतीति॥४२॥

भा० ए० ४१ आदित्याच्छिक्षितमाह द्वयेन गुणैरिंद्रियैर्गुणान्‌ विषयान्‌ उपादत्ते यथाकालं अर्थिन्यागते सति विमुंचति च
न तेषु युज्यते ॥ लग्नमिति दत्त्वमिति वाभिनिवेशं न करोति ॥ गोभिः रश्मिभिः गाः ॥ जलानि गोपतिः सूर्य इव यथा ॥ ४९ ॥
स्वतो भेदश्चान्यस्याप्यात्मनो भेदप्रतीतिरुपाधिवशादित्यादिष्टान्तेनैव संभावितमित्याह ॥ बुध्यत इ

गुणैर्गुणानुपादत्ते यथाकालं विमुंचति ॥ न तेषु युज्यते योगी गोभिर्गा इव गोपतिः ॥ ४९ ॥ बु
न२ ध्यते स्वेभेदेन व्यक्तिस्थ इव तद्गतः ॥ लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोर्कवत्‌ ॥ ५० ॥
नातिस्नेहः प्रसंगो वा कर्त्तव्यः क्वापि केनचित्‌ ॥ कुर्वन्‌ विंदेत संतापं कपोत इव दीनधीः ॥ ५१ ॥
कपोतः कश्चनारण्ये कृतनीडो वनस्पतौ ॥ कपोत्या भार्यया सार्द्धमुवास कतिचित्समाः ॥ ५२ ॥
कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ ॥ दृष्टिं दृष्ट्यांगमंगेन बुद्धिं बुद्ध्या ववंधतुः ॥ ५३ ॥

ति ॥ स्वस्वरूपेणावस्थित आत्मा भेदेन न बुध्यते ॥ अभिव्यनक्तीति व्यक्तिरुपाधिः देहादिः ॥ व्यक्तिस्थ उपाधौ प्रतिबिं
बितस्तद्गतस्तद्वदुपाधिप्रविष्ट इव भेदेन स्थूलमतिभिर्लक्ष्यते अर्कवदित्यन्वयः ॥ ५० ॥ कपोताच्छिक्षितमाह
नातिस्नेह इति ॥ स्नेहः प्रीतिः ॥ प्रसंगस्तु पलोलनादासक्तिः ॥ ५१ ॥ दृष्टांतं प्रपंचयति ॥ कपोतः कश्चनेति ॥ ५२ ॥ तयोर्मि
थः स्नेहप्रसंगौ दर्शयति ॥ कपोतावितित्रयेण ॥ स्नेहेन गुणितं निबद्धं हृदयं ययोस्तौ ॥ ५३ ॥ ॥ ॥ ऽऽ ॥ ऽऽ

आत्मनो जन्मादिषड्विकारा भावश्चंद्र दृष्टांते न संभावित इत्याह विसर्गाद्या इति ॥ विसर्गो जन्म ॥ श्म
शानं नाशः तत्रैयं ज्योतिःशास्त्रप्रक्रिया ॥ आपमंडले चंद्रः ॥ तेजोमयमंडलादित्य ॥ तयोरेकाव ॥ त्रैव स्थाने चंद्र
न दृश्यते ॥ चक्षुष आदित्यमंडलेन समदेशस्थितेन व्यवधानात् ॥ सा अमावास्या ॥ अथ षष्टिघटिकाभिश्चंद्रे
नक्षत्रांतरं गच्छति ॥ आदित्यस्तु त्रयोदशभिर्होरात्रैः ॥ अतः प्रतिपदमारभ्य विषमस्थितस्य आदित्यमंडलस्य
पंचदशपंचदशभागा आपमंडले प्रतिबिंबिता दृश्यन्ते सा कलेत्युच्यते ॥ एवं पंचदशोऽह्नि त्रयोदशभिर्न

विसर्गाद्याः श्मशानांता भावा देहस्य नात्मनः ॥ कलानामिव चंद्रस्य कालेनाव्यक्तव
र्त्मना ॥ ४६ ॥ कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ ॥ नित्यावपि न दृश्येते आत्मनोऽग्नेर्यथा
ऽर्चिषाम् ॥ ४७ ॥

क्षत्रैरंतरमिमिति राशिचक्रस्य स प्रविशति न तत्रात्मकस्य मध्ये
यदा समसूत्रे चंद्रादित्यौ तिष्ठतः ॥ तदा संपूर्णं प्रतिबिंबं छायालांछितं दृश्यते सा पूर्णिमा तस्या अमावा
स्याप्रतिबिंबेन सह षोडश कलाश्चंद्रस्योपचर्यन्ते ॥ ततः पुनः प्रतिपदमारभ्य मंडलयोर्विषमीभावात् कलाक्ष
यः तत्र यथा कलानामेवोत्पादप्यौ नाप्यमंडलस्य तथात्मनोपीत्याह कलानामिवेति ॥ ४६ ॥ सिंहावलोकनेनाह
ग्निदृष्टांतेनैव देहानां क्षणभंगुरतया वैराग्यप्राप्तितमित्याह ॥ कालेनेति ॥ ओघवद्वेगो यस्य तेन ॥ आत्मनः ॥

[illegible] ॥ ८२ ॥

भा० ए०
६२

६१ स्वालयांतिके चरतः क्रीडतस्तान् कपोतपुत्रान् ॥ आतत्य प्रसार्य्य ॥ ६० ॥ ततस्तु काले वततो पोषणार्थं गतौ

एकदा जग्मतुस्तासामन्नार्थौ तौ कुटुंबिनौ ॥ परितः कानने तस्मिन्नर्थिनौ चेरतुश्चिरं ॥ ६१ ॥

दृष्ट्वा तांल्लुब्धकः कश्चिद्यदृच्छातो वनेचरः ॥ जगृहे जालमातत्य चरतः स्वालयांतिके ॥ ६२ ॥

कपोतश्च कपोती च प्रजापोषे सदोत्सुकौ ॥ गतौ पोषणमादाय स्वनीडमुपजग्मतुः ॥ ६३ ॥ कपोती स्वात्मजान्वीक्ष्य बालकान्जालसंवृतान् ॥ तानभ्यधावत्क्रोशंती क्रोशतो भृशदुःखिता ॥ ६४ ॥

सासकृत्स्नेहगुणिता दीनचित्ताजमायया ॥ स्वयं चावध्यत शिचा बद्धान्पश्यंत्यपस्मृतिः ॥ ६५ ॥ कपोतश्चात्मजान्बद्धानात्मनोप्यधिकान्प्रियान् ॥ भार्यां चात्मसमां दीनो विललापातिदुःखितः ॥ ६६ ॥ अहो मे पश्यतापायमल्पपुण्यस्य दुर्मतेः ॥ अतृप्तस्याकृतार्थस्य गृहस्त्रैवर्गिको हतः ॥ ६७ ॥ अनुरूपानुकूला च यस्य मे पतिदेवता ॥ शून्ये गृहे मां संत्यज्य पुत्रैः स्वर्यांति साधुभिः ॥ ६८ ॥

संतो पोषणमभूद्यं ॥ ६३ ॥ ६४ ॥ शिचा जालेन ॥ ६५ ॥ आत्मानुरूपां भार्यां च विललाप मुशोच ॥ ६६ ॥ विलापमेवाह त्रयेण ॥ अहो इति ॥ अतृप्तस्य दृष्टसुखेष्वकृतार्थस्य

विश्रब्धौ निःशंकौ ॥ ५४ ॥ सा कपोती तर्प्पयंती सहहासवीक्षितालापादिभिः प्रीणयंती ॥ अत एव तेनानुकंपिता सती यं
यं वांछति तं तं कामं समानयत् ॥ संपादयामास ॥ राजन्निति ॥ त्वं यथेति स्रचितं ॥ ५५ ॥ ५६ ॥ तेषु जलेभरिते घडेषु

शय्यासनाटनस्थानवार्त्ताक्रीडाशनादिकं ॥ मिथुनीभूय विश्रब्धौ चेरतुर्वनराजिषु ॥ ५४ ॥ यं यं वां
छति सा राजं तर्प्पयंत्यनुकंपिता ॥ तं तं समानयत्कामं कृच्छ्रेणाप्यजितेंद्रियः ॥ ५५ ॥ कपोती प्रथ
मं गर्भं गृह्णंती काल आगते ॥ अंडानि सुषुवे नीडे स्वपत्युः सन्निधौ सती ॥ ५६ ॥ तेषु काले व्यजा
यंत रचितावयवा हरेः ॥ शक्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरुहाः ॥ ५७ ॥ प्रजाः पुपुषतुः प्री
तौ दंपती पुत्रवत्सलौ ॥ शृण्वंतौ कूजितं तासां निर्वृतौ कलभाषितैः ॥ ५८ ॥ तासां पतत्रैः सुस्प
र्शैः कूजितैर्मुग्धचेष्टितैः ॥ प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः ॥ ५९ ॥ स्नेहानुबद्धहृद
यावन्योन्यं विष्णुमायया ॥ विमोहितौ दीनधियौ शिशून्पुपुषतुः प्रजाः ॥ ६० ॥

हरेः स्वभावकर्मादिशक्तिभिः रचितावयवाः पत्रिणः । कोमलान्यंगानि तनूरुहाश्च येषां ते ॥ ५७ ॥ ५८ ॥ पतत्रैः
पक्षैः अदीनानां हृष्टानां ॥ ५९ ॥ शिशून् बालान् प्रजाः पुत्रान् ॥ ६० ॥

भा० ए०
६३

शरीरनिर्वाहमात्रं यथालब्धेन कर्तव्यमित्याह ग्रासमिति आजगरः अजगरवृत्तिः अक्रियः उदासीनः २ य
दा नोपनमेत् तदा किं कर्तव्यं तत्राह शयीतेति अनुपक्रमः निरुद्यमः दिष्टभुग्दैवमेव प्रापकमिति धैर्यवान् ३ न
नु समर्थोपि शयीतैव किंउमित्याह ओज इति ओजः इंद्रियबलं सहो मनोबलं बलं शारीरमेव तद्युक्तमेव दे
हमकर्म्मकमेव बिभ्रच्छयान एव भवेत् वीतनिद्रः स्वार्थदत्तदृष्टिश्च भवेत् न पुनरीहेत इंद्रियवानपीति

ग्रासं सुमृष्टं विरसं महांतं स्तोकमेव वा यदृच्छयैवापतितं ग्रसेदाजगरोऽक्रियः २
शयीताहानि भूरीणि निराहारोनुपक्रमः यदि नोपलभेद्ग्रासो महाहिरिव दिष्टभुक्
३ ओजःसहोबलयुतं बिभ्रद्देहमकर्मकं शयानो वीतनिद्रश्च नेहेतेंद्रियवानपि ४
मुनिः प्रसन्नगंभीरो दुर्विगाह्यो दुरत्ययः अनंतपारो ह्यक्षोभ्यः स्तिमितोद इवार्णवः ५

दर्शनादिव्यापारमपि निवारयति ४ समुद्राच्छिक्षितमाह मुनिरिति बहिः प्रसन्नश्चासावंतर्गंभीरश्च दु
र्विगाह्यः एवंभूत इति परिकलयितुमशक्यः लक्ष्याभिप्रायत्वात् दुरत्ययः अनतिक्रमणीयः तेजस्वित्वा
त् अनंतः पारः कालतो देशतश्चापरिच्छेद्यः स्वरूपाविर्भावात् अक्षोभ्यः अविकार्यः रागाद्यभावात् स्तिमि
तोदः निश्चलोदकोऽर्णवो यथा तद्वत्तैर्गुणैर्भवेदित्यर्थः ५

॥ तानावृत्तानपश्यन्नपिशिल्पजालेषु ७० ७१ दार्ष्टांतिकेयोजयति ७२ एवंगृहासक्तिस्थिरस्था
मप्यनर्थहेतुः मनुष्यस्यत्वतिनिंदितैवेत्याह यः प्राप्येति ॥७४॥ इति श्री एकादशे सप्तमः ॥७॥ अष्टमेज

सोहंशून्येगृहेदीनोमृतदारोमृतप्रजः जिजीविषेकिमर्थंवाविधुरोदुःखजीवितः ॥
तांस्तथैवावृतान्शिग्भिर्मृत्युग्रस्तान्विचेष्टतः स्वयंचकृपणःशिक्षुपश्यन्नप्यबुधोप
तत् ७० तंलब्ध्वालुब्धकःक्रूरःकपोतंगृहमेधिनं कपोतकान्कपोतींचसिद्धार्थःप्रय
यौगृहं ७१ एवंकुटुंब्यशांतात्माद्वंद्वारामःपतत्रिवत् पुष्णन्कुटुंबंकृपणःसानुबंधोव
सीदति ७२ यःप्राप्यमानुषंलोकंमुक्तिद्वारमपावृतं गृहेषुखगवत्सक्तस्तमारूढच्युत
विदुः ॥७३॥ इति श्रीमद्भागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्धवसंवादे सप्तमोध्या
यः ॥७॥ ब्राह्मण उवाच ॥ सुखमैंद्रियकंराजन्स्वर्गेनरकएवच देहिनांयद्यथादुःखंतस्मान्नेह
तद्बुधः ॥१

प्रसादिभ्योपिनवभ्यःशिक्षितहरिः अवधूतगिराप्राहविवेकायोद्धवंप्रति प्रा
रब्धकर्मभोगस्यावश्यंभावित्वात्तदर्थोद्यमेनोपयुक्तोयथाकर्तव्यः अजगराच्छिक्षितमाह सुखमित्यादि

ना यदैंद्रियकंसुखंतत्स्वर्गेनरकेचभवत्येव यथा
दुःखं तस्माद्बुधस्तन्नेच्छेत १

भा० ए० ४४ किंच अणुभ्यश्चेति १० द्विविधो मधुकृत् मधुकृतं तत्पुष्पादाच्छिद्य गृह्णातीति मधुकृद्भ्रमरः मधु
करोतीति आहारत्वेन स्वरूपेण चेति मक्षिका च तत्र प्रथमाच्छिक्षितमुक्तम् द्वितीयाच्छिक्षितमाह सा
यमिदं भोक्ष्यं श्वइदं भोक्ष्यतीति भिक्षितमन्नादि न संगृह्णीत किंतु पाणिपात्रस्तन्मात्रग्राही भवेत्र संग्र

अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्पदः १०
श्री सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षितं पाणिपात्रोदरामत्रो मक्षिकेव न संग्रही ११ सा
यंतनं श्वस्तनं वा न संगृह्णीत भिक्षुकः मक्षिका इव संगृह्णन्सह तेन विनश्यति १२
पदापि युवतीं भिक्षुर्न स्पृशेद्दारवीमपि स्पृशन्करीव बध्येत करिण्या अंगसंगतः १३
नाधिगच्छेत्स्त्रियं प्राज्ञः कर्हिचिन्मृत्युमात्मनः बलाधिकैः स हन्येत गजैरन्यैर्गजो यथा १४

ही तु मक्षिकेव न भवति न जीवतीत्यर्थः ११ एतद्विवृणोति पुनः सायंतनमिति १२ स्पर्शोशा
क्तिर्नाशहेतुरिति गजाच्छिक्षितमित्याह पदापीति पादेनापि दारवीं दारुमयीमपि गजो हि क
रिणीं प्रदर्श्य तृणादिपिहितगर्ते निपात्य बध्यते १३ किंच नाधिगच्छेदिति नोपगच्छेत् १४ ॥ ४४

किंच वर्षासु सरिद्भिः समृद्धोपि सागरो यथा नोत्सर्पेत ग्रीष्मे तहिर्हीनोपि न शुष्येत तथा समृद्धकामस्तुहि
हीनोवा न हृष्येत् न च शोचेदित्यर्थः अत्र हेतुः नारायणपरः न तु विषयपर इति ६ रूपगंधस्पर्शश
ब्दरसैः पंचभिर्विषयैर्मोहिताः पतंगमधुकरगजहरिणमीना हताः अतस्तधनासक्तौ पंचैते गुरवः
तदुक्तं पतंगमातंगकुरंगभृंगमीना हताः पंचभिरेव पंच एकः प्रमादी स कथं न हन्यते यः सेवते पं

समृद्धकामो हीनो वा नारायणपरो मुनिः नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः ६ ६
दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेंद्रियः प्रलोभितः पतत्यंधे तमस्यग्नौ पतंगवत् ७ योषि
द्धिरण्याभरणांबरादिद्रव्येषु मायारचितेषु मूढः प्रलोभितात्मा ह्युपभोगबुद्ध्या पतंगवन्न
श्यति नष्टदृष्टिः ८ स्तोकंस्तोकंग्रसेद्ग्रासं देहो वर्त्तेत यावता गृहानहिंसन्नातिष्ठेद्वृत्तिं माधु
करीं मुनिः ९

चभिरेव पंचेति तत्र रूपविलाससंमोहितो नश्यतीति पतंगाच्छिक्षितमाह दृष्ट्वेति स्वभावैः प्रलोभितः ७ स्त्रिय
मुपलक्षणीकृत्यैतत्प्रपंचयति योषिदिति ८ मधुकराच्छिक्षितमाह स्तोकमिति गृहान् गृहस्थान् अहिं
सन् अपीडयन् अयंभावः यथा मधुकरो विशिष्टगंधलोभेनैकस्मिन्नेव पद्मे वसन्नस्तसमये मुकुलिते तस्मि
न्बध्यते एवं मुनिरपि ग्रासलोभेनैकस्मेव गृहमाश्रि
तस्तस्मिन्नैव बध्यत इति ९

भा० ए० रसासक्तिर्नाशहेतुरिति मीनाच्छिक्षितमित्याह जिह्वयेति अतिप्रमाथिन्या अतिक्षोभिकया ऋच्छति प्राप्नोति
६५ वडिशेशामिषलिप्तैर्लोहकंटकैः १९ दुर्जयत्वमुपपादयति इंद्रियाणीति द्वाभ्यां अयं भावः यद्याहारं त्यज्य
ते तर्ह्यन्येंद्रियजयः केवलं भवति रसनेंद्रियं तु वर्द्धते यदि तु भुज्यते तर्हि पुनस्तु रसासक्त्या सर्वेन्द्रिय
क्षोभः स्यात् अतो रसासक्तिं परित्यज्यौषधवद्भुंजीतेति प्राणवृत्त्यैव संतुष्येदित्यत्रोक्तमपि रसनेस्या डि१

जिह्वयातिप्रमाथिन्या जनो रसविमोहितः मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु वडिशैर्यथा १९ इंद्रि
याणि जयंत्याशु निराहारा मनीषिणः वर्ज्जयित्वा तु रसनं तन्निरन्नस्य वर्द्धते २० तावज्जितें
द्रियो न स्याद्विजितान्येन्द्रियः पुमान् न जयेद्रसनं यावज्जितं सर्वं जिते रसे २१ पिंगला नाम
वेश्यासीद्विदेहनगरे पुरा तस्या मे शिक्षितं किंचिन्निबोध नृपनंदन २२ सा स्वैरिण्येकदा कां
तं संकेत उपनेष्यती अभूत्काले बहिर्द्वारि बिभ्रती रूपमुत्तमं २३ मार्ग आगच्छतो वीक्ष्य पुरुषा
न्पुरुषर्षभ तान्शुल्कदान्वित्तवतः कांतान्मेनेर्थकामुकी २४

त्ति दुर्जयत्वस्थापनायोच्यते इति विशेषः २० २१ पिंगलाया नैराश्यं शिक्षितमिति वक्तुं तदाख्यानमाह पिंगलेत्या
दिना मे मया शिक्षितं २२ स्वैरिणी कामचारिणी संकेते रतिस्थाने २३ तान् वित्तवतः सधनान् अत एव शुल्कदान्
मूल्यदान् कांतान् सुरताहीन् २४

त्यागभोगविहीनो धनसंचयः परमार्थीभवतीत्यत्र मधुहा गुरुरित्याह नदेयमिति तदन्यो बलवान्भुंक्ते
तदप्यन्यस्तस्मान्यः मधुहा मक्षिकाभिः संचितं मधु यथा भुंक्ते तद्वत् ननु सुगुप्तं धनं कथमन्यो ज्ञास्यति हरि
ष्यति चेति तत्राह अर्थविदिति लिंगैरर्थं तदुपायं च वेत्तीत्यर्थवित् यथा मधुहा तरुकोटरादिगतं मधु वेत्ति हर
ति च १५ स्वोद्यमं विनापि भोगः सभवतीत्यपि स एव गुरुरित्याह सुदुःखेति आशासानामिति वक्तव्ये वर्णा

नदेयंनोपभोग्यंचलुब्धैर्यद्दुःखसंचितं भुंक्तेतदपितच्चान्योमधुहेवार्थविन्मधु १५ सुदुः
खोपार्जितैर्वित्तैराशासानांगृहाशिषः मधुहेवाग्रतोभुंक्तेयतिर्वैगृहमेधिनां १६ ग्राम्य
ते ३ गीतंनशृणुयाद्यतिर्वनचरःक्वचित् शिक्षेतहरिणाद्बद्धान्मृगयोर्गीतमोहितात् १७ नृत्यवादि हि ३
त्रगीतानिजुषन्ग्राम्याणियोषिताम् आसांक्रीडनकोवश्यऋष्यशृंगोमृगीसुतः १८

लोपश्चार्षः यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ तयोरन्नमदत्त्वा तु भुक्त्वा चांद्रायणं चरेदिति गृही
णामावश्यकत्वेन विधानात् १६ हरिणाच्छिक्षितमाह ग्राम्येति भगवद्गीतं शृणुयादेव मृगयोर्लुब्धक
स्य १७ हरिणशब्दादेव हरिणीसुतः ऋष्यशृंगोऽपि गुरुर्ज्ञातव्य इत्याह नृत्येति वश्यो वश्यो भवेति शेषः १८

भा० ए०
९६

अतिविगर्ह्या विनिंद्याया या वार्त्ता जीविका तया कुतः सांकेत्येन या वृत्तिस्तया वहुव्रीहिणास्त्र विशेषणं वा परितापं प्रपंचयति स्त्रैणादिति स्त्रीलंपटात् अयच्च अर्थतृषः लुब्धात् अत एवानुशोच्यान्नरा त् याहं वित्तं रतिं चेच्छंतीति यावृथात्मा परितापितः केन वित्तमिच्छती तेन नरेण क्रीतेन स्वयं विक्रीतेनात्म नो देहेन ३१ अहो धिङ्मायाऽहमिति वीभत्सितं भजामीत्याह यदिति वंशोनाम स्थूणास्तु निहितास्तिर्यग्व

अहो मयात्मा परितापितो वृथा सांकेत्यवृत्त्याऽतिविगर्ह्यवार्त्तया स्त्रैणान्नराद्यार्थतृषोनुशो
च्यात्क्रीतेन वित्तं रतिमात्मनेच्छती ३१ यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचा रोमनखैः
पिनद्धं क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति काऽन्या ३२ विदेहानां पुरे ह्यस्मि
न्नहमेकैव मूढधीः याऽन्यमिच्छत्यसत्यस्मादात्मदात्काममच्युतात् ३३

णुः वंश्यास्तस्मिन्नुभयतो निहिता वंश्याः अस्थिभिरेव निर्मिता वंशादयो यस्मिंस्तत् तत्र पृष्ठे दीर्घमस्थि यत् स वंशः पार्श्वास्थीनि वंश्यानि स्थूणा हस्तपादास्थीनि तथा त्वचा रोमभिर्नखैश्च पिनद्धं छादितं तथापि क्ष रंति नवद्वाराणि यस्मिंस्तत् एवंभूतमगाररूपं नरशरीरमेतत् मत्तोऽन्या का वा कांतबुद्ध्योपैति सेवते ३२ सत्संगतोऽसत्यामप्यहो मम मोह इत्याह विदेहानामिति याहमसती अच्युतादन्यकामं भोगमिच्छती सा ३३

९६

अपिसंभावनायां अन्योऽपिमामुपैष्यतीत्येवदुराशयेत्यन्वयः द्वार्यवलंबमानापुनःप्रविशति ।
पुनर्निर्गच्छति एवंकुर्वतीनिशीथमङ्गात्त्रंप्राप २४ निर्विदत्त्रलंवृद्धिः वित्तचिंतयैवहेतुर्यस्यसः २६
यथायथावत् ममममंतःशृणु २७ ननुकिंनिर्विण्णयागीतश्रवणेन तत्राहियस्मात्पुरुषस्याशापाशानांनि

आभातेषुपयातेषुसासंकेतोपजीवना अप्यन्योवित्तवान्कोपिमामुपैष्यतिभूरिदः २५ ए
वंदुराशयाध्वस्तनिद्राद्वार्यवलंबिनी निर्गच्छतीप्रविशतीनिशीथंसमपद्यत २६ तस्या
वित्ताशयाशुष्यद्वक्त्रायादीनचेतसः निर्वेदपरमाजज्ञेचिंताहेतुःसुखावहः २६ तस्यानि
र्विण्णचित्तायागीतंशृणुयथामम २७ निर्वेदआशापाशानांपुरुषस्ययथाह्यसिः नह्यंगा
ज्ञातनिर्वेदोदेहबंधंजिहासति २८ पिंगलोवाच अहोमेमोहवितातिंपश्यताविजितात्म
नः याकांतादसतःकामंकामयेयेनवालिशा २९ संतंसमीपेरमणंरतिप्रदंवित्तप्रदंनित्यमिमंवि
हाय अकामदंदुःखभयाधिशोकमोहप्रदंतुच्छमहंभजेऽज्ञा ३०
र्वेदोऽसियथातथाप्युक्तं तत्रहेतुः नहीति अंगहेराजन् २८ अविजितात्मत्वेहेतुः याहंवालिशाविवेकशून्यात
स्मात्कुतःयेनकारणेन असतःतुच्छान्नरात्कामंकामये २९ वालिशत्वंप्रपंचयति संतमिति चतुर्भिः समीपे

मः अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ४

भा० ए० अतः तेन श्रीविष्णुना उपकृतं कृतमुपकारं निर्वेदलक्षणं ग्राम्येषु नरेषु विषयेषु वा संगताः ३८ कथं व्रजसीत
६७ दासं समुष्टेति ३९ ननु ब्रह्मादीन् हित्वा अमुनैवेति कोऽयं नियमस्तत्राह संसारेति मुषितेक्षणमपहृतेत्वविवे
कं ४० तर्हि किमात्मत्राणे साधिना भविष्यति न तत्र सर्वतो निर्विद्य भगवद्भजने प्रवृत्तस्य आत्मन एव स

तेनोपकृतमादाय शिरसा ग्राम्यसंगताः त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरं ३८ संतुष्टा
श्रद्दधत्येतद्यथालाभेन जीवती विहराम्यमुनैवाहमात्मना रमणेन वै ३९ संसारकूपे
पतितं विषयैर्मुषितेक्षणं ग्रस्तं कालाहिनात्मानं कोऽन्यस्त्रातुमधीश्वरः ४० आत्मैव ह्या
त्मनो गोप्ता निर्विद्येत यदाखिलात् ४१॥ ब्राह्मण उवाच ॥ एवं व्यवसितमतिर्दुराशां कां
ततर्षजां छित्त्वोपशममास्थाय शय्यामुपविवेश सा ॥४२॥ आशा हि परमं दुःखं नैराश्यं पर
मं सुखं यथा संछिद्य कान्ताशां सुखं सुष्वाप पिंगला ॥४३॥

मर्थत्वादित्याह आत्मैवेति यदा एवं जगत्पश्येत् ततश्चाप्रमत्तः सन्नखिलादिहामुत्रभोगान्निर्विद्येत तदा
हि आत्मैवात्मनो गोप्तेत्यन्वयः अतः केवलं प्रेम्णैव भजामीति भावः ४१ कांतस्य तर्षोऽभिलाषस्ततो जातां ४२
फलितमाह आशा हीति ४३

एवं निर्विण्णसती अतःपरमेवं करिष्यामीत्याह सुहृदिति अयमीश्वरः आत्मनैवात्मानमेव निवेद्य तं विक्रीय विशेषेण क्रीत्वा अनेनैव सह रमे रमा लक्ष्मीर्यथा ३४ अन्यस्यासेव्यत्वं दर्शयति कियदिति आद्यंतवंतो ये कामा विषयाः कामदा नरा वा देवा वा कालकलिताः भार्यायाः कियत्प्रियं कृतवंतः न किं

सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरिणां तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ३४
कियत्प्रियं ते व्यभजन्कामा ये कामदा नराः आद्यंतवंतो भार्याया देवा वा कालविद्रुताः
३५ नूनं मे भगवान्प्रीतो विष्णुः केनापि कर्मणा निर्वेदोऽयं दुराशाया यन्मे जातः सुखा
वहः ३६ मैवं स्युर्मंदभाग्यायाः क्लेशा निर्वेदहेतवः येनानुबंधं निर्हृत्य पुरुषः शममृ
च्छति ३७

चिदिति अतो नेहामुत्र च तद्व्यतिरिक्तः कोपि सेव्योस्तीत्यर्थः ३५ एवं निश्चित्य स्वभाग्यमभिनंदति दुष्टा आशा यस्यास्तस्या मे ३६ ननु धनाप्राप्त्या क्लिष्टासि कथं विष्णुप्रीतस्तत्राह मैवमिति मंदभाग्या चेदहं स्यां तर्ह्येवं निर्वेदहेतवः क्लेशा न स्युरित्यर्थः येन निर्वेदेन अनुबंधं गृहादिकं निर्हृत्य परित्यज्य ९८

भा०ए० कुमार्य्योः शिक्षितं वृत्तमाख्यायिकामाह क्वचिदित्यादिना वृणानान् स्ववरणायागतान् बंधुषु पित्रा
५८ दिषु ५ शंखाः शंखवलयाः महद्यथा भवति तथा स्वनं चक्रुः ६ सा महती बुद्धिमती तत्स्वयंशाल्यवह
ननं जुगुप्सितं दारिद्र्यद्योतकं एकैकशः क्रमेणैकमेकं बभंज करादपसारितवती ७ निरभिदत्

क्वचित्कुमारी त्वात्मानं वृणानान् गृहमागतान् स्वयं तानर्हयामास क्वापि यातेषु बंधु
षु ५ तेषामभ्यवहारार्थं शालीन्रहसि पार्थिव अवघ्नंत्याः प्रकोष्ठस्थाश्चक्रुः शंखाः
स्वनं महत् ६ सा तज्जुगुप्सितं मत्वा महती व्रीडिता ततः बभंजैकैकशः शंखान् द्वौ द्वौ
पाण्योरशेषयत् ७ उभयोरप्यभूद्घोषो ह्यवघ्नंत्याः स्म शंखयोः तत्राप्येकं निरभिदेक
स्मान्नाभवद्ध्वनिः ८ अन्वशिक्षमिमं तस्या उपदेशमरिंदम लोकाननुचरन्नेतांल्लो
कतत्त्वविवित्सया ९ वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि एक एव चरेत्तस्मात्कुमा
र्या इव कंकणः १०

पृथक्कृतवती ननु कुमार्य्याः स्तवकथं संगतिमित्राह
लोकानिति ९ वास इति प्रथमांतपाठे कलहः कलहे हेतुः वार्तागोष्ठी हेतुर्भवेदित्यर्थः १०

५८

इतिश्रीएकादशेष्टमः॥८॥नवमेकुररादिभ्योदेहतस्त्वोपशिक्षितं श्रुत्वायदुःकृतार्थोऽभूदितिअ
स्मिन्वर्ण्यते कुरराच्छिक्षितमाह परिग्रहोहीति यद्यत्प्रियतमंतस्यतस्यपरिग्रहः तद्विद्वानपरि
दुःखमितिविद्वान्सन् यस्त्वकिंचनः त्यक्तपरिग्रहः नतुदरिद्रः १ तदाह सामिषमिति॥२॥अमि

इतिश्रीमद्भागवतेमहापुराणेएकादशस्कंधेश्रीभगवदुद्धवसंवादेपिंगलोपाख्यानेऽष्
टमोध्यायः॥८॥ब्राह्मणउवाच॥परिग्रहोहिदुःखाययद्यत्प्रियतमंनृणां अनंतंसुखमा
प्नोतितद्विद्वान्यस्त्वकिंचनः १ सामिषंकुररंजघ्नुर्बलिनोयेनिरामिषाः तदामिषंपरि
त्यज्यससुखंसमविंदत २ नमेमानापमानौस्तोनचिंतागेहपुत्रिणां आत्मक्रीडआत्म
रतिर्विचरामीहबालवत् ३ द्वावेवचिंतयामुक्तौपरमानंदआप्लुतौ योविमुग्धोजडो
बालोयोगुणेभ्यःपरंगतः ४

कश्चित्ताभमाह नेतिद्वि गेहपुत्रिणां तद्दत्तीयाभवतिसाचिंताचमेना
स्ति आत्मनैवक्रीडायस्य आत्मनिरतिःप्रीतिर्यस्यसः ३ ननुवज्ञसर्वज्ञयोःकिंसादृश्यं नैश्चिंत्यंपर
मसुखमित्याह द्वाविति विमुग्धोऽज्ञःजडोऽनुद्यमः एवंभूतोयोबालः यश्चप्रकृतेःपरमीश्वरंप्राप्तः

४

भा० ए०
६९

सर्प्पाच्छिक्षितमाह एकचारीति योगी संसर्गस्यापि त्यागे कुमारी गुरुः जनसंगत्यागे सर्प्पः स यथा जनाच्छंक
मान एकाकी विचरति नियतनिकेतरहितश्च सदा अप्रमत्तश्च एकांतवासी च आचारैर्गतिभिः स विशेषानि
र्विशेषेणानिलक्ष्यते च असहायश्च मितभाषी च तद्वन्मुनिर्वर्त्तेतेत्यर्थः १४ किंच गृहारंभ इति अध्रुवात्म
नो नश्वरदेहस्य सुखं यथा भवति तथा वर्त्तेत १५ कारकसामग्रीनिरपेक्षात्केवलादीश्वरात् विश्वसृष्टिसं

एकचार्यनिकेतः स्यादप्रमत्तो गुहाशयः अलक्ष्यमाण आचारैर्मुनिरेकोल्पभाषणः १४
गृहारंभोतिदुःखाय विफलश्चाध्रुवात्मनः सर्प्पः परकृतं वेश्म प्रविश्य सुखमेधते १५
एको नारायणो देवः पूर्वसृष्टं स्वमायया संहृत्य कालकलया कल्पांत इदमीश्वरः ए
क एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः १६ कालेनात्मानुभावेन साम्यं नीतासु श
क्तिषु सत्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः ॥ ग्रासैकेनादिष्टं तेन मयासंभो विनाविति

सृष्टेः प्रथमं संहारप्रकारमाह एक इति सार्द्धत्रयेण एकः कारकनिरपेक्षः पूर्वसृष्टमिदं जगत् कालक
लया कालशक्त्या संहृत्य एक एवाद्वितीयः सजातीयविजातीयभेदशून्योऽभूत् १६ कारणभूतासु
सत्वादिषु शक्तिषु साम्यं नीतासु सतीषु गुणसाम्यं प्रधानं तदुपाधिः पुरुषः तयोरीश्वरः ॥ ७

६९

चित्तैकाग्रता हेतोरात्मस्फूर्तिलक्षणसमाधिहेतुरिति शरकारदृष्टान्तमाह मन इति तत्रोपायमाह जिते
ति आसनजये श्वासजयः तस्य च जये श्वासाधीनं मनो निश्चलं भवति ननु तत्क्षणं निश्चितं सदपि मनो विष
यवासनया पुनर्विक्षिप्यते सुषुप्ताविव सर्वं यालीयतत्वात्तदा किं तत्राह वैराग्येति वैराग्येण विक्षिप्यमा
णमभ्यासयोगेन लब्धं ध्रियमाणं स्थिरीक्रियमाणं ११ एकत्रेति कुत्र तदाह यस्मिन्निति यत्तत्पदवि

मन एकत्र संयुञ्ज्याज्जितश्वासो जितासनः वैराग्याभ्यासयोगेन ध्रियमाणमतन्द्रितः ११
यस्मिन्मनो लब्धपदं यदेतच्छनैः शनैर्मुंचति कर्मरेणून् सत्त्वेन वृद्धेन रजस्तमश्च विधू
यनिर्वाणमुपैत्यनिंधनं १२ तदेवमात्मन्यवरुद्धचित्तो न वेद किंचिद्बहिरंतरं वा यथेषुकारो
नृपतिं व्रजंतमिषौ गतात्मा न ददर्श पार्श्वे १३ क्षेपात्मकं मन एतद्यस्मिन्परमानंदरूपे भगवति लब्धा
स्पदं सत् कर्मरेणून् कर्मवासना मुंचति तस्मिन् ननु कर्मवासनात्यागोपि सुषुप्ताविव लयो दुर्वारः नेत्याह सत्त्वेनेति वृद्धे
न उपशमात्मकेन रजस्तमसोरभावे विक्षेपलययोरभावान्निर्वाणं शांतवृत्तिकं ध्येयाकारेणावस्थानमुपैति कुतः अ
निंधनं इंधनं गुणास्तत्कार्यं च तद्रहितं तदुक्तं योगशास्त्रे मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः याऽसंप्र
ज्ञातनामासौ समाधिरभिधीयत इति १२ ततश्च न द्वैतस्फूर्तिरित्याह तदेति बहिर्दर्शनादि अंतरं स्मृत्या इ

[illegible] ९८

भा० ११ भगवद्ध्यानपरायणोंतः तत्सारूप्यं न चित्रमिति पेशस्कृतो भ्रमरविशेषाज्ज्ञातमित्याह यत्र यत्रेति सकल
५० मेकाग्र्यं २१ कुड्यां प्रवेशितो निरुद्धः भयेन ध्यायन् सात्मतां तत्सारूप्यं साम्यतामितिपाठे तत्पर्यंता
पूर्वरूपमसंत्यजन्निति अयमभिप्रायः यदा तेनैव देहेनान्यसारूप्यं दृश्यते तदा किं वक्तव्यं देहांतरे
णसादृश्यं घटत इति २२ स्वदेहादपि शिक्षितमाह स्वात्मेति स्वात्मनो देहाच्छिक्षितां २३ गुरुत्वे

यत्रयत्र मनो देही धारयेत्सकलं धिया स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्स्वरूपतां २१ कीटः
ते२ पेशस्कृतं ध्यायन्कुड्यां तेन प्रवेशितः याति तत्सात्मतां राजन् पूर्वरूपमसंत्यजन् २२ एवं गुरु
भ्य एतेभ्य एषा मे शिक्षिता मतिः स्वात्मोपशिक्षितां बुद्धिं शृणु मे वदतः प्रभो २३ देहो गुरुर्म
म विरक्तिविवेकहेतुर्बिभ्रत्स्म सत्त्वनिधनं सततार्त्युदर्कम् तत्त्वान्यनेन विमृशामि यथा तथापि
पारक्यमित्यवसितो विचराम्यसंगः २४

तुः विरक्तिविवेकयोर्हेतुः विरक्तिहेतुत्वमाह सत्त्वनिधनमुत्पत्तिविनाशौ बिभ्रत्स्म किंच सततं आर्त्यु
दर्कं दुःखमेवोत्तरं फलं बिभ्रत् यद्वा सततार्तिरेवोत्तरं फलं यस्य तत् सत्त्वनिधनं बिभ्रत् विवेकहेतुत्व
मा तत्त्वानीति यथायथावत् एवमत्युपकारित्वेपि देहे नैवास्थाकर्तव्येत्याह तथापीति पारक्यं सृगा
लादिभक्ष्यमिति निश्चितवान् २४ रामरामराम ॥ ११ ॥ ७ ॥ ११ रामरामराम ॥

५०

परावराणांपरेब्रह्मादयः अवरेऽन्येचमुक्ताजीवास्तेषांपरमःप्राप्यआस्ते कुतः कैवल्यसंज्ञितः मोक्षशब्दाभि-
धेयः तत्रहेतुः केवलेति निर्विशेषः स्वप्रकाशः आनंदानांसंदोहःसमूहःपरमानंदइत्यर्थः कुतःनिरुपा-
धिकः १७ ततःकेवलादेवसृष्टिंदर्शयति केवलेनात्मानुभवेनकालेन सूत्रंक्रियाशक्तिप्रधानंमहत्तत्वं
सृजति जीवसंसारहेतुभूतेसूत्रेसृष्टेपित्वंमाभैरितिसंबोधयति अरिंदमअरीन्रागादीन्दमयितुं

परावराणांपरमआस्तेकैवल्यसंज्ञितः केवलानुभवानंदसंदोहोनिरुपाधिकः १७ केवला-
त्मानुभावेनस्वमायांत्रिगुणात्मिकां संक्षोभयन्सृजत्यादौतयासूत्रमरिंदम १८ तमाहुस्त्रि-
गुणव्यक्तिंसृजंतींविश्वतोमुखं यस्मिन्प्रोतमिदंविश्वंयेनसंसरतेपुमान् १९ यथोर्णनाभिर्हृ-
दयादूर्णांसंतत्यवक्त्रतः तयाविहृत्यभूयस्तांग्रसत्येवंमहेश्वरः २०

समर्थ १८ सूत्रस्यक्रियाशक्तित्वेनोच्यमानस्यतामितिस्त्रीलिंगेनपरामर्शः त्रिगुणव्यक्तिंगुणत्रयस्यका-
र्यं अतएवविश्वतोमुखं नानाविधंत्रिगुणात्मकंविश्वमहंकारद्वारेणसृजंतीं त्रिगुणकार्यस्यसूत्रसंज्ञा-
याकारणमाह यस्मिन्निति कारणभूतेसमष्टिरूपेयस्मिन्निदंविश्वंप्रोतंग्रथितं वायुर्वैगौतमतत्सूत्रंवायु-
नावैगौतमसूत्रेणायंचलोकःपरश्चलोकःसर्वाणिभूतानिवसंदधातीतिश्रुतेः येनवाह्यात्मरूपेणप्राणेनजी-
वःसंसरति १९ तदेवंस्थितिमर्थमुक्त्वादृष्टांतमाह यथेति हृदयादूर्णांवक्त्रतःवक्त्रेणसंतत्यप्रसार्य

भा० ए० ततदेवं देहदेहोगुरुरित्यादि त्रिभिर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्य देहस्यातिदुर्लभत्वं दर्शयन्नी
५१ श्वरनिष्ठां विधत्ते सृष्ट्वेति द्वाभ्यां पुराणि शरीराणि पुरुषं पुरुषदेहं ब्रह्मणं वलोकधिय अपुरोक्षाय
धिषणं बुद्धिर्यस्मिंस्तं तदुक्तं तास्मै पोरुषी प्रियेति श्रुतिश्च पुरुषत्वे चाविस्तरामात्मेत्यादि ईश्वरो हि क
रणाधिष्ठात्रीरग्न्यादिदेवता वागादिभिः स्वरूपं सृष्टवान् ताश्च तं प्रति भोगार्थं शरीरमयाचंत स च ताभ्यो
गोशरीरं अश्वशरीरं पुरुषशरीरं यथाक्रममानीतवान् ततस्ता देवताः सोब्रवीत् यथायतनं च चक्षुरादिस्थान

सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान् तैस्तैरतुष्ट
हृदयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः २७ लब्ध्वा सुदुर्लभमिदं बहुसंभ
वांते मानुष्यमर्थदमनित्यमपीह धीरः तूर्णं यतेत न पतेदनुमृत्यु यावन्निःश्रेयसाय वि
षयः खलु सर्वतः स्यात् २८

मस्मिन्देहे प्रविशतेति तदाह ताभ्य इत्यादि तथा तो भ्यो गामानयत्ता अब्रुव
न्न वै नो यमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोयमलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन्सु
कृतं वतेति च २७ तस्माद्बहूनां संभवानां जन्मनामंते मानुष्यमनित्यमप्यर्थदं पुरुषार्थप्रापकं देवा
त्लब्ध्वा इदमनु मृत्यु अनुनिरंतरं मृत्युर्वा यस्य तत् यावन्न पतेत्तावदेव तूर्णं शीघ्रं निःश्रेयसाय यतेत वि
षयः पुनः सर्वतः पश्वादियोनिष्वपि स्यादेव २८

सततात्र्युदर्कंतांप्रपंचयति जायेति द्वाभ्यां मस्यदेहस्य प्रियचिकीर्षया भोगसंपादनेछया जायादिवर्गा
न्वितन्वन् पुष्णाति पुरुषः कथंभूतः सकृच्छ्रं यथा भवति तथाऽवरुद्धानि संचितानि धनानि येन सः दे
हविशेषणं वा स देहः स्वांते स्वस्यामृत्योऽंते अवसीदति नश्यति किंच देहनाशेऽपि न दुःखसमाप्तिरित्या
ह अस्य पुरुषस्य देहांतरबीजं कर्म्म संसृष्ट्वेति वृक्षस्येव धर्मो यस्य सः २५ किंच जिह्वेति अमुं देहं त

जायात्मजार्थपशुभृत्यगृहाप्तवर्गान् पुष्णाति यत्प्रियचिकीर्षया वितन्वन् स्वांते
सकृच्छ्रमवरुद्धधनः स देहः सृष्ट्वाऽस्य बीजमवसीदति वृक्षधर्मः २५ जिह्वैकतो
ऽमुमपकर्षति कर्हि तर्षा शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् घ्राणोऽन्यतश्चपल
दृक् क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति २६

द्भिमानिनं पुरुषं वा एकतः रसप्रति जिह्वा आकर्षति आच्छिनत्ति कर्हि कदाचित्तर्षा पिपासा जलं प्रति
शिश्नो व्यवायं प्रति त्वक् स्पर्शं प्रति उदरमन्नमात्रं प्रति श्रवणं शब्दमात्रं प्रति घ्राणो गंधं प्र चपलदृ
क् रूपं प्रति क्व च कदाचित् स्वस्वविषयं प्रति कर्मशक्तिरन्यदपि कर्मेंद्रियं लुनंति त्रोटयंति २६

भा० ए०
५२

पृथ्व्यादयो मताः तद्वांतरभेदस्तु तत्र तत्र स्फुटीकृतः अध्यायत्रितये चाष्टनवाष्टावीरिताः क्रमात् ३२
इति श्रीएकादशे नवमः ॥ ९ ॥ वक्तुर्विशुद्धिगुर्वाख्या लब्धसंभावना भुवः उद्धवस्यात्मतत्त्वाप्त्यै साधनोक्ति
रतः परः दशमे देहसंबंधात्संसृतिर्नात्मनः स्वतः इत्येतद्दर्शयामास मतांतरनिरासतः तदेवमन्वय
व्यतिरेकाभ्यामुत्पन्नविवेकज्ञानस्य तत्त्वज्ञानायादित आरभ्य साधनान्युपदिशति भगवान् मयेति

इति श्रीमद्भागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्धवसंवादे अवधूतगीतं नवमोऽध्यायः
॥ ९ ॥ श्रीभगवानुवाच ॥ मयोदितेष्ववहितः स्वधर्मेषु मदाश्रयः वर्णाश्रमकुलाचारमका
मात्मा समाचरेत् ॥ १ ॥ अन्वीक्षेत विशुद्धात्मा देहिनां विषयात्मनां गुणेषु तत्त्वध्यानेन
सर्वारंभविपर्ययम् २

ति मया पंचरात्राद्युक्तेषु स्वधर्मेष्ववहितोऽप्रमत्तः सन् तदविरोधेन वर्णाद्याचारमनुतिष्ठेत्
कथमकामात्मता संभवति तत्राह अन्वीक्षेतेति स्वधर्मैर्विशुद्धचित्तः सन् देहिनां विषुसत्त्य
त्वाभिनिवेशेन ये सर्वे आरंभास्तेषां फलवैपरीत्यं पश्येत् एवं फलवैपरीत्यादकामः स्यात् २ ॥ ss

तदेवं हेयोपादेयविवेकं बहुधा निरूप्येदानीं यदुक्तं त्वं तु कल्यः कविर्दक्ष इत्यादि तत्रोत्तरमाह एवमिति
एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टज्ञानमेवालोकः प्रदीपो यस्य सः सम्यगन्यं त्वा आत्मविशेषणं आ
त्मनि स्थित एव महीं विचरामि २९ ननु किं बहुभिर्गुरुभिः न हि स्वैतके हेतुर्भगवत्प्रभुरेवेव ह वा गुरव आश्रिताः
तत्राह न ह्येकस्मादिति बहुधा सप्रपंचनिष्प्रपंचभेदाभेदादिभिः अयं भावः नैते परमार्थोपदेशगु

एवं संजातवैराग्यो विज्ञानालोक आत्मनि विचरामि महीमेतां मुक्तसंगोऽनहंकृतिः २९ न
५२ ह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलं ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः ३० श्रीभ
गवानुवाच ॥ इत्युक्त्वा स यदुं विप्रस्तमामंत्र्य गभीरधीः वंदितोऽभ्यर्चितो राज्ञा ययौ प्रीतो यथा
गतं ३१ अवधूतवचः श्रुत्वा पूर्वेषां नः स पूर्वजः सर्वसंगविनिर्मुक्तः समचित्तो बभूव ह ३२

रवः किं त्वन्वयव्यतिरेकाभ्यामात्मन्यसंभावनादिमात्रनिवर्तकाः तेषां च बहुत्वं युक्तमेवेति ज्ञानप्रदं गुरुमेक
मेवाश्रयेदिति मे दाभिज्ञे गुरुं शांतमुपासीतेति उक्तं च तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तममित्यादि ३० विप्रो दत्ता
त्रेयः योगहिमापुरनर्यो यदुर्हैहयाद्या इत्युक्तत्वात् यथागतं तथैव यथाहच्छया यथाविव्यर्थः ३१ भवान्स्वीयंख
यातिकुलमिति श्लाघते नः पूर्वेषां ३२ अथ संग्रहश्लोकः कपोतमीनहरिणकुमारीभाजपन्नगाः पतंगकु

रङ्ख्याःषोढा हेयार्थे गुरवो मताः मधुकृन्मधुहन्ता च
पिंगला चहै पास्त्रयः उपादेयार्थे विज्ञाने शेषाः

भा० ए० ननु स्वजायादिषु कथं निर्ममः स्यात् तत्राह जायेति औदासीन्ये हेतुं विवेकं दर्शयति आत्मनोऽर्थप्रयोजनं
५३ सर्वत्र सममिव पश्यन्निति अयं भावः सर्वदेहेष्वात्मन एकत्वात् जायादिदेहेऽन्यस्मिंश्च देहे आत्मनोऽर्थः सु
खादिः सम एव केन विशेषेणैतेष्वेव ममत्वाभिनिवेशमुदासीनः सन् गुरुं प्रपद्येतेति ६ अहो कोऽसौ देहव्यतिरि
क्त आत्मा यस्यैक्यादर्थः सर्वेषु समः स्यात् तमाह विलक्षण इति स्थूलसूक्ष्माद्देहद्वयादात्मा अन्यः अतो विलक्षणः द्वि

जायाऽपत्यगृहक्षेत्रस्वजनद्रविणादिषु उदासीनः समं पश्यन्सर्वेष्वर्थमिवात्मनः ६ विलक्ष
णः स्थूलसूक्ष्माद्देहादात्मेक्षिता स्वदृक् यथाग्निर्दारुणो दाह्याद्दाहकोऽन्यः प्रकाशकः ७ नि
रोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान्गुणान् अन्तःप्रविष्ट आधत्ते एवं देहगुणान्परः ८ ॥

धा वैलक्षण्यं दर्शयति ईक्षिता स्वदृगिति द्रष्टा हि दृश्याद्विलक्षणः स्वप्रकाशश्च जडाद्विलक्षणः वि
लक्षणयोरन्यत्वे दृष्टान्तः यथाग्निर्दाहकः प्रकाशकश्च दाह्यात्प्रकाश्याच्च दारुणः काष्ठादन्यस्तद्वदि
ति ७ अनेनैव दृष्टान्तेन नित्यत्वानादित्वविभुत्वैकत्वादयोऽपि सिद्धा इत्याह निरोधेति यथा दारुष्वन्तः
प्रविष्टोऽग्निस्तत्कृतान्नाशादीन्प्राप्नोति न तु स्वतो नाशादिमान् एवं देहगुणाननित्यत्वादीन्देहात्परो नि
त्यादिस्वरूपोऽप्यात्मानुभवति ततश्चानित्यत्वादिभिरपि विलक्षणादन्यत्वमिति भावः ८ रामराम राम ५३

किंच काम्यविषयाणांमिथ्यात्वादपीत्याह सुप्तस्येति विफलोऽर्थशून्यः अत्रैवंप्रयोगः इंद्रियैर्बहिर्नानाबु
द्धिःसाविफलानानात्मकत्वादैंद्रियकत्वाच्च मनोजन्यस्वप्नमनोरथवदिति ३ मोक्षार्थिनप्रवर्तेत तत्र
काम्यनिषिद्धयोःनित्यनैमित्तिकेकुर्यात्प्रत्यवायजिहासयेतिस्मृतेः अतःप्रवृत्तंकाम्यंकर्मत्यजेन्निवृत्तं
नित्यनैमित्तिकमेवकुर्यात् आत्मविचारेतुसम्यक्प्रवृत्तोनिवृत्तकर्मचोदनामपिनाद्रियेत ४ किंतुय

सुप्तस्यविषयालोकोध्यायतोवामनोरथः नानात्मकत्वाद्विफलस्तथाभेदात्मधीर्गुणैः ३
निवृत्तंकर्मसेवेतप्रवृत्तंमत्परस्त्यजेत् जिज्ञासायांसंप्रवृत्तोनाद्रियेत्कर्मचोदनां ४ यमान
भीक्ष्णंसेवेतनियमान्मत्परःक्वचि ५ मदभिज्ञंगुरुंशांतमुपासीतमदात्मकं अमान्य
मत्सरोदक्षोनिर्ममोदृढसौहृदः असत्वरोऽर्थजिज्ञासुरनसूयुरमोघवाक् ०

मानहिंसादीन् अभीक्ष्णमादरेणसेवेत शौचादींस्तुनियमान्क्वचित् यदाशक्तिः तदा आत्मज्ञानाविरोधेन
यमान्द्वादशनियमांश्चैकोनविंशेऽध्यायेवक्ष्यति ५ किंच यमेष्वप्यादरंपरित्यज्यगुरुमुपासीतेत्याह म
दभिज्ञमिति मदात्मकं मद्रूपंगुरुंसेवकस्यधर्मानाह अमानीति दक्षःअनलसः निर्ममजायादिषुममताशून्यः
गुरौतुदृढसौहृदः असत्वरःअव्यग्रः अमोघवाक् वृथालापरहितः एतान्येवशिष्यस्यलक्षणानिचज्ञेयानि ०

भा० ए० अग्निसादृश्यमेवाह वैशारदीति विशारदोऽतिनिपुणस्तेन शिष्येण प्राप्ता तेन गुरुणोपदिष्टा वा अतिशुद्धा बुद्धिः
५४ गुणकार्य्यरूपां मायां निवर्त्तयति यदात्ममेतद्धि त्वं जीवस्य संसृतिनिमित्तं तान् गुणांश्च दग्ध्वा असमिन्निरिं
धनः तस्मात्कार्य्येण कारणेन विद्यया च व्यवधानाभावात्साक्षात्परमानंदरूपो भवतीति १२ एवं तावत्तत्त्वप्रका
शात्तानस्वरूपो नित्य एक एवात्मा कर्त्तृत्वादयश्च धर्मास्तस्य देहोपाधिकाः तद्व्यतिरिक्तं च सर्वमनित्यं मा

९१ वैशारदी सातिविशुद्धबुद्धिर्धुनोति मायां गुणसंप्रसूतां गुणांश्च संदह्य यदात्ममेतत्स्वयं च
शाम्यत्यसमिद्यथाग्निः १२ अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः नानात्वमथ नि
त्यत्वं लोककालागमात्मनां मन्यसे सर्वभावानां संस्था ह्यौत्पत्तिकी यथा तत्तदाकृतिभेदेन जा
यते भिद्यते च धीः १३

यामान्तं च अतः सर्वतो विरक्तः सन् आत्मज्ञानेन मुच्यत इत्युक्तं विलक्षणः स्थूलसूक्ष्मादित्यादिना तदेवं श्रुतिसमन्व
येन निर्णीते प्यर्थे मतान्तरविरोधेन संदेहो मा भूदिति तन्मतं निराकर्त्तुं मङ्गलयति. अथेति अथ मन्यसे एषां जी
वात्मनां कर्मकर्त्तॄणां सुखदुःखयोर्भोक्तॄणां च नानात्वमिति एवं हि जैमिनीया मन्यन्ते अहंप्रत्ययविज्ञेय एवात्मा
स च प्रतिशरीरं भिन्नः कर्त्ता भोक्ता रूपश्च न तु तत्त्वेश्वररूपम्प्रेत्य निर्विकार एकः परमात्मास्तीति यथाहुः अहंप्रत्यय
विज्ञेयात्मा तथ्यः सर्वदेव हीति तथा वैराग्यं च न संभवति तथा हि भोगस्यानानामनित्यत्वाद्वैराग्यं भवेत् भोगकाल ५४

नन्वग्नेर्दाहसंयोगात्तद्धर्मभाक्त्वं घटते आत्मनस्त्वसंगत्वात्कथं देहेन तद्धर्मैर्वा संबंधः संबंधे वा कुतस्तन्निव
त्तिस्तत्राह योसाविति पुरुषस्येश्वरस्याधीनैर्मायागुणैर्यो सौ सूक्ष्मः अयं च स्थूलो देहो विरचितः पुंसो जीवस्या
यं संसारस्तन्निबंधनस्तदध्यासकृतः हि यस्मादेवं तस्मादात्मविद्या तन्निवर्त्तिकेत्याह आत्मनो विद्या विज्ञानं त
तस्याछित्छेत्त्री आछिदिति वा पदच्छेदः ९ यस्मादेवं तस्माज्जिज्ञासया विचारेण आत्मस्थमात्मनि कार्य्यको

योऽसौ गुणैर्विरचितो देहोऽयं पुरुषस्य हि संसारस्तन्निबंधोऽयं पुंसो विद्याच्छिदात्मनः ९ त
स्माज्जिज्ञासयात्मानमात्मस्थं केवलं परं संगम्य निरसेद्देहे वस्तुबुद्धिं यथाक्रमं १० आचा
र्य्योऽरणिराद्यः स्यादंतेवास्युत्तरारणिः तत्संधानं प्रवचनं विद्यासंधिः सुखावहः ११ ॥

रणसंघात एव स्थितं सम्यक्कृत्वा ज्ञात्वा एतस्मिन्देहादौ वस्तुबुद्धिं स्थूलसूक्ष्मक्रमेण निरसेत्त्यजेत् १०
गुरोर्लभ्या विद्या सा ऽविद्या तत्कार्य्यनिरसनहेतुरिति स्फुटीकर्तुं विद्योत्पत्तिमग्न्युत्पत्तिरूपकेण निरूपय
ति आचार्य इति आद्यः अधरस्तत्संधाने तयोर्मध्यममंथनकाष्ठं प्रवचनमुपदेशः विद्या हेतुसंधिः संधौ
भवन्त्यग्निरिव तथा च श्रुतिः आचार्य्यः पूर्वरूपमंतेवास्युत्तररूपं विद्या संधिः प्रवचनं संधानमिति ११

भा० ए०
५५

न नु ये सम्यक् कर्म कर्तुं जानंति ते तु सुखिन एव ये तु न जानंति त एव दुःखिन इति चेत्तत्राह नेति। विदुषामपि क्वचित्सु
खं न विद्यते अतो वयं कर्मकुशलत्वात्सुखिन इति तेषां केवलं वृथैवाहंकार इत्यर्थः १६ अपीहेत्याह यदीति
तियोगमुपायं न विदुर्यथा साक्षान्मृत्युर्न भवेत् १७ तथापि यावज्जीवं सुखं भविष्यतीति चेन्नेत्याह कोन्विति
यतोऽतिके वर्त्तमानमृत्युर्नेह तुष्टिं ददाति आघातं वधस्थानं १८ एवमस्मिंल्लोके सुखं नास्तीति उक्ते लोकांत

न देहिनां सुखं किंचिद्विद्यते विदुषामपि तथा च दुःखं मूढानां वृथाहंकरणं परं १६ यदि प्रा
प्तिं विघातं च जानंति सुखदुःखयोः तेप्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद्यथा १७ कोन्वर्थः सु
खयत्येनं कामो वा मृत्युरंतिके आघातं नीयमानस्य वध्यस्येव न तुष्टिदः १८ श्रुतं च दृष्ट
वद्दुष्टं स्पर्द्धासूयात्ययव्ययैः वह्वंतरायकामत्वात्कृषिवच्चापि निष्फलम् १९

रेपि तथैवेत्याह श्रुतमिति श्रुतं स्वर्गादि तदपि दुष्टं स्पर्द्धा परसुखासहनं असूया परगुणे दोषाविष्करणं
अत्ययो नाशः व्ययोऽपक्षयः तैर्दुष्टं यद्वा व्ययो नाशः अत्ययोऽन्यस्यातिशयः तं दृष्ट्वा तदप्राप्त्या दुःखमित्य
र्थः किंच वहवोऽन्तराया वैगुण्यादिरूपा विघ्ना यस्मिन् कामे सुखे तस्य भावस्तत्त्वं तस्मात् कृषिर्यथा वह्वविघ्ना
तद्वत् वह्वसुखत्वेन श्रुतमपि निष्फलम् १९

स्यवात्तदुपायकर्म्मबोधकागमस्यवाभोक्तुरात्मनोवा नत्वेतदस्तीत्याह अथनित्यत्वंलोककालागमात्मना मन्यसइति
नचभोग्यानांविछेदान्मायामयत्वाद्वैराग्यंस्यादित्याह सर्वभावानांस्वकृतंचदनादीनांसंस्थास्थिति औत्पत्तिकीप्रवाह
रूपेणनित्या तथाचवदंति नकदाचिदनीदृशंजगदितिअतएवकर्त्ताकश्चिदीश्वरोपिनास्तीतिभावः किंच यथा
यथावत् नतुमायामयीत्यर्थः नचात्मस्वरूपभूतंनित्यमेकंज्ञानमस्तीत्याह तत्तदिति घटपटाद्याकारभेदेनाभि
ज्ञायते अतोऽनित्याभिद्यतेच अयंभावोभिप्रायः नहिनित्यज्ञानरूपआत्मा अपितुज्ञानपरिणामवान् नचैवंविका

एवमप्यंगसर्वेषांदेहिनांदेहयोगतः कालावयवतःसंतिभावाजन्मादयोऽसकृत् १४ अ
त्रापिकर्मणांकर्त्तुरस्वातंत्र्यंचलक्ष्यते भोक्तुश्चदुःखसुखयोःकोन्वर्थोविवशंभजेत् १५

रित्वेनानित्यत्वप्रसंगः यथाहुः विक्रियाज्ञानरूपस्यननित्यत्वेविरुध्यतेइति अतोमुक्ताविंद्रियादिराहि
तस्यपरिणामासंभवात् जडत्वेनतत्प्राप्तेरपुरुषार्थत्वात्प्रवृत्तिरेवश्रेयसीननिवृत्तिरिति १३ तत्रतावत्तदुक्तमै
हिकत्वेनवैराग्योपपादनायप्रवृत्तिमार्गस्यानर्थहेतुत्वंप्रपंचयति एवमित्यादिनालोकपालानामित्यतःप्राक्त
नेनग्रंथेन अंगहेउद्धव कालावयवतः संवत्सरादिरूपात् १४ अत्रापीति स्वातंत्र्यवत्त्वेहेतुकर्मणोदुःखभो
गस्यचासंभवादित्यर्थः १५ ॥

भा॰ ए॰ ५६

किंच दुष्टजनप्रलोभितो धनाद्यर्थं पशून्विधिना हत्वा तमः स्थावरत्वं याति २५ एवं कर्मसु प्रवृत्तस्य न सुखं न च दुःखस्य निवृत्तिरित्युपसंहरति कर्माणीति २६ तथापि लोकानां नित्यत्वादमर्त्यधर्मत्वाच्च लोकपालानां सुखमस्तीति चेत्तत्राह लोकानामिति द्विपरार्द्धं परमायुर्यस्य तस्य ब्रह्मणोपि तथा च श्रुतिः भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति अतः प्रवृत्तिमार्गस्यै

पशून्विधिनालभ्य प्रेतभूतगणान्यजन् नरकानवशो जंतुर्गत्वा यात्युल्बणं तमः
२५ कर्माणि दुःखोदर्काणि कुर्वन्देहेन तैः पुनः देहमाभजते तत्र किं सुखं मर्त्यधर्मि
णः २६ लोकानां लोकपालानां मद्भयं कल्पजीविनां ब्रह्मणोपि भयं मत्तो द्विपरार्द्धपरायुषः
२७ गुणाः सृजंति कर्माणि गुणोऽनुसृजते गुणान् जीवस्तु गुणसंयुक्तो भुंक्ते कर्मफलान्य सौ २८

वमनर्थहेतुत्वात् विरक्तः स्यात्ततो निवृत्तिरेव युक्तेति तात्पर्यार्थः २७ एतेनैव स्वरूपमीश्वरत्वाव कारेणास्य रागाद्यंगीकारः परित्यक्तः अन्यदपि द्राक्पूर्वमंगीकृतं निराकरोति चतुर्भिः तत्र यदुक्तं कर्तृत्वभोक्तृत्वरूप एवात्मेति तन्निराकरोति गुणा इति गुणा इंद्रियाणि कर्माणि सृजंति न चात्मा आत्मैवेंद्रियाणि प्रवर्तयन् कर्म करोतीति चेन्नेत्याह गुण इति गुणः सत्वादिः गुणानिंद्रियाणि अनुसृजते प्रवर्तयति नत्वात्मा अतः कर्तृत्वं तावन्नास्ति भोक्तृत्वमप्यौपाधिकमित्याह जीवस्त्विति गुणसंयुक्तः कुत इत्यत आह असौ ते

५६

विघ्नैर्गुण्याद्यभावमंगीकृत्यापि नाशदुःखं दुष्परिहारमित्याह अंतरायैरिति पंचभिः निर्जितं साधितं २० य
स्मै देवता इंद्रादिरूपा इष्टा २१ स्वपुण्येन रूपचिते सर्वभोगसंपन्ने देवीनां मध्ये विहरन् गंधर्वैरुपगीयते २२ कामे
न इच्छया गच्छता विमानेन किंकिणीजालमालिना क्षुद्रघंटिकासमूहशोभिना सहस्त्रीभिः सुराक्रीडेषु नंदना

अंतरायैरविहतो यदि धर्मः स्वनुष्ठितः तेनापि निर्जितं स्थानं यथा गच्छति तच्छृणु २० इष्टे
ह देवतायज्ञैः स्वर्लोकं याति याज्ञिकः भुंजीत देववत्तत्र भोगान्दिव्यान्निजार्जितान् २१ स्वपुण्यो
पचिते शुभ्रे विमान उपगीयते गंधर्वैर्विहरन्मध्ये देवीनां हृद्यवेषधृक् २२ स्त्रीभिः कामगया
नेन किंकिणीजालमालिना क्रीडन्न वेदात्मपातं सुराक्रीडेन निर्वृतः २३ तावत्प्रमोदते स्वर्गे
यावत्पुण्यं समाप्यते क्षीणपुण्यः पतत्यर्वागनिच्छन्कालचालितः २४ यद्यधर्मरतः संगाद
सतां वाजितेंद्रियः कामात्मा कृपणो लुब्धः स्त्रैणो भूतविहिंसकः ०

दिक्षु क्रीडन्नात्मपातं न वेद २३ कालेन चालिताः पातिताः प्रवृत्तिर्हि द्विविधा विध्यनुसारेण काम्यकर्मलि
बा तत्र रुचेनाधर्मेण वा काम्यकर्मप्रवृत्तेर्गतिरुक्ता २४ अधर्मप्रवृत्तेर्गतिमाह यदीति यदि वेत्यन्वयः यजि
तेंद्रियत्वात्कामात्मा अतः कृपणः अतो लुब्धो भोगतृष्णाकुलः अतः स्त्रैणः स्त्रीलंपटः तदर्थं भूतहिंसकः ०

भा० ए०
५७

यदित्तुसत्त्वेवगुणेषुनदहंकारेणवध्यते ॥ तन्निवृत्त्याचतेइतिमतं नहिकथंस्यात्तस्यमितिएच्छति ॥ वद्धमुक्तो
वाकेथंवर्त्ततेत्यादि ॥ किंभुञ्जीत ॥ कथंभुञ्जीतइत्यर्थः ॥ ३५ ॥ एतत्तुएतद्विषयम् ॥ प्रश्नं ॥ किंच ॥ एकएवात्मादि
गुणसंबंधान्नित्यवद्धः ॥ मुक्तेऽन्यत्वेऽनित्यत्वप्रसंगान्नित्यमुक्तइत्यंगीकार्य्यंस्यात् ॥ अत्रमेभ्रमोभव
तीत्याह ॥ वद्धइति ॥ ३६ ॥ इतिएकादशेदशमः ॥ १० ॥ एकादशेतुवद्धानांमुक्तानांचायलक्षणम् ॥ साधनंचतथा
भक्तेर्लक्षणंहरिरेणरितं नित्यवद्धोनित्यमुक्तएकमेवेतिभेभ्रमइतियदुक्तंतत्रकिंवस्तुतोविरोधःप्रतीतोवा ॥
कथंवर्त्तेतविहरेत्कैर्वाज्ञायेतलक्षणैः ॥ किंभुञ्जीतोतविसृजेच्छयीतासीतयातिवा ॥ ३५ ॥ एत
दच्युतमेब्रूहिप्रश्नंप्रश्नविदांवर ॥ नित्यमुक्तोनित्यवद्धएकएवेतिमेभ्रमः ॥ ३६ ॥ इतिश्रीम
द्भागवतेमहापुराणेएकादशस्कंधेश्रीभगवदुद्धवसंवादेदशमोध्यायः ॥ १० ॥ श्रीभगवानुवाच ॥
वद्धोमुक्तइतिव्याख्यागुणतोमेनवस्तुतः ॥ गुणस्यमायामूलत्वान्नमेमोक्षोनवंधनम् ॥ १ ॥
नाद्यःवंधमोक्षयोर्वास्तवत्वाभावादित्याह ॥ वद्धमुक्तइतिद्वाभ्यां ॥ आत्मावद्धोमुक्तश्चमेगुणतः ॥ मदधीनसत्त्वादि
गुणोपाधितः ॥ नतुवस्तुतः ॥ नह्यौपाधिकत्वेपितदुलपाकादिवद्वास्तवत्वंकिंनस्यात्तत्राह ॥ गुणस्यमायामूलत्वादंधो
नास्ति ॥ अतएवमोक्षश्चनास्तीति ॥ ननुकथमेवशोकादिविरुद्धमुच्यतेतत्राह ॥ इतिमिथ्याख्येति ॥ एवंमतंहितोनिर्णयोत्तम
तिकुतर्कैरित्यर्थः ॥ अत्रचैवमन्वयः ॥ आत्मावद्धोमुक्तइतियाव्याख्याउक्तिःसामेगुणतःमद्गुणपारतंत्र्यात् ॥ अत्रहेतु

५७

यथोक्तं कर्मणो नानात्वं तदुपाधिकमित्याह यावत्स्यादिति गुणानां वैषम्यं अहंकारादिरूपं नत्वात्मन ए
कत्वे कथं पारतंत्र्यमुक्तम् कथं वा लोकपालादीनामपि भयमित्युक्तं तत्राह नानात्वमिति २९ यच्चमख
मभिप्रेत्य प्रवृत्तिरेव श्रेयसीति तत्राह य एतदिति एतद्गुणवैषम्यं तत्कृतं भोगं कर्म चेत्यर्थः उपासीरन्
ते लोकादीनामनित्यत्वाच्छुचार्पिताः प्राप्ताः संतो मुह्यंति ३० न केवलमनित्यतामात्रं किंतु मायामयत्व
मपीत्याह काल इति स्वभावो दैवत्वादिपरिणामहेतुः धर्मस्तद्भोगकारणं गुणव्यतिकरे मायाक्षोभे सति मो

त२ यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः नानात्वमात्मनो यावत्पारतंत्र्यं तदैव हि २९ यावदस्या
स्वतंत्रत्वं तावदीश्वरतो भयं य एतत्समुपासीरंस्ते मुह्यंति शुचार्पिताः ३० काल आत्मागमो लोकः स्व
भावो धर्म एव च इति मां बहुधा प्राहुर्गुणव्यतिकरे सति ३१ उद्धव उवाच गुणेषु वर्तमानोपि देह
जेष्वनपावृतः गुणैर्न बध्यते देही बध्यते वा कथं विभो ३२

मोहं प्राहुः न तु मद्व्यतिरिक्ताः संति ततो
निवृत्तिरेव मुक्तिहेतुत्वाच्छ्रेयसीति सिद्धं ३१ एवं तावदेक एवात्मा तस्य च गुणकार्ये देहसंबंधे कृतः संसारः आ
त्मज्ञानाच्च मुक्तिरित्युक्तं विलक्षणः स्थूलसूक्ष्मादिना तदेवं च मतांतरनिरासेन दृढीकृतं अथैषामित्यादिना तत्र प्र
श्नमति गुणेष्विति अयमर्थः गुणेषु सत्सु मुक्तिः सत्त्वे वा आद्ये ज्ञानसाधनाभावान्न मुक्तिः द्वितीये च गुणेषु वर्तमानो
पि तत्कार्ये देहजेषु कर्मसु सुखादिषु च कथं न बध्यते तथापि तेष्वाकाशवदनावृतत्वान्न बध्येत इति चेन्न हि बंधो ना

भा० ए० नदेवबद्धस्योमुपपाद्यकथंवर्त्तेतेत्यादिवैलक्षण्यप्रश्नस्योत्तरमाह अथेति तद्वद्वैलक्षण्यंद्विविधं जी
५८ वेश्वरयोरेकंजीवानांचैकं तत्रजीवेश्वरयोर्वैलक्षण्यमाह विरुद्धधर्मिणोरिति सार्द्धद्वयेन शोकानंदधर्म
वतोः एकस्मिन्धर्मिणिशरीरेनियम्यनियंतृत्वेनस्थितयोः ५ सुपर्णाविवज्ञात्मज्ञिणविवदेहात्सप्रभृतौ
सदृशौचिद्रूपत्वात्सखायौ अवियोगादेकमत्याच्च यदृच्छया अनिरुक्तयामायया वृश्च्यतइति वृक्षोदेहः ऊर्द्ध
मूलमवाक्शाखंवृक्षंयोवेदसंप्रतीतिश्रुतेः ऊर्द्धमूलमधःशाखमश्वत्थंप्राहुरव्ययमितिस्मृतेश्च तस्मिन्

अथबद्धस्यमुक्तस्यवैलक्षण्यंवदामिते विरुद्धधर्मिणोस्तातस्थितयोरेकधर्मिणि ५ सुपर्णा
वेतौसदृशौसखायौयदृच्छयैतौकृतनीडौचवृक्षे एकस्तयोःखादतिपिप्पलान्नमन्योनिर
न्नो
न्नोपिबलेनभूयान् ६

कृतंनीडंनिकेतनंहृदयरूपंयाभ्यांतौ तयोर्मध्येएकोजीवःपिप्पलान्नं पिप्पलोऽश्वत्थोदेहस्तस्मि
न्नदनीयं कर्म्मफलमित्यर्थः खादतिभक्षयति अन्यईश्वरःनिरन्नः अभोक्तापिनिजानंदतृप्तोबलेन
ज्ञानादिशक्त्याभूयान् अधिकः श्रुतिश्च द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते तयोर
न्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति ६ रामरामरामरामरा ॥ ऽऽ ॥ ऽऽ ॥ ०॥

एवंकारणभूतगुणानां मायामयत्वात्तत्कार्य्यसंसृतिर्मायामयीति प्रपंचयति ॥ शोकमोहाविति ॥ यथा स्वप्न आत्मनो बुद्धेर
ख्यातिर्विवर्त्तस्तद्वत् ॥२॥ अतो वस्तुविरोधस्तावन्नास्ति प्रतीति ॥ तोपाधिकौ घटत इत्याह ॥ विद्याविद्ये इति ॥ तन्यते मो द्वेवधा
वाभ्यामिति ॥ तत्र शक्तौ कुतः ॥ मे मायया विनिर्मिते मायावृत्तिरूपत्वात् ॥ बंधमोक्षकरीत्येकवचनं द्विवचनार्थे ॥ ननु तत्का
र्य्यत्वे बंधमोक्षयोरनादित्वनित्यत्वे न स्यातां तत्राह ॥ आद्ये अनादी ॥ अतो यावदविद्याश्वर्म्यामितावद्बंधः ॥ यदा विद्योद
दामितदा मोक्षः स्फुरतीत्यर्थः ॥ तथा च स्कंदपुराणे ॥ बंधको भवपाशेन भवपाशाच्च मोक्षकः ॥ कैवल्यदः परं ब्रह्म विष्णुर

शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया ॥ स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी ॥२॥ विद्याविद्ये
मम तनू विद्ध्युद्धव शरीरिणां ॥ बंधमोक्षकरी आद्ये मायया मे विनिर्मिते ॥३॥ एकस्यैव ममांशस्य जीव
स्यैव महामते ॥ बंधोऽस्याविद्ययानादिर्विद्यया च तथेतरः ॥४॥ वसनातनइति ॥३॥ तत्र शरीरिणामिति वक्तव

चनान्निर्देशाद्विषयभेदेनाविरोध उक्त इति भ्रांतिं व्यावर्त्तयन् ॥ बंधमोक्षव्यवस्थामुपपादयति ॥ एकस्यैवेति ॥ नहि किंमा
त्मभिद्यतेवापि बंधः ॥ न हीत्याह ॥ अस्य जीवस्यैवेति ॥ नन्वात्माऽभेदे जीवो नामकोऽन्यास्ति ॥ पृथक् पंच बंधमोक्षसुख
दुःखादिव्यवस्था तत्राह ॥ ममांशस्य ॥ अयं भावः ॥ यथैकस्यापि चंद्रादेर्जलाद्युपाधिना बिंबप्रतिबिंबरूपो भेदः ॥ यथा च
तत्र जलकंपादयः प्रतिबिंबस्यैव बिंबैकरूपेनान्यगतस्य ॥ तथा च अविद्यायां प्रतिबिंबितस्य मदंशस्य जीवस्यैव तत्कृतो
बंधः ॥ तस्य चोपाधितो भेदान्नानात्वव्यवस्थेति ॥ तथा चाहुः ॥ यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते न सर्वे संप्रयुज्यंते

तथा जीवाः सुखादिभिरिति ॥ एतत्ख्यातिरहस्यं स्वबुद्ध्या नि
श्चेतव्यमिति संबोधयति ॥ हे महामते ॥ इतरो मोक्षः ॥४॥

अबुधस्तुपूर्वकर्म्माधीनेऽस्मिन्शरीरेवर्त्तमानःगुणैरिंद्रियैर्भाव्येन कर्म्मणातत्रदेहादौनिवध्यते कुतःक
र्त्तास्मीत्यहंकारेण तदुक्तंतत्रैव प्रकृतेःक्रियमाणानिगुणैःकर्म्माणिसर्वशः अहंकारविमूढात्माकर्त्ता
हमितिमन्यते १० एतैस्त्रिभिःश्लोकैः कथंवर्त्तेतेत्यस्यप्रश्नस्यसुखदुःखस्पृन्योनिरभिमानश्चदेहेव
र्त्ततेत्युक्तामुक्तैभवति वैलक्षण्यांतरंवदन् किंभुंजीतेत्यादिप्रश्नोत्तरमाह एवमितित्रिभिः अन्यग
देवाधीनेशरीरेऽस्मिन्गुणभाव्येनकर्म्मणा वर्त्तमानोऽबुधस्तत्रकर्त्तास्मीतिनिवध्यते १० एवं
विरक्तःशयनासनाटनमज्जने दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु नतथावध्येतेवि
द्वांस्तत्रतत्रादयन्गुणान् ११ प्रकृतिस्थोप्यसंसक्तोयथाखंसवितानिलः वैशारद्येक्षयाऽ
संगशितयाछिन्नसंशयः प्रतिबुद्धइवस्वप्नान्नानात्वाद्विनिवर्त्तते १२ ॥ ऽऽ ॥ ऽऽ
तमेवकर्म्मभोवध्नातीत्येवंविरक्तोविद्वान् तथाअविद्वानिवशयनादिषुनवध्यते कुतःतत्रतत्रविषयेषु
गुणानिंद्रियाणिआदयन्भोजयन्तत्साक्षित्वेनवर्त्तमानः नतुस्वयमदन् ११ एतदेवकुतस्तत्राह प्रकृ
तिस्थोपीतिसार्द्धेन यथाखंसर्वत्रस्थितमपिनसज्जते यथासविताजलेप्रतिविंवितोपियथानिलःसर्वत्रसं
चरन्नपितद्वत् असंगेनवैराग्येणशितयातीक्ष्णयाछिन्नाःसंशयाःअसंभावनादयोयस्यसः नानात्वाद्वि

वत्वाधिकारमेवाह आत्मानमिति अतः योऽविद्ययायुक्तयुक्तः सतु नित्यबद्धः यस्तु विद्याप्रधानः सतु नित्यमुक्तः मा
र्ग्यया अनावरकत्वात् आश्रयाव्यामोहकत्वाच्च ७ इदानीं बद्धमुक्तजीवानामेव मिथो वैलक्षण्यमाह देहस्थोपीति द
शभिः विद्वान्मुक्तः संस्कारवशेन देहस्थोपि देहस्थो न भवति यथा स्वप्नादुत्थितः स्मर्यमाणे स्वप्नदेहे स्थितो
पि तत्रो स्थानं भवति तद्गतसुखदुःखाद्यभावात्तद्वत् तथा वस्तुतः अदेहस्थोपि कुमतिरविद्वान् देहस्थः तन्नि

आत्मानमन्यं च स वेद विद्वान्नै पिप्पलादः योविद्ययायुक्तः सतु नित्यबद्धो विद्यामयो यः स
तु नित्यमुक्तः ७ देहस्थोपि न देहस्थो विद्वान्स्वप्नाद्यथोत्थितः अदेहस्थोपि देहस्थः कुमतिः
स्वप्नदृग्यथा ८ इंद्रियैरिंद्रियार्थेषु गुणैरपि गुणेषु च गृह्यमाणेष्वहं कुर्यान्न विद्वान्यस्त्ववि
क्रियः ९

मित्तसुखदुःखभाक् यथा स्वप्नदेहगत इति ८ अत्र हेतुत्वेन वैलक्षण्यांतर
माह द्वाभ्यां इंद्रियैरिंद्रियार्थेषु गृह्यमाणेष्वपि वस्तु विद्वान् सन्नाहं कुर्यात् अहं गृह्णामीति मतिं
न कुर्यादित्यर्थः कुतः गुणैर्गुणेषु गृह्यमाणेषु अत एव अविक्रियः रागादिशून्यः तदुक्तं गीतासु तत्ववि
त्तु महाबाहो गुणकर्मविभागयोः गुणा गुणेषु वर्तंत इति मत्वा न सज्जत इति ९ राम राम राम राम

भा० ए०
६०

यस्तु केवलं शब्दब्रह्मण्यभिज्ञः पांडित्यमात्रश्लाघी न तु तैः साधनैस्तदर्थनिष्ठो भवेत्तं निंदति शब्दब्रह्मणि
निष्णातः पारंगतोपि परे ब्रह्मणि न निष्णायात् ध्यानाद्यभियोगं न कुर्य्यात् तस्य शास्त्रश्रमः श्रमैकफलः न
तु पुरुषार्थपर्य्यवसायी अधेनुं चिरप्रसूतां १७ एतदेवान्यार्थनिदर्शनैः प्रपंचयति गामिति दुग्धेति दुग्ध
दोहः पयः दुग्धो दोहो नोत्तरत्र दोह्योस्ति यस्यास्तामधर्मश्चन्या असतीं भार्य्यां कामश्चन्यां देहं पराधीनं प्राप्ति

शब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः १७ गां दुग्धदो
हामसतीं च भार्य्यां देहं पराधीनमसत्प्रजां च वित्तं त्वतीर्थीकृतमंग वाचं हीनां मया रक्षति दुःखदुः
खी १८ यस्यां न मे पावनमंग कर्म स्थित्युद्भवप्राणनिरोधमस्य लीलावतारेप्सितजन्म वा स्याद्वंध्यां
गिरं तां बिभृयान्न धीरः १९ एवं जिज्ञासयापोह्य नानात्वभ्रममात्मनि उपारमेत विरजं मनो मय्यर्प्य सर्वगे

रक्षणे दुःखहेतुं असत्प्रजां दृष्टादृष्टफलशून्यं पुत्रं अतीर्थीकृतं आगते पात्रे अदत्तं वित्तं दुष्कीर्त्ति दुरितापादकं
अंग हे उद्धव दुःखानंतरं दुःखमेव यस्य सः रक्षति १८ मया हीनां वाचमित्युक्तं विवृणोति यस्यां मे जगतः प्रो
धकं चरित्रं न स्यात् किं तत् अस्य विश्वस्य स्थित्यादिरूपं तद्धेतु रित्यर्थः लीलावतारेषु ईप्सितं जगतः प्रेमा
स्पदं रामकृष्णादि जन्म वा न स्यात् तां निष्फलां गिरं धीरो धीमान्न धारयेत् १९ उक्तं ज्ञानमार्गमुपसंहरति एवं
निश्चित्य विचारेणात्मनि नानात्वभ्रमं देहाद्यध्यासं निरस्य निर्मलं मनो मयि सर्वगे परिपूर्णे समर्प्य संधार्य्य उ

२४ ॐ

६०

कथंविहरेदित्यस्योत्तरत्वेनवैलक्षण्यांतरमाह यस्यस्युरिति तद्गुणैर्देहगुणैः संकल्पशून्याभिः प्राणादिवृ
त्तिभिर्विहरन्मुक्तइत्यर्थः १३ एवंतावद्बद्धमुक्तयोः स्वसंवेद्यमेववैलक्षण्यमुक्तं इदानींकैर्वाज्ञायेत लक्ष
णैरित्यस्योत्तरतयापरैरपिसुज्ञेयं वैलक्षण्यमाह यस्यात्मेतित्रिभिः हिंस्रैर्दुर्जनैरन्यैर्वाप्राणिभिर्यस्यात्मा
देहः पीड्यते यदृच्छयायेनकेनापिक्वचित्किंचिदर्च्यतेवा सबुधस्तत्रनव्यतिक्रियते नातिविक्रियते

यस्यस्युर्वीतसंकल्पाःप्राणेंद्रियमनोधियां वृत्तयःसविनिर्मुक्तोदेहस्थोपिहितद्गुणैः १३ यस्यात्मा
हिंस्यतेहिंस्रैर्येनकिंचिद्यदृच्छया अर्च्यतेवाक्वचित्तत्रनव्यतिक्रियतेबुधः १४ नस्तुवीतननिं
देतकुर्वतःसाध्वसाधुवा वदतोगुणदोषाभ्यांवर्जितःसमदृङ्मुनिः १५ नकुर्यान्नवदेत्किंचि
न्नध्यायेत्साध्वसाधुवा आत्मारामोनयावृत्त्याविचरेज्जडवन्मुनिः १६

इत्यर्थः तदुक्तंयाज्ञवल्क्येन यःकंटकैर्वितुदतिचंदनैर्यश्चलिंपति अक्रुद्धोपरितुष्टश्चसमस्तस्य
चतस्यचेति १४ किंचसाध्वसाधुवाकुर्वतोवदतोवाजनान् नस्तुवीत नचनिन्देत् योलौकिकव्यवहारवि
मुखःसमुक्तइत्यर्थः १५ अपिचनकुर्यादिति योदैहिकेपिकर्मणिउदासीनः समुक्तइतरोबद्धइत्यर्थः ए
एतान्येवसर्वाणिमुमुक्षोःसाधनानिज्ञातव्यानि १६

भा० ए०
६१

अत्रहेतुः त्वमिति व्योमवदसंगः यतः प्रकृतेः परः स्वेच्छयात्मानमिच्छयानुपात्तं पृथक्परिमितंवपुर्येनसः २६ त
त्रैवं शास्त्रलक्षणैः साधुं निरूपयति कृपालुरितिपंचभिः कृपालुः परदुःखासहिष्णुः सर्वदेहिनां केषांचिदपि अकृतद्रोहः
तितिक्षुः क्षमावान् सत्यंसारः स्थिरंबलंवायस्यसः अनवद्यात्मा असूयादिरहितः सुखदुःखयोः समः य
थाशक्ति सर्वेषामुपकारकः कामैरक्षुभितचित्तः दांतः संयतबाह्येंद्रियः मृदुः अकठिन चित्तः शुचिः सदा

त्वंब्रह्मपरमंव्योमपुरुषः प्रकृतेःपरः अवतीर्णोसि भगवान्स्वेच्छोपात्तपृथग्वपुः २६ श्रीभग
वानुवाच कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनां सत्यसारोनवद्यात्मासमः सर्वोपकारकः
कामैरहतधीर्दांतोमृदुः शुचिरकिंचनः अनीहोमितभुक्शांतः स्थिरोमच्छरणोमुनिः अ
प्रमत्तोगभीरात्माधृतिमान्जितषड्गुणः अमानीमानदः कल्पोमैत्रः कारुणिकः कविः २७

चारः अकिंचनः अपरिग्रहः अनीहः दृष्टक्रियाशून्यः मितभुक् लब्धाहारः शांतः नियतांतःकरणः स्थि
रः स्वधर्मेमच्छरणः मदेकाश्रयः मुनिः मननशीलः अप्रमत्तः सावधानः गभीरात्मा निर्विकारः धृतिमान्वि
पद्यप्यकृपणः जितषड्गुणः क्षुत्पिपासे शोकमोहौ जरामृत्यू षड्ऊर्मयः एते जितायेनसः अमानी अनमाने
कांक्षी अन्येभ्योमानदः कल्यः परबोधनेदक्षः मैत्रः अवंचकः कारुणिकः करुणयैवप्रवर्त्तमानः नदृष्टलो

६१

यद्यनीशः अशक्तः तर्हिआस्तामिदंमद्भक्त्यैवकृतार्थोभविष्यतीत्याह मयीति मदर्पणेन २१ कर्मभिर्विशुद्ध
सत्वस्यांतरंगांभक्तिमाह श्रद्धालुरिति अभिनयन्स्वयमनुकुर्वन्आचरन्सेवमानः २२ ततश्चानेनप्रकारेण
मयिसत्संगेनलब्धयाभक्त्यासभक्तोमामुपासिताध्याताभवतिसचध्यानशीलः सद्भिर्दर्शितंवैनिश्चितंसुखेनैवमे

यद्यनीशोधारयितुंमनोब्रह्मणिनिश्चलं मयिसर्वाणिकर्म्माणिनिरपेक्षःसमाचर २१ श्रद्धालुर्मे
कथाःशृण्वन्सुभद्रालोकपावनीः गायन्ननुस्मरन्कर्मजन्मचाभिनयन्मुहुः मदर्थेधर्मकामा
र्थानाचरन्मदपाश्रयः लभतेनिश्चलांभक्तिंमय्युद्धवसनातने २२ सत्संगलब्धयाभक्त्यामयिमां
सउपासिता सवैमेदर्शितंसद्भिरंजसाविंदतेपदं २३ ॥उद्धव उवाच॥ साधुस्तवोत्तमश्लोकमतःकी
दृग्विधःप्रभो भक्तिस्त्वय्युपयुज्येतकीदृशीसद्भिराहृता २४ एतन्मेपुरुषाध्यक्षलोकाध्यक्षजग
त्प्रभो प्रणतायानुरक्तायप्रपन्नायचकथ्यताम् २५

पदंस्वरूपंप्राप्नोति २३ सत्संगलब्धयाभक्त्येत्युक्तं तत्रसतांभक्तेश्चविशेषंपृच्छतिसाधुरिति साधवःस्वस्व
प्रमतिपरिकल्पिताःसंतिबहवः तत्रतुकीदृशःसंमतः भक्तिरपिबहुधालोके कीदृशीपुनस्त्वय्युपयुज्यते
सद्भिश्चनारदादिभिराहृता २४ एतच्चकथ्यतां इदंचातिगुह्यंत्वय्येववक्तव्यमित्यैश्वर्यमाविष्करोति हेपुरु

भा० ए० बलिविधानं पुष्पोपहारादिसमर्प्पणं सर्ववार्षिकपर्वसु चातुर्मास्यैकादश्यादिषु विशेषतः ३३ उद्यानादिक
६२ रणे सामर्थ्ये सति स्वतः असति चान्यैः संभूयोद्यमः उद्यानं पुष्पप्रधानं वनं उपवनं फलप्रधानं क्रीडार्थं क्री
डास्थानं ३४ संमार्ज्जनं रंगोपाकरणं उपलेपः गोमयोदकादिभिरालेपनं सेकः तैरेव प्रोक्षणं मंडलवर्त्तनं
सर्वतोभद्रादिकरणं मह्यं मम ३५ स्वयमन्येन वा निवेदितं नैव स्वीकुर्यात् एतच्चासाधारणस्थावरविषयं

यात्राबलिविधानं चसर्ववार्षिकपर्वसु वैदिकोक्तां त्रिकोटीं नामदीयव्रतधारणं ३३ मम
चौं स्थापनेऽश्रुस्वतः संहत्योद्यमः उद्यानोपवनाक्रीडपुरमंदिरकर्मणि ३४ संमार्ज्ज
नोपलेपाभ्यां सेकमंडलवर्त्तनैः गृहस्य शुश्रूषणं महोदारं सर्वदायमायया ३५ आमानित्वमद
भित्वं कृतस्यापरिकीर्त्तनं अपि दीपावलोकं नैनोपयुंज्यान्निवेदितं मम ३६

रागप्राप्तविषयं वा भक्त्या तु ग्राह्यमेव षड्भिर्मासोपवासैस्तु यत्फलं परिकीर्त्तितं विष्णोर्नैवेद्यसिक्थेन तत्
एपत्नं भुंजतां कलौ हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युत इत्यादि
वचनेभ्यः यद्वा अन्यस्मै निवेदितं तेनोपयुंज्यात् मह्यं न निवेदयेदित्यर्थः विष्णोर्निवेदितान्नेन यष्टव्यं देव
तान्तरं पितृभ्यश्चैव तद्देयं तदानंत्याय कल्पते पितृशेषं तु यो दद्याद्धरये परमात्मने रेतोधाः पितरस्तस्य भवं

२७ तिलकेशभागिनरत्यादिवचनेभ्यः ३६

किंच मयावेदरूपेणादिष्टानपिस्वधर्मान्संत्यज्य योमांभजेत्सोप्येवंपूर्वोक्तवत्सत्तमः किमज्ञानान्नास्तिक्या
द्वा न धर्माचरणेसत्वशुद्ध्यादीनगुणान्विपक्षेदोषांश्चआज्ञायज्ञात्वापिमद्ध्यानविक्षेपकतयामद्भक्त्यैवसर्वं
भविष्यंतीतिदृढनिश्चयेनैवधर्मान्संत्यज्य यद्वा भक्तिदार्ढ्येन निवृत्ताधिकारतयासंत्यज्य अथवा विद्धैका
दशीकृत्यैकादश्युपवासानुपवासानिवेद्य श्राद्धादयोभक्तिविरुद्धायेधर्मास्तान्संत्यज्येत्यर्थः २८ किंच याव

आज्ञायैवंगुणान्दोषान्मयादिष्टानपिस्वकान् धर्मान्संत्यज्ययःसर्वान्मांभजेत्सचसत्तमः २८
ज्ञात्वा२ ज्ञात्वाथयेवैमांयावान्यश्चास्मियादृशः भजंत्यनन्यभावेनतेमेभक्ततमामताः २९ मल्लिंगमद्भ
न३ क्तजनदर्शनस्पर्शनार्चनं परिचर्यास्तुतिप्रह्वगुणकर्मानुकीर्तनं ३० मत्कथाश्रवणेश्रद्धामद
नुध्यानमुद्धव सर्वलाभोपहरणंदास्येनात्मनिवेदनं ३१ मज्जन्मकर्मकथनंममपर्वानुमोदनं
गीततांडववादित्रगोष्टिभिर्मद्गृहोत्सवः ३२

न्देशकालाद्यपरिच्छिन्नः यश्चसर्वात्मा यादृशः सच्चिदानंदादिरूपः तंमांज्ञात्वावाअज्ञात्वापियद्वा विशे
षतः पुनःपुनर्ज्ञात्वाएकांतभावेनयेभजंतीति २९ साधुलक्षणमुक्तंभक्तेर्लक्षणमाह मल्लिंगेत्यष्टभिः
लिंगानिप्रतिमादीनि ३० सर्वलाभोपहरणंसर्वस्यलब्धस्यसमर्पणं ३१ पर्वाणिजन्माष्टम्यादीनितदु

भा० ए०
६३

ज्ञानभक्तिमार्गावुक्तौ तत्र ज्ञानमार्गादपि भक्तिमार्गः श्रेष्ठ इत्याह प्रायेणेति सत्संगेन यो भक्तियोगः तेन विनोपा
यः संसारतरणे न विद्यते सत्संगेन इत्यत्र हेतुमाह यस्माद्धि यस्मात् सतामहं प्रायणं प्रकृष्टमयनमाश्रयः अतः स
त्संगो मय्यन्तरंग इत्यर्थः ४८ इदानीं सांख्ययोगादीनि साधनान्तराणि सव्यपेक्षाणि सव्यभिचाराणि च सत्संगस्तु स्वतन्त्र
एव समर्थः फलाव्यभिचारी चेत्येयितुमाह अथेति एतद्गुह्यतमात् परमं गुह्यं अतः शृणु इत्यर्थः ४९ इति श्री ए का

प्रायेण भक्तियोगेन सत्संगेन विनोद्धव नोपायो विद्यते सम्यक् प्रायणं हि सतामहं ४८ अथै
तत्परमं गुह्यं शृण्वतो यदुनंदन सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा ४९ इति श्री
मद्भागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्धवसंवादे एकादशोध्यायः ॥११॥ श्रीभगवानुवा
च नरोधयति मां योगो न सांख्यं धर्म एव च न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा
व्रतानि यज्ञश्छंदांसि तीर्थानि नियमा यमाः यथावरुंधे सत्संगः सर्वसंगापहो हि मां १

ऐ एकादशः ॥११॥ द्वादशे साधुसंगस्य महिमा वर्णितः पुरा कर्मानुष्ठानतत्त्यागव्यवस्था च ततः परं नरोधयतीति न व
शीकरोति योग आसनप्राणायामादिः सांख्यं तत्त्वानां विवेकः धर्मः सामान्यतो ऽहिंसादिः स्वाध्यायो वेदजपः तपः
कृच्छ्रादिस्त्यागः संन्यासः इष्टापूर्तं इष्टं च पूर्तं च तत्रेष्टमग्निहोत्रादि पूर्तं कूपारामादिनिर्माणं दक्षिणाशब्देन सामा
न्यतो दानं लक्ष्यते व्रतानि एकादश्युपवासादीनि यज्ञ देवपूजा छंदांसि रहस्यमंत्राः अवरुंधे वशीकरोति ॥१॥ ६३

३७ इदानीमेकादश पूजाधिष्ठानान्याह सूर्य इति हे भद्र ३८ अधिष्ठानभेदेन पूजाधिष्ठानान्याह सूर्य इति त्रिभिः
त्रय्या विद्यया सूक्तैरुपस्थानादिना अग्रे गहे उद्धव यवसादीना तृणादिना बंधुसत्कृत्या बंधुवत्संमानेन हृदि खे हृदयाका

यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः तत्तन्निवेदयेन्मह्यं तदानंत्याय कल्पते ३७ सूर्योग्नि
र्ब्राह्मणो गावो वैष्णवः खं मरुज्जलं भूरात्मा सर्वभूतानि भद्र पूजापदानि मे ३८ सूर्ये तु विद्यया
त्रय्या हविषाग्नौ यजेत मां आतिथ्येन तु विप्राग्र्ये गोष्वंग यवसादिना वैष्णवे बंधुसत्कृत्या हृदि खे
ध्याननिष्ठया वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ३९ स्थंडिले मंत्रहृदयैर्भोगैरात्मा
नमात्मनि क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत मां ४० धिष्ण्येष्वित्येषु मद्रूपं शंखचक्रगदा
बुजैः युक्तं चतुर्भुजं शांतं ध्यायन्नर्चेत्समाहितः ४१ इष्टापूर्तेन मामेवं यो यजेत समाहितः
लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया ४२

यौ मुख्यधिया प्राणदृष्ट्या तोये तोयादिभिर्द्रव्यैस्तर्पणादिना ३९ स्थंडिले भुवि मंत्रहृदयैः रहस्यमंत्रन्यासैः ४० सर्वा
धिष्ठानेषु ध्येयमाह धिष्ण्येष्विति येष्विति इत्यनेन प्रकारेण एषु धिष्ण्येषु ४१ उक्ताया भक्तेः फलमाह इष्टापूर्ते
नेति सद्भक्तिं दृढां भक्तिं अस्या भक्तेरंतरंसाधनमाह इत्थं च मत्स्मृतिः साधुसेवया भवति यद्वा स्मृतिर्ज्ञानं ततश्च

दृढभक्तिमत्तः पुंसः साधुसेवया मज्ज्ञानं भवतीत्यर्थः ४२

स्वप्राप्तेर्दुर्लभत्वमाह यमिति योगादिभिः कृतप्रयत्नोपि यं न प्राप्नुयात् तं मामीयुरिति पूर्वेणान्वयः अत्र च प्रथमं या
गोप्यः पश्चाद्यो वा श्रीकृष्णेन सह संगताः ते संतः तत्संगोऽन्येषां सत्संगः तेन च तेषां भक्तिरिति ज्ञातव्यं ६ गोपीनां भा
वं प्रपंचयति रामेणेति चतुर्भिः श्वाफल्किना अक्रूरेण मयि प्रणीते सति मे मत्तोऽन्यं सुखाय न ददृशुः कुतः वियोगेन
तीव्रो दुःसह आधिर्यासां ताः अत्र हेतुः मयि विगाढेनातिदृढेन भावेन प्रेम्णा अनुरक्तानि संसक्तानि चित्तानि यासां ताः

यंनयोगेनसांख्येनदानव्रततपोध्वरैः व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि ६ रामे
णसार्द्धंमथुरांप्रणीतेश्वाफल्किनामय्यनुरक्तचित्ताः विगाढभावेननमेवियोगतीव्राधयो
ऽन्यंददृशुःसुखाय ७ तास्ताःक्षपाःप्रेष्ठतमेननीतामयैववृंदावनगोचरेण क्षणार्द्धवत्ताःपुन
रंगतासांहीनामयाकल्पसमाबभूवुः ८ तानाविदन्मय्यनुषंगबद्धधियःस्वमात्मानमदस्तथेदं य
थासमाधौमुनयोऽब्धितोयेनद्यःप्रविष्टाइवनामरूपे ९

७ तीव्राधित्वं व्यनक्ति तास्ता इति मया सह या एव क्षपा रात्रयः क्षणार्द्धवन्नीतास्ता एव पुनर्मया हीनास्तासां कल्पसमा बभूवुः कथंभू
ताः तास्ता वाचामगोचरा इत्यर्थः ८ किंच एवं तीव्राधयस्ता मोहान्निमेषेण समाधिं प्राप्ता इत्याह ता इति मय्यनुषंगेण आसक्त्या
बद्धा धियो याभिस्ताः स्वमात्मानं स्वदेहं अदः दूरस्थं इदं संनिहितं च नाविदन् यद्वा स्वपतिपुत्रादिममतास्पदं आत्मानं अहंकारा
स्पदं अदः परलोकं इदं इमं लोकं च नाविदन्निति यथा मुनयः समाधौ नामरूपेन विदुस्तद्वत् किंत्वब्धितोये नद्य इव मयि प्रवि

यातुधानाः राक्षसाः त्वाष्ट्रो वृत्रः कायाधवः प्रह्लादः २ ऋक्षो जांबवान् गृध्रो जटायुः वणिक्पथस्तुलाधारः व्याधो
धर्मव्याधः यज्ञपत्न्यो दीक्षितभार्याः ३ तेषां सत्संगव्यतिरिक्तसाधनांतराभावमाह त इति अनधीताः श्रुतिगणा
यैः तदर्थं च न उपासिता महत्तमा यैस्ते किंच अव्रतातप्ततपसः न व्रतानि येषां न तप्तानि तपांसि यैस्ते चेति च तथा
मत्संगादिति सद्भिः संगो नाम मय्येव संग इत्युक्तं यद्वा स्वसंगस्यापि सत्संगत्वं विवक्षितं स्वस्यापि सत्वात् यद्वा ॥

सत्संगेन हि दैतेया यातुधाना मृगाः खगाः गंधर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः विद्याधरा म
नुष्येषु वैश्याः शूद्राः स्त्रियोऽन्त्यजाः रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन्युगे युगे बहवो मत्पदं प्राप्ता
स्त्वाष्ट्रकायाधवादयः २ वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः सुग्रीवो हनुमान्ऋक्षो गजो गृध्रो वणि
क्पथः व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे ३ ते नाधीतश्रुतिगणा नोपासितमहत्तमाः अव्रता
तप्ततपसो मत्संगान्मामुपागताः ४ केवलेन हि भावेन गोप्यो गावो नगा मृगाः ये न्ये मूढधियो नागाः सिद्धा मा
मीयुरंजसा ५

मदीयसंगादित्यर्थः ४ तत्र रक्षआदीनां भवतु नाम कथंचित्साधनांतरं गोपीप्रभृतीनां तु
नान्यदस्तीत्याह केवलेनेति सत्संगलब्धेन केवलेनैव भावेन प्रीत्या नगा यमलार्जुनादयः यद्वा तदानींतनसर्वत
रुगुल्मादीनामपि भगवति भावोस्तीति गम्यते तदुक्तं भगवतैव अहो अमी देववरामरार्चितं पादांबुजं ते सुमनःफलार्हणं
नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतमित्यादि सिद्धाः कृतार्थाः संतः ईयुः प्रापुः ५ रामराम

भा० द० अत्रंसंसएषइत्यष्टभिः अयंभावः ईश्वरस्तावत्स्वमायावशात्प्रपंचात्मनाभाति तत्रप्रपंचाध्यासाच्चजीवानाम्
६५ नाद्यविद्ययाकर्तृत्वादि तत्तोविधिषुनिषेधाधिकारः तदानींसत्वशुद्ध्यर्थंकर्माणिकुर्विंत्युक्तं सत्वेचशुद्धे
पुनःकर्मजाड्यपरिहाराय भक्तिविक्षेपकंकर्मादरंपरित्यज्य दृढविश्वासेनभजेत्युक्तं जातायांतद्विधा
यां न किंचित्कर्तव्यमस्तीति तत्रतावदीश्वराद्व्यागादीन्द्रियद्वाराजीवसंसृतिकारणभूतंप्रपंचक्रममाह
सार्द्धैश्चतुर्भिः सएषअपरोक्षः जीवयतीतिजीवः परमेश्वरः अपरोक्षत्वेहेतुः विवरेषुआधारादिचे
क्रेषुप्रसूतिरिवप्रसूतिरभिव्यक्तिर्यस्यसः तामेवाभिव्यक्तिमाह घोषेणपराख्येन तावदवनोप्राणे

श्रीभगवानुवाच॥ सएषजीवोविवरप्रसूतिः प्राणेनघोषेणगुहांप्रविष्टः मनोमयं
सूक्ष्ममुपेत्यरूपंमात्रास्वरोवर्णइतिस्थविष्ठः॥ १३

नसहगुहां आधारचक्रंप्रविष्टःसन् मनोमनोमयंसूक्ष्मंरूपंपश्यंत्याख्यंमध्यमाख्यंचमणिपूरकचक्रेवि-
शुद्धिचक्रेचउपेत्यप्राप्य वक्त्रेमात्राह्रस्वादिः स्वरोदात्तादिः वर्णः अकारादिरित्येवंवैखर्याख्यःस्थविष्ठः अ-
तिस्थूलोनानावेदशाखात्मकोभवति तथाचश्रुतिः चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणा
येमनीषिणः गुहात्रीणिनिहितानेंगयंति तुरीयंवाचोमनुष्यावदंतीति अभियुक्तैश्लोकश्च यासामित्रावरु-
णसदनादुच्चरंतीत्रिषष्टिंवर्णानंतःप्रकटकरणैः प्राणसंगात्प्रसूते तांपश्यंतींप्रथममुदितांमध्यमांबुद्धि-
स्थांवाचंवक्त्रेकरणविशदांवैखरींचप्रपद्यइति १३
६५

एवंतास्त्वबलाः केवलमत्कामाः अस्वरूपविदः स्वरूपंतुनजानंति, तथापिसत्संगाज्जारबुद्धिवेद्यमपिब्रह्मस्वरूपंमां
परमंप्रापुरित्यर्थः १० यस्मादेवंभूतोमत्संगजनप्रभावः तस्मात्त्वंचोदनांश्रुतिंप्रतिचोदनांस्मृतिंच यद्वा विधिंनिषेधंच
उत्सृज्यमांशरणंयाहि मय्येवाकुतोभयःस्याःभव ११ एवंतावन्मयोदितेष्ववहितः स्वधर्म्मेष्ठित्यादिनाकर्म्मकर्त्तव्यमित्यु

मत्कामारमणंजारमस्वरूपविदोऽबलाः ब्रह्ममांपरमंप्रापुःसंगाच्छतसहस्रशः १०
तस्मात्त्वमुद्धवोत्सृज्यचोदनांप्रतिचोदनां प्रवृत्तंचनिवृत्तंच श्रोतव्यंश्रुतमेवच मामेकमे
वशरणमात्मानंसर्वदेहिनां याहिसर्वात्मभावेनमयास्याह्यकुतोभयः ॥ ११ ॥ उ
द्धव उवाच ॥ संशयःशृण्वतोवाचंतवयोगेश्वरेश्वर ननिवर्त्तत आत्मस्थो येनभ्राम्यतिमे
मनः १२

क्तम् इदानींतत्सर्वंत्यक्त्वामांशरणंयाहीत्युक्ते तत्रकिमात्मनःकर्त्तृत्वाद्यस्ति नास्तिचेत्यात्मस्थः आत्मवि
षयोननिवर्त्तते यद्वा कर्मकार्य्यंत्याज्यंवेत्यात्मस्थोहृदिस्थःसंशयोननिवर्त्तत इति येनसंशयेन १२ ॥

भा० ए० तस्मादीश्वराभिव्यक्तिरूपः प्रपंचो नेश्वराद्भिन्नोऽस्तीत्याह अयमिति अयंजीवईश्वर आद्यावव्यक्तः एकएव
६६ वयसाकालेनविश्लिष्टाविभक्तावामादीद्रियरूपाःशक्तयोयस्य यद्वा विश्लेषएवशक्तिर्यस्याश्लिष्टामायाशक्तिर्य
स्यसः बहुप्रकारइवाभाति यतः सएवाद्यः त्रिवृत् त्रिगुणाश्रयः अब्जयोनिः लोकपद्मस्यकारणभूतः एकस्य
बहुधाभानेदृष्टांतः योनिंक्षेत्रंप्रतिपद्य प्राप्यबीजानियद्वदिति तस्मात्तन्मायाविलसितत्वात्तदाश्रयमिदंज
गन्न ततः पृथगितिसदृष्टांतमाह यस्मिन्निति तंतुवितानसंस्थास्थितिर्यस्यसपटोयथा तथायस्मिन्निदंविश्वमो

अयंहिजीवस्त्रिवृदब्जयोनिरव्यक्तएकोवयसासआद्यः विश्लिष्टशक्तिर्बहुधेवभातिबीजानियो
ष २ निंप्रतिपद्ययद्वत् यस्मिन्निदंप्रोतमशेषमोतंपटोयथातंतुवितानसंस्थः २१ यएषसंसारत
रुःपुराणःकर्मात्मकःपुष्पफलेप्रसूते द्वेअस्यबीजेशतमूलस्त्रिनालःपंचस्कंधःपंचरसप्रसू
तिः ॥

तंदीर्घतंतुषुपटइव प्रोतंतिर्यक्तंतुष्विव २१ एवंभूतंसृष्टिप्रपंचात्मकंविद्यया तन्न्यध्यस्तंवृक्षरूपंजी
वस्यकर्तृत्वादिसंसारहेतुः अतस्तच्छिवेकज्ञानेनकर्मादिसर्वंत्याज्यमितिसूचयितुमित्यभिप्रायेणाह यएषइति साधै
स्तुभिः पुराणः अनादिः कर्मात्मकः प्रवृत्तिस्वभावः पुष्पफले भोगापवर्गौ कर्मात्मफलेवा प्रसूते जनयति वृक्षत्वरू
पकंप्रपंचयति द्वेइति द्वेपुण्यपापे अस्यबीजे सत्त्वशतमूलः शतं अपरिमितावासना मूलानियस्य त्रयोगुणा
नालानिप्रकांडायस्य पंचभूतानिस्कंधायस्य पंचरसाःशब्दादिविषयास्तेषांप्रसूतिर्यस्मात् ॥ २२ ॥ २२ ६६

अव्यक्तस्य सतः सूक्ष्ममध्यमक्रमेणाभिव्यक्तौ दृष्टांतः यथेति यथाग्निः खे ऊष्मा अव्यक्तोष्मरूपः दारुण्य
धिकं मथ्यमानः अनिलसहायः सन् अणुः सूक्ष्मविस्फुलिंगादिरूपो भवति पुनः प्रवृद्धो जातो हविषा संव
द्धते तथैवेयं वाणीममभिव्यक्तिः १७ उक्तां वाग्वृत्तिमुपसंहरन्नितरेंद्रियवृत्तीरतिदिशति एवं गदिः

यथानलः खेऽनिलबंधुरूष्मा वलेन दारुण्यधिमथ्यमानः अणुः प्रजातो
हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणी १७ एवं गदिः कर्म्म गति
विसर्गो घ्राणो रसो दृक् स्पर्शः श्रुतिश्च संकल्पविज्ञानमथाभिमानः सूत्रं
रजःसत्वतमोविकारः १८

गदनं भाषणं मे व्यक्तिरित्युपसंहारः कर्म्म हस्तयोर्वृत्तिः गतिः पादयोः विसर्गः पायूपस्थयोरिति कर्मे
न्द्रियाणां घ्राणः अवघ्राणं रसो रसनं स्पर्शनं श्रुतिः श्रवणमिति ज्ञानेंद्रियाणां संकल्पो मनसः विज्ञानं बु
द्धिचित्तयोः अभिमानोऽहंकारस्य सूत्रं प्रधानस्य सत्वरजस्तमसां विकारोऽधिदैवादिस्त्रिविधः प्रपंचः मे व्यक्ति
रिति पूर्वेणान्वयः १८

त्रयोदशे थ सत्त्वस्य वृद्ध्या विद्योदयक्रमः हंसेतिहासतो निष्ठा गुणविश्लेषवर्णनं विद्याकुठारेणाजीवाशयं संवृश्च्य
साधनं त्यजेदुक्तं तत्र तमआदिगुणत्रयप्रतिबंधे सति कथं विद्योत्पत्तिरित्याशंक्य तन्निरसनेन विद्योत्पत्तिप्रकारमाह
सत्त्वमिति सप्तभिः तत्र यद्यात्मनो देहादिवदात्मधर्मा गुणाः स्युस्तर्हि तत्स्वरूपत्वात्तेषां गुणानां निवृत्तिर्न स्यात् न त्वेत
दस्तीत्याह बुद्धेः प्रकृतेरेते हि गुणा न त्वात्मन इति अतः सत्त्वेन सत्त्ववृत्त्या अन्यतमौ हन्यात् रजस्तमो वा तद्वृत्तीर्जयेदि
त्यर्थः सत्त्वं च सत्यदयादिवृत्तिरूपं उपशमात्मकेन सत्त्वेनैव हन्यात् १ ननु गुणत्रयवृत्तीनां परस्परोपम

श्रीभगवानुवाच ॥ सत्त्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः सत्त्वेनान्यतमौ हन्यात्सत्त्वं
सत्त्वेनचैव हि १ सत्त्वाद्धर्मो भवेद्वृद्धात्पुंसो मद्भक्तिलक्षणः सात्त्विकोपासया सत्त्वं ततो
धर्मः प्रवर्तते २ धर्मो रजस्तमो हन्यात्सत्त्ववृद्धिरनुत्तमः आशु नश्यति तन्मूलो ह्यधर्म उभये हते

र्दिरूपत्वात्कथं सत्त्ववृत्त्यैवेतरवृत्त्योर्नियमेन हंतव्यस्तत्राह सत्त्वादिति मद्भक्तिलक्षणः यो ते ३
धर्मः स मद्भक्तिरूप एव वा तत्त्वमेव कथं वर्द्धेत तत्राह सात्त्विकानां पदार्थानां उपासयासेवया सत्त्वं वृद्धं भवतीत्य
र्थः २ स च धर्मो रजस्तमश्च हन्यात् कुतः न विद्यते उत्तमो यस्मात्स सर्वोत्तमः यतः सत्त्ववृद्धिः सत्त्वस्य वृद्धिर्यस्मात्
कारणात्तस्मात् अत एव तत्कार्यं धर्मप्रतिबंधोपि नास्तीत्याह तस्मिन्नुभयस्मिन्हते तन्मूलः तेरजस्तमासीराग

दश च एका च शाखा इंद्रियाणि यस्य द्वयोः सुपर्णयोर्जीवपरमात्मनोर्नीडं यस्मिन् त्रीणि वल्कलानि त्वचो वातपित्त
श्लेष्माणो यस्य द्वे सुखदुःखे फले यस्य सः अर्कं प्रविष्टः सूर्यमंडलपर्यंतं व्याप्तः तं निर्भिद्य गतस्य संसाराभावात् २२
तत्फलभोक्तॄनाह गृध्रा इति गृध्राः कामिनः ग्रामेचराः गृहस्थाः अस्य वृक्षस्यैकं फलं दुःखमदंति परिणामतः स्वर्गादेर
पि दुःखस्वरूपत्वात् विवेकिनोऽरण्यवासाः संन्यासिनः एकं फलं सुखमदंति एकं परमात्मानं मायामयं एवं बहुरूपं इज्यैः

दशैकशाखो द्विसुपर्णनीडस्त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः २२ अदंति चैकं फलमस्य
गृध्रा ग्रामेचरा एकमरण्यवासाः हंसा य एकं बहुरूपमिज्यैर्मायामयं वेद स वेद वेदं २३
एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः विवृश्च्य जीवाशयमप्रमत्तः संपद्य चा
त्मानमथ त्यजास्त्रं २४ ॥ इति श्रीमद्भागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्धवसंवादे
नाम द्वादशोऽध्यायः ॥ १२ ॥

गुरुभिः कृत्वा यो वेद स वेद तत्त्वार्थवेद २३ तं चैवं ज्ञात्वा कृतकृत्यः सन् सर्वसाधनं संत्यजेत्याह ॥ एवमिति
एकांतभक्त्या शितेन तीक्ष्णेन ज्ञानकुठारेण स्वतंत्रभावात् द्वयोः ज्ञानभक्त्योः जीवोपाधिं त्रिगुणात्मकं लिंगश
रीरं विवृश्च्य छित्वा परमात्मानं च संपद्य प्राप्य अथास्त्रं साधनं त्यजेति २४ ॥ इति श्री एकादशे द्वादशः ॥ १२ ॥

भा० ए०
६८

ननुगुणव्यतिकरजातोदेहः कथंस्वाश्रयंतानगुणान्स्वतएवोत्पन्नयाविद्ययापोह्यस्वयमप्युपरमेत्तत्राह वेण्विति वेणूनांसं
घर्षणजातोवह्निर्यथास्वतएवोत्पन्नाभिर्ज्वालाभिस्तद्वनंसर्वंदग्ध्वास्वयंशाम्यति एवंदेहोपितत्क्रियः तस्याग्ने
रिवक्रियाव्यापारोयस्यसः ७ ननुनियतेंद्रियतयास्मार्त्तिकुशलावायामियानस्तिपुरुषार्थः तथापिराजसादीन्विषया
न्दुःखमितिज्ञात्वा ततोपिकथंसेवंतइतिपृच्छति विदंतीति पदस्थानंस्थानंयथाभन्त्समानाश्वपिखराययाप

वेणुसंघर्षजोवह्निर्दग्ध्वाशाम्यतितद्वनं एवंगुणव्यत्ययजोदेहःशाम्यतितत्क्रियः ७ उद्ध
व उवाच विदंतिमर्त्याःप्रायेणविषयान्पदमापदां तथापिभुंजतेकृष्णतत्कथंश्वखराजव
त ॥ श्रीभगवानुवाच ॥ अहमित्यन्यथाबुद्धिःप्रमत्तस्ययथाहृदि उत्सर्पतिरजोघोरंततोवैका
रिकंमनः ९ रजोयुक्तस्यमनसःसंकल्पःसविकल्पकः ततःकामोगुणध्यानाद्दुःसहःस्या
द्धिदुर्मतेः १०

ज्ञाताद्रुमानाम्रपिखरीमनुधावंतः अजाययानिर्लज्जाहंतुमानीताअपितद्वत् ८ मि
थ्याभिनिवेशेनभुंजतइतिसहेतुकमाह अहमितित्रिभिः प्रमत्तस्यविवेकशून्यस्यदेहादावहमितिमिथ्याबुद्धिर्यथा
हृदुत्सर्पति ततोहंबुद्धिश्चवैकारिकंसत्वप्रधानमपिमनःप्रतिघोरंदुःखात्मकंरजउत्सर्पतिमनोव्याप्नोतीत्य
र्थः ९ इदमेवमिदमेवभोग्यमितिसविकल्पःसंकल्पःस्यात् ततश्चअहोरूपमहोभावइतिगुणध्यानात् दु

६८

सात्विकोपासनयात्वं वर्द्धत इत्युक्तं तानेव सत्त्ववृद्धिहेतून्दर्शयितुं सामान्यतो गुणत्रयवृद्धिहेतूनाह आ
गमः शास्त्रं अपः आपः क्वचिदागमोऽर्थ इति पाठः ७ एषु सात्विकादिनिर्णयमाह एषामेव मध्ये प्रवर्त
ते प्रशंसंति यद्यन्निंदंति निवर्त्तंते यत्तु तैर्वृद्धैरुपेक्षितं न स्तुतं न च निंदितं तद्राजसं ५ सात्विकान्येवेति निवृ
त्तिशास्त्राण्येव न तु प्रवृत्तिपाषंडशास्त्राणि तीर्थ्यापएव न गंधोदकसुराद्याः प्रजाः जनाः निवृत्तान् जनान् न प्र

आगमोऽपः प्रजा देशः कालः कर्म च जन्म च ध्यानं मंत्रोऽथ संस्कारो दशैते गुणहेतवः ४
तत्तत्सात्विकमेवैषां यद्यद्वृद्धाः प्रचक्षते निंदंति तामसं तत्तद्राजसं तदुपेक्षितं ५ सात्वि
कान्येव सेवेत पुमान्सत्वविवृद्धये ततो धर्मस्ततो ज्ञानं यावत्स्मृतिरपोहनम् ६

वृत्तदुराचारान् विविक्तदेशान्न रथ्याद्यूतदेशान् कालं ब्राह्म्यमुहूर्तादिकं ध्यानादौ न प्रदोषनिशीथादी
न् कर्म च नित्यं न काम्याभिचारादीनि जन्म वैष्णव शैव दीक्षालक्षणं न शाक्तं तु द्रादीनां रूपं ध्यानं श्रीविष्णोः
न कामिनी विद्विषां मंत्रं प्रणवादिकं न काम्य क्षुद्रादि संस्कारमात्मनः शोधकं न केवलं देहरक्षादीनां ननु
ज्ञानं महावाक्यश्रवणादेवोत्पद्यते किं तत्र सत्त्ववृद्ध्या धर्मेण वा अत आह आत्मापरोक्ष्यं यावच्च देहद्वयतत्कार

भा० ए० ६९ मानसा मनोभवाः पुत्राः सूक्ष्मां दुर्ज्ञेयां ऐकांतिकीं गतिं परां काष्ठां १६ तदेवाह गुणेष्विति विषयेषु स्वभा
वतो रागादिवशाच्चेतः प्रविशति ते चानुभूता विषया वासना रूपेण चेतसि प्रविशंति अतितितीर्षोर्विषया
नतिक्रमितुमिच्छोः १७ एवमिति महान्देवोपि स्वयंभूरपि भूतानां स्रष्टापि ध्यायमान विचारयन्नपि प्रश्न

श्रीभगवानुवाच पुत्रा हिरण्यगर्भस्य मानसाः सनकादयः पप्रच्छुः पितरं सूक्ष्मां योग
स्यैकांतिकीं गतिं १६ ॥ सनकादय ऊचुः ॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो ॥
कथमन्योन्यसंत्यागो मुमुक्षोरतितितीर्षोः ॥ १७ ॥ श्रीभगवानुवाच ॥ एवं पृष्टो महादेवः
स्वयंभूर्भूतभावनः ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः ॥ १८ ॥ स मामचिंतयद्देवः
प्रश्नपारतितीर्षया तस्याहं हंसरूपेण सकाशमगमं तदा १९ दृष्ट्वा मां त उपव्रज्य
कृत्वा पादाभिवंदनं ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भवानिति २०

स्य बीजं यदज्ञानादयं प्रश्नस्तन्नाविदत् यतः कर्मविक्षिप्तधीः १८ प्रश्नस्य पारमुत्तरमभिप्रायो वा त
स्य तितीर्षया जिज्ञासया हंसरूपेणेति यथा हंसो नीरं च पृथक्कर्तुं शक्तः एवमहं गुणांश्चेति द्योतयितुं
हंसरूपेणागतोस्मीति १९ २०

६९

ततोविषयान्भोक्तुंकर्म्माणिकरोति ११ एवंचेत्तर्हिकस्यापिदुःखनिवृत्तिःस्यादित्याशंक्याह यद्यपिरजस्तमोभ्यां विक्षिप्तधीर्मूढधीश्चतथापिविद्वान्नविवेकीरीतिपुनर्मनोनिरुंधन्नसज्जते १२ विषयेदोषदृष्ट्यापिमनोनिरोधाशक्तौसुखंतन्निरोधोपायमाह अप्रमत्तइति अनिर्विण्णः अनलसः यथाकालंत्रिषवणं मयिपर

करोतिकामवशगःकर्माण्यविजितेंद्रियः दुःखोदर्काणिसंपश्यन्रजोवेगविमोहितः ११
रजस्तमोभ्यांयदपिविद्वान्विक्षिप्तधीःपुनः अतंद्रितोमनोयुंजन्दोषदृष्टिर्नसज्जते १२
अप्रमत्तोनुयुंजीतमनोमय्यर्पयञ्छनैः अनिर्विण्णोयथाकालंजितश्वासोजितासनः १३
एतावान्योगआदिष्टोमच्छिष्यैःसनकादिभिः सर्वतोमनआकृष्यमय्यद्धावेश्यतेयथा १४
उद्धवउवाच॥ यदात्वंसनकादिभ्योयेनरूपेणकेशव योगमादिष्टवानेतद्रूपमिच्छामिवेदितुं १५

मानंदरूपेऽर्पयन्समादध्यात् १३ विषयेस्संग्रथितस्यमनसस्तद्वियोगेनेश्वरनिष्ठत्वमसंभावितंमन्यमानं प्रतितन्निरूपणायेतिहासंसमुपक्षिपति एतावानिति यथावन्मय्यावेश्यतइत्येतावानित्यर्थः १४ मच्छिष्यैरित्युक्तेतेतामतिज्यासोमनेनरूपेणासभगवान्पृच्छति तंकालेनदेतद्रूपंचवेदितुमिच्छामितिकथ

भा० ए०
७० एवंप्रश्नस्य वंदेरगमिषेणैवात्मस्वरूपं सामान्यतो निरूप्य ब्रह्मणोपि दुष्परिहारं यत्पृष्टं तत्रोत्तरमाह गुणेष्वित्यादिनायाव
दध्यायसमाप्ति अयमभिप्रायः यदि कर्तृत्वभोक्तृत्वादिरूपतया विषयैः संग्रथितं चित्तं तर्ह्योदिशद्वाच्यमेव जी
स्वरूपं भवेत् ततस्तद्विषयगोन घटेत तस्यतु स्वरूपमेहं ब्रह्मैव चित्ताध्यासेन तत्स्वभावतया विषयैः संग्रथितं
अतः स्वस्य ब्रह्मभावनया विषयाणां च मिथ्यात्वानुसंधानेन सर्वतो निवृत्य भगवंतं भजतो भवत्येव परिपूर्णस्वरू
पावस्थानमिति हे प्रजाः पुत्रकाः सत्त्व गुणेषु चेतः आविशति गुणाश्च चेतसि एवं गुणाश्चेतश्चोभयं ग्रथितं मदात्म

गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः जीवस्य देह उभयं गुणाश्चेतो मदात्मनः २५ गुणे
षु चाविशच्चित्तमभीक्ष्णं गुणसेवया गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् २६ जाग्रत्स्वप्नः सुषु
प्तं च गुणतो बुद्धिवृत्तयः तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितम् २७ ॥ ऽऽ ॥ ऽऽ

नो ब्रह्मस्वरूपस्य जीवस्य देहः अध्यात्मउपाधिः न तु स्वरूपं २५ तस्मादभीक्ष्णं पुनः पुनर्गुणसेवया तत्संस्कारेण गुणेष्वा
विशच्चित्तं ते च पुनर्वासनारूपेण चित्तप्रकर्षेण भवंतीति तथा ते गुणाश्चेतश्च एवं यदुभयं तन्मद्रूपः सन् त्यजेत् २६
ननु जाग्रदाद्यवस्थावतः कुतः कूटस्थत्वद्रूपता तत्राह जाग्रत्जागरः स्वप्नः सुषुप्तं चेति बुद्धेरेता वृत्तयः ताश्च
न स्वाभाविकाः किंतु सत्त्वादिगुणतः एवंविधा इत्यासां स्वप्नमादिशत् प्रस्तावं तमसा जन्तोस्तुरीयं त्रिषु संततमिति
वस्यमाणक्रमेण गुणतः एव जीवस्तु विलक्षणः तद्व्यस्यारहितः एव विनिश्चितः कुतस्तासां साक्षित्वेन २७ ॥ ७०

इत्यहंमुनिभिः पृष्ट इति पृथग्वाक्यं यदवोचमिति पृथक् अतोऽस्मच्छब्दावृत्तिर्न दोषः तेभ्यो यदवोचं तन्मे
वचनं निबोध: २१ देहादिविविक्तात्मज्ञाने सत्यपि तन्निष्ठस्य रागाद्यसंभवात्स्वयमेवाविषयचेतसो विश्लेषो भव
तीति वक्तुं प्रश्नखंडनमिषेणैव तावदात्मविवेकमाह वस्तुन इति त्रिभिः किमात्मनोऽयं प्रश्नः तदुपाधेर्भूतसंघस्य
वा यद्यात्मनस्तर्हि तस्य वस्तुनः परमार्थभूतस्यानानात्वे सति हे विप्रा वो युष्माभिः कृत ईदृशो वक्तुमुनिष्ठारणरूपः

इत्यहंमुनिभिः पृष्टस्तत्वजिज्ञासुभिस्तदा यदवोचमहं तेभ्यस्तदुद्धव निबोध मे २१ वस्तुनो यद्य
नानात्वे आत्मनः प्रश्न ईदृशः कथं घटेत वो विप्रा वक्तुर्वा मे क आश्रयः २२ पंचात्मकेषु भूतेषु
मानेषु च वस्तुतः को भवानिति वः प्रश्नो वाचारंभो ह्यनर्थकः २३ मनसा वचसा दृष्ट्या गृह्यते
न्यैरपीन्द्रियैः अहमेव न मत्तोऽन्यदिति बुद्ध्यध्वमंजसा २४

कथं घटेत वक्तुरुत्तरदातुर्वा मम कः आश्रयः अविशेषे आत्मनि कं जातिगुणादिविशेषमाश्रित्योत्तरं वक्ष्यामीत्यर्थः
२२ भूतसंघाद्विषयत्वेऽपि अयं वः प्रश्नो वाचारंभः वाङ्मात्रेणारब्धः यतोऽनर्थकः भूतेषु देवमनुष्यादिदेहेषु पंचभूता
त्मकेषु अतः समानेषु अभिन्नेषु पुनश्च वस्तुतः परमकारणात्मना अभिन्नेषु वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव
सत्यमिति श्रुतेः २३ तत्र पंचात्मकत्वं प्रत्यक्षादिसिद्धमेवेति परमकारणाभेदमेवोपपादयति मनसेति मनआदिभिर्य
द्गृह्यते तत्तदहमेवेत्यर्थः अंजसा तत्त्वविचारेण एतेनैव सर्वात्मकोऽहमित्यंजसा प्युत्तरमुक्तं भवति २४

युक्तिभिरित्युक्तं तामेव प्रक्रियामाह य इति अर्थान् स्थूलान् देहादीन् समस्तकरणैश्चक्षुरादिभिर्भुंक्ते कथंभूतान्
अनुक्षणधर्मिणः क्षणिकबाल्यतारुण्यादिधर्मवतः यश्च स्वप्ने हृदि जागरदृष्टसदृशान्वासनामयान्भुंक्ते
[illegible] यश्च सुषुप्ते तान्सर्वानुपसंहरति स एकः कुतः त्रिगुणवृत्तिदृक् अवस्थात्रयद्रष्टा ननु जाग्रदवस्थास
इंद्रियाणि पश्यंति स्वप्ने मनः सुषुप्तौ तत्संस्कारशेषा बुद्धिः कथमात्मा तद्द्रष्टा तत्राह इंद्रियेशः ननु इंद्रियेशोऽपि
पि विश्वतैजसप्राज्ञाभिन्नाः न कुतः स्मृत्या प्रतिसंधानेन सर्वावस्थास्वप्यन्वयात् यश्च स्वप्ने निद्रादौ यश्च तदनंत ३३

यो जागरे बहिरनुक्षणधर्मिणोऽर्थान्भुंक्ते समस्तकरणैर्हृदि तत्सदृक्षान् स्वप्ने सुषुप्त उपसंह
रते स एकः स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिंद्रियेशः ३२ एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मा
यया मयि कृता इति निश्चितार्थाः संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माखि
लसंशयाधिं ३३

रं न किंचिदवेदिषं स एवाहमिदानीं जागर्मीति उपाधिभेदेन विश्वादिव्यवहार इति भावः एतेन बाल्ययुवाद्यवस्था प्र
तिसंधानेनात्मैक्यं प्रष्टव्यं ३२ ततः किमत आह एवमिति गुणतो या मनसस्त्र्यवस्थास्ताः मदविद्यया मयि कृ
ता न तु तत्त्वतः संतीति निश्चित आत्मरूपोऽर्थो यैस्ते यूयं अखिलसंशयानामाधिं आधीयंतेऽस्मिन्नित्याधिरहं
कारस्तं संछिद्य हार्दं हृदि स्थितं मा भजत केन छित्वा तदाह अनुमानैः सदुक्तिभिः सतां गुरूपदेशैः श्रुतिभि

ननु तर्हि कथमहं जागमीत्यादिप्रतीतिस्तत्राह यर्हि यस्मात्सम्यक्सृतिः सरणमनर्थेति बुद्धिस्तयायं बंधोयमात्मनो गु
णवृत्तीर्ददाति तस्मान्मयि तुर्ये स्थितः सन्निमं संसृतिबंधं जह्यात् तत्र त्यागः गुणचेतसां गुणानां चेतसश्चा
 न्येषां त्यागो भवति २८ कथं संसृत्या बंधः कथं च तं जह्यात्तत्राह अहंकारेण कृतं बंधनं आत्मनः अर्थवि
पर्ययं आनंदावरणेनानर्थहेतुं विद्वान् जानन् सन् निर्विद्य दुःखं स्मिति ज्ञात्वा तुर्ये स्थितो भूत्वा संसारचिंतां स

यर्हि संसृतिबंधोयमात्मनो गुणवृत्तिदः मयि तुर्ये स्थितो जह्यात्त्यागस्तद्गुणचेतसां २८
अहंकारकृतं बंधमात्मनोऽर्थविपर्ययं विद्वान्निर्विद्य संसारचिंतां तुर्ये स्थितस्त्यजेत् २९
यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ३० अस
त्त्वादात्मनोऽन्येषां भावानां तत्कृता भिदा गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ३१ ॥

सारो बुद्धिः तस्मिन् चिंतां अभिमानं तत्कृतां भोगचिंतां च त्यजेदिति २९ यावदेवं न त्यजेत्तावत्तस्य कर्मज्ञानादि सर्वं
व्यर्थमित्याह यावदिति यद्यपि जागर्त्ति कर्मादिषु तथापि स्वपन् स्वप्नान् पश्यन्निव भवति यतोऽज्ञः असम्यग्द
र्शी अज्ञजागरस्य स्वप्नत्वे दृष्टांतः स्वप्न इति ३० ननु कथं वेदप्रमितवर्णाश्रमकर्मादि नानाधीर्निवर्तेत तत्राह अ
सत्त्वादिति भावानां देहादीनां तत्कृता भिदा वर्णाश्रमादिरूपा गतयः स्वर्गादिफलानि हेतवः कर्माणि अस्यात्मनो
मृषा अविद्यावद्विषयो वेद इति भावः ३१

भा० ए० ७२ ननुचयःपरिपाल्यमानोपिस्तुमृषेति तंचेन्नपश्यति तर्हिपतेद्दैवेनेत्याह देहोपीति दैववशेनगच्छन्स्वारंभकंकर्म
यावदस्तितावत्पर्यंतंप्रतिसमीक्षतएव जीवत्येवसासुः प्राणेंद्रियसहितः ननुनहितस्मिन्कदाचिदासक्तोनापि
नेत्याह तमिति स्वाप्नंस्वप्नतुल्यं अधिरूढःप्राप्तःसमाधिपर्यंतोयोगोयेन अतएवप्रतिबुद्धंज्ञातंपरमार्थवस्तु
येनसः तथाचश्रुतिः तस्यतावदेवचिरंयावन्नविमोक्ष्ये अथसंपत्स्यइति ३७ उक्तार्थेतेषांविश्वासार्थं

देहोपिदैववशगःखलुकर्मयावत्स्वारंभकंप्रतिसमीक्षतएवसासुः तंसप्रपंचमधिरूढ
समाधियोगःस्वाप्नंपुनर्नभजतेप्रतिबुद्धवस्तुः ३७ मयैतदुक्तंवोविप्रागुह्यंयत्सांख्ययो
गयोः जानीतमागतंयज्ञंयुष्मद्धर्मविवक्षया ३८ अहंयोगस्यसांख्यस्यसत्यस्यर्तस्य
तेजसः परायणंद्विजश्रेष्ठाःश्रियःकीर्तेर्दमस्यच ३९ मांभजंतिगुणाःसर्वेनिर्गुणंनि
रपेक्षकं सुहृदंप्रियमात्मानंसाम्यासंगादयोगुणाः ४०

स्वस्वरूपमाह मयेति सांख्यमात्मानात्मविवेकः योगोऽष्टांगः तयोर्गुह्यंरहस्यं यज्ञंविष्णुं यज्ञोवैविष्णुरि
तिश्रुतेः युष्मद्धर्मविवक्षयेत्यनेनधर्मा अप्युपदिष्टाइतिज्ञेयं अतएवयत्नेनहंसरूपेणब्रह्मणेभ्यात्यमाधवेत्य
नुवादोभविष्यति ३८ ऋतंप्रमीयमाणोधर्मः सत्यंअनुष्ठीयमानोधर्मः तेजःप्रभावः एतेषांपरमायनं ३९
किंच मामिति कथंभूताः अगुणाःगुणपरिणामरूपानभवंति किंतुनित्याइत्यर्थः ४० ॥ ऽऽ ॥ ऽऽ ७२

अनुमानानि दर्शयति ईक्षेतेति इदं जगद्विभ्रममीक्षेत तत्र हेतवः मनोविजृंभितत्वात् दृष्टत्वाद्विनाशित्वाच्च
स्वप्नवदिति चंचलत्वाच्च अलातचक्रवत् ननु भ्रमोपि निर्विषयः कथं स्यात्तत्राह विज्ञानमिति निगमनं त
स्मात्त्रिविधोयं गुणपरिणामकृतो विकल्पो भेदः समाप्येति ३४ यस्मादेवं विभ्रममात्रं दृश्यं तस्मात्तेषां दृश्यानां दृ
ष्टिं प्रतिनिवर्त्य निजसुखानुभवो भवेत् तन्नैश्चल्यार्थं च निवृत्ततृष्णः तूष्णीं निरीहश्च भवेत् मनोवाक्कायव्या

ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रं विज्ञानमेकमुरुधेव वि
भाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ३४ दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्णस्तूष्णीं
भवेन्निजसुखानुभवो निरीहः संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय न भवेत्स्मृति
रानिपातात् ३५ देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं दैवादपे
तमथ दैववशादुपेतं वासो यथा परिकृतं मदिरामदान्धः ३६

पारहितः इत्यर्थः ननु देहवतः सर्वथा द्वैतदृष्टिप्रतिनिवर्त्तमानायोग्यात्पुनः संसारः स्यादेव तत्राह संदृश्यत इति क्वचिदाव
श्यकाहारादिषु यद्यपीदं संदृश्यते तथापि पूर्वमवस्तुबुद्ध्या यत्त्यक्तं तत्तु न मोहाय न भवेदेव किं तु देहपातपर्यंतं स्मृति
रिवस्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः ३५ एतदेवोपपादयति देहमिति आसनादुत्थितं उत्थाय तत्रैव स्थितं तत्र
क्वचिदपेतं निर्गतं पुनस्तत्रैवोपेतं वा देहमपि नानुसंधत्ते कुरुतेऽन्यत् यतः येन देहेन स्वरूपमध्यगमत् प्राप्तवान् तं देहं

यतः कारणादिलिवा परिकृतं परिहृतं वा सोगातं स्थितं
वा यथा भवति तद्वत् ३६

भा० ११०
७३

तत्र भक्तिरेव महाफलत्वेन मुख्यान्यानि तु स्वस्वप्रकृत्यनुसारेण पुष्पस्थानीयस्वर्गादिफलबुद्धिभिः प्राणिभिः
प्राधान्येन परिकल्पितानि तुच्छकफलानीति विवेक्तुं प्रकृत्यनुसारेणैव बहुधा वेदार्थप्रतिपत्तिमाह कालेनेति त्रि
भिः मदात्मकः मय्येवात्मा चित्तं येन सः ३ भृग्वादयः भृगुश्च मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुरित्येते च स

श्रीभगवानुवाच कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां
मदात्मकः तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा ३ ततो भृग्वादयोऽगृह्णन्सप्त ब्रह्म
महर्षयः तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः मनुष्याः सिद्धगंधर्वाः सविद्याध
रचारणाः किंदेवाः किन्नरा नागा रक्षःकिंपुरुषादयः ४ बह्व्यस्तेषां प्रकृतयो रजस्सत्त्वत
मोभुवः याभिर्भूतानि भिद्यंते भूतानां मतयस्तथा ५ यथाप्रकृति सर्वेषां चित्रा वाचः
स्रवंति हि ६

प्तब्राह्मणाः प्रजापतयः ते च ते महर्षयश्च किंदेवाः क्लमस्वेददौर्गंध्यादिरहितत्वेन किंदेवा मनुष्या
एव किंनरा अश्वमुखत्वतः शरीरतो वा किंपुरुषाः किंचित्पुरुषा इव वानरादयः ४ प्रकृतयो वासना बह्व्यः
कुतः रजस्सत्वतमोभ्यो भुवो जन्मस्थानानि यासां ताः भूतानि देवासुरमनुष्यादीनि ५ चित्रा वाचः वे
दार्थव्याख्यानविषयाः ६

मे मयाऽभ्यर्च्यमानं मां तुष्टुवुः ॥४१॥ प्रत्येयाय प्रत्यागतोऽस्मि ॥४२॥ इति श्री एकादशे त्रयोदशः ॥१३॥ चतुर्दशे परं श्रेयो
भक्तिरेव नेतरत् ॥ इत्येतद्दर्श्यते ध्यानं योगश्च सह साधनैः ॥ एवं तावद्भगवता भक्त्या मोक्ष इत्युक्तं ॥ अन्ये तु अन्यानि
साधनानि वदंति ॥ तत्र विशेषनिर्द्धारणाय पृच्छति वदंतीति श्रेयांसि श्रेयःसाधनानि ॥ किं विकल्पे प्राधान्ये ॥ उ

इति मे छिन्नसंदेहा मुनयः सनकादयः ॥ सभाजयित्वा परया भक्त्याऽगृणत संस्तवैः ॥४१॥
तैरहं पूजितः सम्यक् संस्तुतः परमर्षिभिः ॥ प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ॥४२॥
॥ इति श्रीमद्भागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्धवसंवादे त्रयोदशोऽध्यायः ॥
१३॥ उद्धव उवाच ॥ वदंति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः ॥ तेषां विकल्पप्राधान्यमुताहो
एकमुख्यता ॥१॥ भवतोदाहृतः स्वामिन् भक्तियोगोऽनपेक्षितः ॥ निरस्य सर्वतः संगं येन त्वय्या
विशेन्मनः ॥२॥

ताहो किं वा एकस्यैव मुख्यता ॥१॥ एकमुख्यतापक्षे त्वयाऽनेकारणं भवतीत्यनपेक्षि
तः न अपेक्षितं अपेक्षा यस्मिन्नस्ति अहेतुकः अयमर्थः ॥ भवताऽयो भक्तियोग उक्तः ॥ अन्ये च यानि श्रेयःसाधना
नि वदंति तेषां किं साक्षात्फलसाधनत्वेन प्राधान्यत्वेन प्राधान्यमेव सर्वेषां उताङ्गांगित्वं ॥ प्राधान्येऽपि किं विकल्पे

भक्तेर्मुख्यत्वमाह मयीति यावत्समाप्ति हे सभ्य मया परमानंदरूपेण आत्मना स्वरूपत्वेन स्फुरता ११ किंच अन्येषां
तत्तल्लोकादिपरिछिन्नं सुखं भक्तस्य तु परिपूर्णमित्याह अकिंचनस्येति १२ परिपूर्णतामाह न पारमेष्ठ्यमिति
रसाधिपत्यं पातालादिस्वाम्यं अपुनर्भवं मोक्षमपि मद्विना मां हित्वा अन्यन्नेच्छति अहमेव तस्य प्रेष्ठ इत्य

मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः मयात्मना सुखं यत्तत्कुतः स्याद्विषयात्मनां ११
अकिंचनस्य दांतस्य शांतस्य समचेतसः मया संतुष्टमनसः सर्वाः सुखमया दिशः १२ न
पारमेष्ठ्यं न महेंद्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यं न योगसिद्धीरपुनर्भवं वा मय्यर्पि
तात्मेच्छति मद्विनान्यत् १३ न तथा मे प्रियतम आत्मयोनिर्न शंकरः न च संकर्षणो न
श्रीर्नैवात्मा च यथा भवान् १४ निरपेक्षं मुनिं शांतं निर्वैरं समदर्शनं अनुव्रजाम्यहं नि
त्यं पूयेयेत्यंघ्रिरेणुभिः १५

र्थः १३ ममापि स एव प्रेष्ठ इत्याह न तथेति द्वाभ्यां आत्मयोनिर्ब्रह्मा पुत्रोपि शंकरः मत्स्वरूपभूतोपि
संकर्षणः भ्रातापि श्रीर्भार्यापि आत्मा मूर्तिरपि यथा भक्त इति वक्तव्ये तिरस्करणाह भवानिति १४ ज्ञानिनं यू
यम प्रियत्वमेव दर्शयति निरपेक्षमिति पूयेयम् अंतर्वर्तिब्रह्मांडानि पवित्रीकुर्यामिति भावेनेत्यर्थः १५ ॥

एवमित्युक्तोपसंहारः केषांचिदध्ययनादिशून्यानामप्युपदेशपारंपर्य्येण अपरे पाषंडमतयो वेदविरुद्धार्थमन
सः ७ तत्र प्रकृतीनां मायागुणत्वात्तन्मायामोहितधियः अनेकांतं नानाविधं ८ तदेवाह धर्म्ममिति सार्द्धे
न धर्म्मं कर्म्ममीमांसकाः तदुक्तं मोक्षार्थी न प्रवर्त्तेत तत्र काम्यनिषिद्धयोः नित्यनैमित्तिके कुर्य्यात्प्रत्यवायजि
हासयेत्यादि यशः काव्यालंकारकृतः यथाहुः यावत्कीर्त्तिर्मनुष्याणां पुण्या लोकेषु गीयते तावद्वर्षसहस्त्रा

एवंप्रकृतिवैचित्र्याद्भिद्यंते मतयो नृणां पारंपर्य्येण केषांचित्पाषंडमतयोपरे ७ मन्मा
यामोहितधियापुरुषापुरुषर्षभ श्रेयो वदंत्यनेकांतं यथाकर्म्म यथारुचि ८ धर्म्ममेके
यशश्चान्ये कामं सत्यं दमं शमं अन्ये वदंति स्वार्थं वा ऐश्वर्य्यं त्यागभोजनं केचिद्यज्ञं त
पोदानं व्रतानि नियमान्यमान् ९ आद्यंतवंत एवैषां लोकाः कर्म्मविनिर्म्मिताः दुःखोद
र्कास्तमोनिष्ठाः क्षुद्रानंदाः शुचार्पिताः १०

णि स्वर्गलोके महीयत इति कामं वात्स्यायनादयः सत्यं दमं शमं च योगशास्त्रकृतः अन्ये इष्टार्थवादिनः दंडनी
तिकृतः वै प्रसिद्धमैश्वर्य्यमेव स्वार्थं पुरुषार्थं वदंति अन्ये सामाद्युपाया एव श्रेयःसाधनमिति तेषां मतं तथैव त्यागं
भोजनं च लोकायतिकाः यज्ञं तपो दानं यज्ञो देवतानां पूजनं तपश्च दानं च ९ तेषां तुच्छफलत्वमाह आद्यंतवंत इति
एषां लोकाः एतैः साध्यानि फलानि तमोनिष्ठाः मोहावसानाः भोगकालेपि असूयादिभिः शुचार्पिता व्याप्ताः १०

श्रद्धयाभक्तिस्त्वयासंभवात् जातिदोषादपीत्यर्थः २० भक्त्यभावेऽन्यत्साधनंव्यर्थमित्याहद्वाभ्यांधर्मइति २१
रोमहर्षादिकंविनाकथंभक्तिर्गम्यते भक्त्याचविनाकथमाशयःशुध्येदिति २२ किंच भक्तिःस्वाशयंशोधय
तीतिकिंवक्तव्यं यतोगद्गदवागादिलक्षणोमद्भक्तियुक्तोलोकंसर्वंपुनातीत्याह वागिति २३ अपिचभक्त्यैवा

भक्त्याहमेकयाग्राह्यःश्रद्धयात्माप्रियःसतां भक्तिःपुनातिमन्निष्ठाश्वपाकानपिसंभवात्
२० धर्मःसत्यदयोपेतोविद्यावातपसान्विता मद्भक्त्यापेतमात्मानंनसम्यक्प्रपुनातिहि २१ कथं
विनारोमहर्षंद्रवताचेतसाविना विनानंदाश्रुकलयाशुद्ध्येद्भक्त्याविनाशयः २२ वाग्गद्गदाद्रवतेय
स्यचित्तंरुदत्यभीक्ष्णंहसतिक्वचिच्च विलज्जउद्गायतिनृत्यतेच मद्भक्तियुक्तोभुवनंपुनाति २३
यथाग्निनाहेममलंजहातिध्मातंपुनःस्वंभजतेचरूपं आत्माचकर्मानुशयंविधूयमद्भक्ति
योगेनभजत्यथोमाम् २४

त्मशुद्धिर्नान्यतएवेति सदृष्टांतमाह यथेति यथाग्निनाध्मातंतापितहेमंस्त्ववर्णंश्वेतमर्मलंजहा
नक्षालनादिभिःस्वंनिजंरूपंभजते कर्मानुशयंकर्मवासनां मांभजते मद्रूपतामाप्रपद्यते २४

किंच मद्भक्तानां सुखमेतावदेवंभूतमिति वाक्येन वक्तुं समर्थः यतस्तत्स्वसंवेद्यं निरूपममित्याह निष्किंचना इति महां
तो निरहंमानाः अनालब्धधियः अस्पृष्टचित्ताः निष्किंचनत्वादीनां यथोत्तरं हेतुहेतुमद्भावः एवंभूता मदीया यत्सु
खं जुषन्ति सेवन्ते तत्सुखं त एव विदुः नान्ये कुतः नैरपेक्ष्यं नास्त्यपेक्षणीयं येषां ते निरपेक्षाः तैरेव लभ्यं ननु मोक्षापेक्षै
रपीत्यर्थः यद्वा एवंभूताः संतो ये मम मामित्यर्थः जुषन्ति प्रीणन्ति त एव तन्नैरपेक्ष्यं सुखं तद्विदुर्नान्य इत्यन्वयः

निष्किंचना मय्यनुरक्तचेतसः शान्ता महान्तोऽखिलजीववत्सलाः कामैरनालब्धधियो जुषन्ति
यत्तन्नैरपेक्ष्यं न विदुः सुखं मम १६ बाध्यमानोऽपि मद्भक्तो विषयैरजितेन्द्रियः प्रायः प्रगल्भया भ
क्त्या विषयैर्नाभिभूयते १७ यथाग्निः सुसमृद्धार्चिः करोत्येधांसि भस्मसात् तथा मद्विषया भ
क्तिरुद्धवैनांसि कृत्स्नशः १८ न साधयति मां योगो न सांख्यं धर्म उद्धव न स्वाध्यायस्तपस्त्यागो यथा भक्ति
र्ममोर्जिता १९

१६ अपिच आस्तां तावदुत्तमभक्तकथा यतः प्राकृतोऽपि भक्तः कृतार्थ एवेत्याह बाध्यमान इति द्वाभ्याम् विषयैराकृ
ष्यमाणोऽपि प्रगल्भया समर्थया १७ पाकाद्यर्थं प्रज्वालितोऽप्यग्निर्यथा काष्ठानि भस्मीकरोति तथा रागादिनापि कृ
यं चिन्मद्विषया सती भक्तिः समस्तपापानीति भगवानपि स्वभक्तिमहिमाश्चर्येण संबोधयति अहो उद्धवेति विस्मयं
ष्टिवति १८ अत एवंभूतं श्रेयो नान्यदस्तीत्याह न साधयतीति द्वाभ्यां १९ ॥

भा॰ ए॰ ७६ एतदुपपादयति नतथेति अस्य पुंसो यथा तत्संगिसंगतः क्लेशो भवेत् यथा च बंधो योषित्संगतस्तथान्यप्रसं
गतो न भवेदिति २९ मांचिंतयेदित्युक्तं तत्प्रकारं पृच्छति यथेति ध्यानेन प्रश्नः यादृशमिति ध्येयविशेषणप्रश्नः
यदात्मकमिति यस्यैतानि विशेषणानि तत्स्वरूपप्रश्नः एतन्मे ध्यानं वक्तुमर्हसीति पाठः तत्रायमर्थः मुमुक्षुस्त्वां य
था ध्यायेत्तन्मे वक्तुमर्हसि जिज्ञासोः कथनाय मे पुनरेतत्वद्दास्यमेव पुरुषार्थः न तु ध्यानेन कृत्यमस्तीति तदुक्तं व

न तथास्य भवेत्क्लेशो बंधश्चास्यप्रसंगतः योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः २९ उद्ध
वउवाच ॥ यथा त्वामरविंदाक्ष यादृशं वा यदात्मकं ध्यायेन्मुमुक्षुरेतन्मे ध्यानं मे वक्तुमर्हति ३० व२
श्रीभगवानुवाच ॥ सम आसीन आसीनः समकायो यथासुखं हस्तावुत्संग आधाय स्वनासाग्र
कृतेक्षणः प्राणस्य शोधयेन्मार्गं पूरककुंभकरेचकैः ३१ विपर्ययेणापि शनैरभ्यसेन्निर्जि

योपभुक्तस्रग्गंधेत्यादि त्वं वक्तुमर्हसीति पाठः सुगमः ३० तत्र ध्यानत्वेनासनप्राणायामप्रका तेंद्रियः ३२
रमाह सम इति चतुर्भिः समे नात्युच्छ्रिते नातिनीचे आसने कंबलादौ समकायः सन् यथासुखमासीन इति स्वस्ति
क४ कादि नियम उक्तः नासाग्रनिरीक्षणं च चित्तस्थैर्याय अंतर्लक्ष्यो वहिर्दृष्टिः स्थिरचित्तः सुसंयत इति योगशास्त्रोक्तेः
३१ विपर्ययेण रेचकपूरककुंभकक्रमेणापि यद्वा वामनासापूरितं दक्षिणया त्यज्येत दक्षिणया च पूरितं वामया त्यजेदेवं
विपर्ययेणाय यथोक्तं योगशास्त्रे इडया पूरयेद्वायुं त्यजेत्पिंगलया ततः इति जितेंद्रिय इति प्रत्याहार उक्तः ३२ ७६

ननु ब्रह्मविदाप्नोति परं तमेव विदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभ्यो ज्ञानादेवाविद्यानिवृत्त्या त्वत्प्राप्तिरवगम्यते कुतो योगेनेत्युच्यते तत्राह यथा यथेति आत्मा चित्तं परिमृज्यते शोध्यते मत्पुण्यगाथानां श्रवणैरभिधानैश्च भक्तैरवांतरव्यापारो ज्ञानं न पृथगित्यर्थः २४ किंच ज्ञानं नाम चित्तस्य मदाकारपरिणामः स चैवं मा

यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः तथा तथा पश्यति तत्त्वसूक्ष्मं
चक्षुर्यथैवांजनसंप्रयुक्तं २५ विषयान्ध्यायतश्चित्तं विषयेषु विसज्जते मामनुस्मरतश्चित्तं
मय्येव प्रविलीयते २६ तस्मादसदभिध्यानं यथास्वप्नमनोरथं हित्वा मयि समाधत्स्व म
नो मद्भावभावितं २७ स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान् क्षेमे विविक्त आसीन
श्चिंतयेन्मामतंद्रितः २८

भजतः स्वभावत एवं भवति न च यत्नांतरमपेक्षत इति सदृष्टांतमाह विषयानिति २६ यस्मादन्यत्साधनं तत्फलेन स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्तद्धित्वा मय्येव मनः समाहितं कुर्विति प्रकरणार्थमुपसंहरति तस्मादिति मद्भावभावितं मद्भावेन मद्भजनेनैव शोधितं २७ विशेषतो वा त्यायनाद्युक्तकामस्य मार्गः परित्याज्या इत्याह स्त्रीणामिति आत्मवान् धीरः सन् क्षेमे निर्भये देशे विविक्ते विजने २८ ॥ ६६ ॥ ६६

भा० ए० समानयोः कर्णयोर्विन्यस्ते स्फुरंती मकरकुंडले यस्मिंस्तत् श्रीवत्सश्रियो निकेतनं वक्षसि दक्षिणवामतस्ता
७७ भ्यां युक्तमित्यर्थः ॥ द्युमद्भिः किरीटादिभिः आ समंताद्युतं अलंकृतं प्रसादेन शोभनमुखमीक्षणं च यस्
मिंस्तत् सुकुमारं अतिकोमलं ॥ ३७ सविशेषणं ध्यानमुपसंहरति इंद्रियाणीति प्रकर्षेण नयेत् सर्वतः

समानकर्णविन्यस्तस्फुरन्मकरकुंडलं हेमांबरं घनश्यामं श्रीवत्सश्रीनिकेतनं ॥ शंखचक्र
गदापद्मवनमालाविभूषितं नूपुरैर्विलसत्पादं कौस्तुभप्रभया युतं द्युमत्किरीटकटक
कटिसूत्रांगदायुतं सर्वांगसुंदरं हृद्यं प्रसादसुमुखेक्षणं सुकुमारमभिध्यायेत्सर्वांगेषु म पु ३
नो दधत् ॥ ३७ इंद्रियाणींद्रियार्थेभ्यो मनसाकृष्य तन्मनः बुद्ध्या सारथिना धीरः प्रण
येन्मयि सर्वतः ३८ तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत् नान्यानि चिंतयेद्भूयः सुस्मितं
त्र २
भावयेन्मुखम् ३९

सर्वांगयुक्ते ३८ यादृशमित्यस्योत्तरत्वेन सविशेषणमुक्त्वा यदात्म
कमित्यस्योत्तरत्वाय पुनर्विशेषणत्यागेन ध्यानमेव समाधिपर्यंतमाह तदिति त्रिभिः एकत्रांगे
ऽन्यान्यंगानि न चिंतयेत् एकत्रेति यदुक्तं तदेवांगं दर्शयति सुस्मितमिति ३९ रामराम रामरा ७७

प्राणायामो द्विविधः सगर्भो ऽगर्भश्चेति तत्र श्रेष्ठत्वात्प्रणवगर्भमाह हृदीति द्वाभ्यां मूलाधारादारभ्य अविछि
न्नं संततं घंटानादतुल्यमोंकारं हृदि स्थितं प्राणेन उदीर्य ऊर्ध्वं द्वादशांगुलपर्यंतं नीत्वा कथं विसोणवत्कमल
नालतंतुवत् तत्र मात्रातीतेस्वरं पंचदशं विंदुसंज्ञो वयेत् अथपुनरित्यस्यांते चविंदुशिरस्कं कुर्यादित्यर्थः
यद्वा मूलाधारादारभ्य मूर्द्धांतपर्यंतं विसृतं तंतुवत् सूक्ष्ममविछिन्नं संततं हृदि मनसि प्राणेनोदीर्याभिव्यज्य

हृद्यविछिन्नमोंकारं घंटानादं विशोणवत् प्राणेनोदीर्य तत्राथ पुनः संवेशयेत्स्वरं ३३
एवं प्रणवसंयुक्तं प्राणमेवसमभ्यसेत् दशकृत्वस्त्रिषवणं मासाद्वा गिजतानिलः ३४ हृत्पुं
डरीकमंतस्थमूर्द्धनालमधोमुखं ध्यात्वोर्द्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकं कर्णिकायां न्य
सेत्सूर्यसोमाग्नीनुत्तरोत्तरं ३५ वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलं समं प्रशांतं सुमुखं
दीर्घचारुचतुर्भुजं सुचारुसुंदरग्रीवं सुकपोलं शुचिस्मितं १

अथ पुनस्तं ओंकारं घंटानादतुल्यं स्वरं उदात्तं नादं स्थिरीकुर्यादिति ३३ मासाद्वा जितो ऽनिलो भवति ३४ एवं ध्यानांग
मुक्त्वापाह्यमित्यस्यान्तरंगं ध्येयरूपमाह हृत्पुंडरीकमिति सार्द्धेन अंतःस्थं देहांतरवर्तिनं ऊर्द्ध्वनालमधोमुखं मुकु
लितं कदलीपुष्पसंकाशं यस्तित् तद्विपरीतं ध्यात्वेत्यर्थः न्यसेत् चिंतयेत् ३५ सविशेषणं ध्यानमाह वह्निमध्य इति सा

ष्टः ध्यानमंगलं ध्यानस्य शुभं विषयं समं अनुरूपावयवं
दीर्घाश्चारवश्चत्वारो भुजा यस्मिन्स्तत् सुचारु अतिरम्यं १

स्विदितिवितर्के कास्वित् किंनामा कथंस्वित्कीदृशीवा. धारणास्य कृतेति प्रश्नांतरंवा शब्दः त्वमेवैतज्जानासि नान्यइत्या
शयेनाह योगिनामिति २ धारणाश्चाष्टादशेत्यनुषंगः योगपारगैरिति त्रिकालज्ञत्वादि क्षुद्राःसिद्धीरन्येपिजानंतीतिभा
वः अहमेवप्रधानंमुख्यःस्वभावतः आश्रयोयासांताः मत्सारूप्यप्राप्तेषु किंचिन्न्यूनाभवंतीतिभावः गुणहेतवः सत्वोत्कर्षहे
तुकाः ३ ताःस्वरूपेणोपदिशति अणिमेति सार्द्धैःपंचभिः अणिमामहिमालघिमाचमूर्तेर्देहस्येतितिस्रःसिद्धयः
प्राप्तिर्नामसिद्धिःसर्वप्राणिनामिंद्रियैःसहतत्तदधिष्ठातृदेवतारूपेणसंबंध इत्यर्थः श्रुतेषुपारलौकिके

उद्धव उवाच ॥ कयाधारणया कास्वित्कथंवासिद्धिरच्युत कतिवासिद्धयोब्रूहि योगिनांसि
द्धिदोभवान् ॥१॥ श्रीभगवानुवाच ॥ सिद्धयोष्टादशप्रोक्ता धारणायोगपारगैः तासामष्टौम
त्प्रधाना दशैवगुणहेतवः ३ अणिमामहिमामूर्तेर्लघिमाप्राप्तिरिंद्रियैः प्राकाश्यंश्रुतदृ
ष्टेषु शक्तिप्रेरणमीशिता गुणेष्वसंगोवशिता यत्कामस्तदवस्यति एतामेसिद्धयःसौम्य
अष्टावौत्पत्तिकामताः ५

षु दृष्टेषु दर्शनयोग्येष्वपि सर्वेषु भूविवरादिपिहितेष्वपि प्राकाश्यं भोगदर्शनसामर्थ्यसिद्धिः शक्तीनां मायायास्तदंश
भूतानां प्रेरणं तत्रेश्वरे मायायाः अन्येषु तदंशानां प्रेरणमीशितानाम सिद्धिः विषयभोगेष्वसंगो वशिता सिद्धिः
यत्कामः यद्यत्सुखं कामयते तत्तदवस्यति तस्य तस्य सीमानं प्राप्नोतीत्यमी सिद्धिः औत्पत्तिकाः स्वाभाविकाः नि

व्योम्नि सर्वकारणरूपे तच्च कारणत्वमपि त्यक्त्वा मदारोहः मयि शुद्धे ब्रह्मणि आरूढः सन् किंचित् ध्यातृध्येय
विभागमपि न चिंतयेत् ४० मामेवात्मनि विचष्टे आत्मानं च सर्वात्मनि मयि संयुतं विचष्टे ज्योतिर्ज्योतिषि सं
युक्तमिवेत्यन्वयः ४१ एवंभूतस्य समाधिपर्यंतध्यानस्य फलमाह ध्यानेनेति मनो युंजतः समादधतः इ

वे३

तत्र स्वरूपं चित्तमाकृष्य व्योम्नि धारयेत् तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतयेत् ४० ५
ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः ४२
इति श्रीमद्भागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्धवसंवादे चतुर्दशोऽध्यायः ॥१४॥ श्रीभग
वानुवाच ॥ जितेंद्रियस्य युक्तस्य जितश्वासस्य योगिनः मयि धारयतश्चेत उपतिष्ठंति सिद्धयः १
(मुल.) १ एवं समाहितमतिर्मामेवात्मानमात्मनि विचष्टे मयि सर्वात्मन् ज्योतिर्ज्योतिषि संयुतं ॥४१॥ मुले १

द्रव्यज्ञानक्रियाभ्रमः अधिभूताधिदैवाध्यात्मरूपः दृश्यद्रष्टृदर्शनरूपो वा भ्रमः निर्वाणं शांतिं संयास्यतीति ४२
इति श्री एकादशे चतुर्दशः ॥१४॥ ततः पंचदशे प्रोक्ताः सिद्धयो धारणानुगाः श्रीविष्णुपदसंप्राप्तावंतरायतया मताः एवं म
नो युंजतो योगिनोऽन्तराविर्भवंत्यः सिद्धयोऽपि अंतरायप्रापाय एव अतस्ताः परिहृत्य परमेश्वरपर एव भवेदिति वक्तुं
सिद्धीराह जितेंद्रियस्येति युक्तस्यास्थिरचित्तस्य १

भा० ए०
७९

वाय्वादिभूतानां ये परमाणवः तन्मये तदुपाधौ चित्तं मयि रंजयन् योगी कालसूक्ष्मार्थतां कालपरमाणुरूपा
धिरूपतामिति लघुत्वविवरणं तदुक्तं स कालः परमाणुर्वै यो भुंक्ते परमाणुतामिति ९ वैकारिकाहंका
रोपाधौ मयि अखिलमेकाग्रं आत्मत्वमधिष्ठातृत्वं अत्र हेतुः मन्मनाः मयि मनोधारणाप्रभावादेवं भवति
नान्यातीव हेतुरनुसंधेय इति भावः एवं मद्धारणानुभावेन मद्योगबलमाश्रय इत्यादिषु द्रष्टव्यं १० क्रिया

परमाणुमये चित्तं भूतानां मयि रंजयन् कालसूक्ष्मार्थतां योगी लघिमानमवाप्नुयात् ९
धारयन्मय्यहंतत्वे मनो वैकारिके ऽखिले सर्वेंद्रियाणामात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः
१० महत्यात्मनि यः सूत्रे धारयेन्मयि मानसं प्राकाश्यं पारमेष्ठ्यं मे विंदते ऽव्यक्तजन्मनः
११ विस्नौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे स ईशित्वमवाप्नोति क्षेत्रक्षेत्रज्ञचोदनां १२

शक्तिप्रधानं महत्तत्वमेव सूत्रं तदुपाधौ मयि स मे पारमेष्ठ्यं सर्वोत्कृष्टं प्राकाश्यं विंदते कथंभूतस्य
मे अव्यक्तात् जन्म यस्य तस्य सूत्रस्य तदुपाधेर्ममेत्यर्थः ११ त्र्यधीश्वरे त्रिगुणमायानियंतरि अतएव
कालविग्रहे आकलयितृरूपे अंतर्यामिणि ईशित्वं विशिनष्टि क्षेत्रज्ञानां जीवानां क्षेत्राणां तदुपाधीनां च
चोदनां प्रेरणं न तु विसृष्ट्यादिकर्तृत्वलक्षणमित्यर्थः १२

गुणहेतुसिद्धीराह अनूर्मिमत्वं क्षुत्पिपासादेराहित्यं दूरश्रवणं दर्शनं चेति देहे सिद्धीः मनोवेगेन देहस्य
गतिः कामितरूपप्राप्तिः परकायप्रवेशः १ स्वेच्छामृत्युः अप्सरोभिः सह देवानां याः क्रीडास्तासामनुदर्शनं
प्राप्तिः संकल्पानुरूपप्राप्तिः अप्रतिहता आसमंताद्गतिर्यस्याः शास्त्राज्ञा चरत्येतादृशः २ क्षुद्रसिद्धीराह
त्रिकालज्ञत्वमिति अद्वंद्वं शीतोष्णाद्यनभिभवः अग्न्यादीनां संस्तंभनं ३ ४ ५ तत्र धारणाभिः स

अनूर्मिमत्वं देहेऽस्मिन्दूरश्रवणदर्शनं मनोजवः कामरूपं परकायप्रवेशनं १ स्वच्छंदमृ
त्युर्देवानां सहक्रीडानुदर्शनं यथासंकल्पसंसिद्धिराज्ञा प्रतिहता गतिः २ त्रिकालज्ञत्वम
द्वंद्वं परचित्ताद्यभिज्ञता अग्न्यर्कांबुविषादीनां प्रतिष्टंभोऽपराजयः ३ एताश्चोद्देशतः प्रो
क्ता योगधारणसिद्धयः ४ ५ यया धारणया या स्याद्यथा वा स्यान्निबोध मे ६ भूतसूक्ष्मा
त्मनि [illegible]मयि तन्मात्रं धारयेन्मनः अणिमानमवाप्नोति तन्मात्रोपासको मम ७ महत्त्वा
त्मन्मयि परे यथासंस्थं मनो दधत् महिमानमवाप्नोति भूतानां च पृथक्पृथक् ८

हविशेषतो निरूपयति यस्येति या यत्समाप्तिः ६ भूतसूक्ष्मोपाधौ मयि तन्मात्रं भूतसूक्ष्माकारं सतन्मात्रोपा
सकः मम मदीयमणिमानं ७ ज्ञानशक्तिमहत्तत्त्वोपाधौ मयि यथासंस्थं महत्तत्त्वाकारं भूतानां
चेति आकाशादिभूतोपाधौ च मयि मनो धारयन् तत्तद्भूतमहिमानं प्राप्नोतीत्यर्थः ८

भा० ९० ८० मनो देहं च तदनुवर्तिना वायुना सह मयि सुसंयोज्य या मद्धारणा क्रियते तस्याः प्रभावेन यत्र मनो याति तत्रा
त्मा देहोपि यातीत्यर्थः यद्वा मनः कर्तृ आत्मानं वायुना सह देहं च मयि सुसंयोज्य यत्र याति तदनु तत्र देहो
यातीति १८ मनः उपादाय उपादानकारणं कृत्वा यद्यद्देवादिरूपं भवितुमिच्छति तत्तन्मनोभीष्टं रूपं
योगी भवेत् कुतः यतो मद्योगबलं यो ऽहमचिंत्यशक्तिर्ज्ञानाकारस्तस्मिन्मयि मनसो योगो धारणा तस्य बलं

मनो मयि सुसंयोज्य देहं तदनुवायुना मद्धारणानुभावेन तत्रात्मा यत्र वै मनः १८ य
दा मन उपादाय यद्यद्रूपं बुभूषति तत्तद्भवेन्मनोरूपं मद्योगबलमाश्रयः १९ पर
कायं विशन्सिद्ध आत्मानं तत्र भावयेत् पिंडं हित्वा विशेत्प्राणो वायुभूतः षडंघ्रिवत् २०
पार्ष्ण्यापीड्य गुदं प्राणं हृदुरःकंठमूर्द्धसु आरोप्य ब्रह्मरंध्रेण ब्रह्म नीत्वोत्सृजेत्तनुं २१ ॥

प्रभावः स एवाश्रयः कारणं १९ यत्र प्रविविक्षति ततः पिंडं स्वदेहं हित्वा प्राणः प्राणप्रधानलिंगशरीरोपाधि
र्जीवो वायुभूतः बाह्यवायौ भूतः प्रविष्टः तेन मार्गेणेत्यर्थः षडंघ्रिवत् भृंगो यथा पुष्पात्पुष्पांतरमनायासेन
प्रविशति तद्वत् २० पिंडं हित्वेत्युक्तं तत्प्रकारं कथयन् स्वच्छंदमृत्युमाह पार्ष्ण्या पार्ष्णिना गुदं निरुध्य प्राणं
प्राणोपाधिमात्मानं ब्रह्मरंध्रेण मूर्द्धद्वारेण ब्रह्मेत्युपलक्षणं ब्रह्म वा अन्यद्वा अपेक्षितं स्थानं मनसा नीत्वा २१ ८०

तुरीयाख्येविराड्हिरण्यगर्भश्चकारणंचेत्युपाधयः ईशस्ययत्त्रिभिर्हीनंतुरीयंतत्पदंविदुरिति एवंलक्षणेऐश्वर्य
स्यसमग्रस्यधर्मस्ययशसःश्रियः ज्ञानवैराग्ययोश्चैवषण्णांभगइतीरणा तद्वतिभगवच्छब्दशब्दिते १३ यत्रप
रमानंदरूपेसर्वोपिकामस्तदंशभूतोऽवसीयतेसमाप्यतेतं १४ अतःपरंगुणहेतुकाःसिद्धीराह श्वेतेसत्वात्म
केश्वेततांशुद्धरूपतां १५ आकाशात्मायःप्राणःसमष्टिरूपस्तद्रूपेमयिमनसाघोषंनादंचिंतयन् असौहंसोजी

नारायणेतुरीयाख्येभगवच्छब्दशब्दिते मनोमय्यादधद्योगीमद्धर्मावशितामियात् १३
निर्गुणेब्रह्मणिमयिधारयन्विशदंमनः परमानंदमाप्नोतियत्रकामोऽवसीयते १४ श्वे
तद्वीपपतौचित्तंशुद्धेधर्ममयेमयि धारयन्श्वेततांयातिषडूर्मिरहितोनरः १५ मय्या
काशात्मनिप्राणेमनसाघोषमुद्वहन् तत्रोपलब्धाभूतानांहंसोवाचःशृणोत्यसौ १६ चक्षु
स्त्वष्टरिसंयोज्यत्वष्टारमपिचक्षुषि मांतत्रमनसाध्यायन्विश्वंपश्यतिसूक्ष्मदृक् १७

वस्तत्राकाशेउपलब्धाज्ञातासन् तत्रस्थाःविचित्रावाचःशृणोति यद्वा तत्राकाशेउपलब्धाअभिव्यक्ता
याभूतानांवाचस्तादूरतःशृणोतीति १६ दूरश्रवणमुक्त्वादूरदर्शनमाह त्वष्टाआदित्यः तस्मिन्नपरिच्छि
न्नेचक्षुःसंयोज्यतंचचक्षुषिसंयोज्यतत्रोभयसंयोगेमांध्यायन्विश्वंदूरतःपश्यति १७ ॥ ऽऽ ॥ ७॥

भा० ए०
८१

मद्भिम्न् तीर्मेमावतारान् ध्वजादिभिः सह २७ उपसंहरति उपासकस्येति एवं इत्थं धारणाभिः २८ यद्वा किंनाना
धारणाप्रयासेन एकयैव सर्वाः सिद्धयो भवंतीत्याह जितेंद्रियस्येति मद्धारणां नारायणे तुरीयाख्ये इत्यत्रोक्ता
मया सुदुर्लभा स्यात् सा का न काचिदित्यर्थः २९ यद्यप्येवं तथापि न प्राप्योऽइत्याह अंतरायानिति ३० तस्माद
हैतुकी मे धारणा कार्या नान्या काम्येत्याह जन्मेति जन्मनैव काश्चित्सिद्धयोऽति यथा देवानां यथा च यादसामु

मद्भिम्न् तीरभिध्यायन् श्रीवत्सास्त्रविभूषिताः ध्वजातपत्रव्यजनैः स भवेदपराजितः २७ उपास
कस्य मामेवं योगधारणया मुनेः सिद्धयः पूर्वकथिता उपतिष्ठंत्यशेषतः २८ जितेंद्रियस्य दांतस्य जि
तश्वासात्मनो मुनेः मद्धारणां धारयतः का सा सिद्धिः सुदुर्लभा २९ अंतरायान्वदंत्येता युंजतो योग
मुत्तमं मया संपद्यमानस्य कालक्षपणहेतवः ३० जन्मौषधितपोमंत्रैर्यावतीरिह सिद्धयः योगेना
प्नोति ताः सर्वा नान्यैर्योगगतिं व्रजेत् ३१ सर्वासामपि सिद्धीनां हेतुः पतिरहं प्रभुः अहं योगस्य सांख्य
स्य धर्मस्य ब्रह्मवादिनां ३२

हृकस्तंभः पक्ष्यादीनां खेचरत्वादि तदुक्तं पातंजले जन्मौषधितपो
मंत्रयोगजाः सिद्धय इति योगेन मद्धारणामित्युक्तेन योगगतिं मत्सालोक्यादिरूपां ३१ कुत इत्यत आह सर्वासामित्यर्द्धे
न प्रभुत्वोपपादनमहेतुकारणं पतिः पालयिता चेति किंच न केवलं सिद्धीनामेव प्रभुः अपितु मोक्षादीनामपीत्या
ह अहमिति योगो मोक्षः सांख्यं तत्साधनं ज्ञानं धर्मस्तदुपदेष्टृणां ब्रह्मवादिनां

मत्स्थंमन्मूर्त्तिरूपंमुद्धंसत्त्वंविचिंतयेत् तदासत्त्ववृत्तयः सर्वाशभृताः २२ यदावात्रकालेपियथावेतिपाठेयथा
वायेनप्रकारेणबुद्ध्यासंकल्पयेत् तत्तथाप्राप्नोतीत्यर्थः पद्यं यथासंकल्पयेत् यथावामत्परः मयिविश्वासवान्
भवतितथातदनुरूपंसर्वंप्राप्नोतीत्यर्थः किंकुर्वन् सत्येसत्यसंकल्पेमयिमनोयुंजन् २३ मदितिपृथक्पदं
दंममेत्यर्थः ईशितुःस्वतंत्रस्यममभावंस्वभावंप्राप्तः २४ एतागुणहेतवः दुर्द्धाःधारणाविदइतित्रिका

विहरिष्यन्सुराक्रीडमत्स्थंसत्त्वंविभावयेत् विमानेनोपतिष्ठंतिसत्त्ववृत्तीःसुरस्त्रियः २२
यथासंकल्पयेद्बुद्ध्यायदावामत्परःपुमान् मयिसत्येमनोयुंजंस्तथातत्समुपाश्नुते २३ योवै
त३ मद्भावमापन्नईशितुर्वशितुःपुमान् नकुत्श्चिद्विहन्येततस्यचाज्ञायथामम २४ मद्भक्त्याशु
द्धसत्त्वस्ययोगिनोधारणाविदः तस्यत्रैकालिकीबुद्धिर्जन्ममृत्यूपबृंहिता २५ अग्न्यादिभिर्न
हन्येतमुनेर्योगमयंवपुः मद्योगश्रांतचित्तस्ययादसामुदकंयथा २६

लक्षेम्बरधारणासूचिता त्रैकालिकीत्रिकालवस्तुविषयाचजन्ममृत्युभ्यामुपबृंहितातत्सहिता अनयेवपरचि
त्ताद्यभिज्ञतापिव्याख्याता २७ अग्न्यादिसर्वोपघातशून्योभगवानित्येवंभूतयोगमयंतैर्नाभिभूयते अत्रहे
तुः मद्योगेति यादसामुदकंयथाऽभिघातकंनभवति तथातस्यवपुषोऽग्न्यादयइत्यर्थः अनयैवाऽद्वंद्वताऽपिव्या

भा० ११ संसारासंभवप्रश्नेतन्मध्येदत्तमुत्तरं तदशक्त्यापुनःप्रश्नेभक्तियोगोपसंहृतिः एवंप्रश्नोत्तराण्यत्रक्रमेणै
८२ तानिविंशतिः अहमात्मा॰ तत्रोद्धवाद्योनाहृतः सर्वदेहिनां यथाभूतानिभूतेषुवहिरंतःस्वयंतथेत्युक्तं तत्रभूता
नियथाकचित्केनचिद्गुणविशेषेणोद्रिक्तानिवर्त्तंते कचित्सामान्यरूपेणैवतथात्वमपिकिंकथंवृत्तं सइतिविभूतीः
अ० १६ प्रष्टुंतावदुक्तमेवसर्वात्मकमनुवदति त्वंब्रह्मेति अनावृतंनिरावरणं स्वतंत्रंवा अतएवसर्वेषामपिप्राणि
स्थितिर्जीवनं त्राणंस्थितिसंहितौ अप्ययोऽवसायस्मात्सत्वंउपादानकारणमित्यर्थः १ अत्रसदाचारप्रमाण

उच्चावचेषुभूतेषुदुर्ज्ञेयमकृतात्मभिः उपासतेत्वांभगवन्यथातथ्येनब्राह्मणाः २ येषुये
षुचभावेषुभक्त्यात्वांपरमर्षयः उपासीनाःप्रपद्यंतेसंसिद्धिंतद्वदस्वमे ३ गूढश्चरसिभूता
त्माभूतानांभूतभावन नत्वांपश्यंतिभूतानिपश्यंतंमोहितानिते ४

माह याथातथ्येन यथार्थत्वेनसर्वभूतकारणंत्वां ब्राह्मणावेदतात्पर्यविदः २ एवंकारणत्वेन
सर्वात्मनत्वमनूद्य विभूतीःपृच्छति येष्विति उपासीनाःसेवमानाःसंतः ३ दुर्ज्ञेयत्वमेवाह
गूढः अस्फुटः भूतानांप्राणिनांमध्ये अत्रहेतुः भूतानामात्मा अंतर्यामी अत्रापिहेतुः हेभूत
भावनेति नत्वया ४

८२

कुतस्तत्राह अहमिति सर्वदेहिनांजीवानामात्मायतः अंतरः अंतर्यामी एषस्तआत्मांतर्यामम्यमृत इतिश्रुतेः तर्हिकिं
मंतर्वर्तित्वात्परिच्छिन्नः न वाह्यश्चव्यापकइत्यर्थः तत्रहेतुः अनावृतः एतत्सहृष्टांतमाह भूतेषुचतुर्विधेषुम
हाभूतानियथावहिरंतश्चभवंतिस्वयं अहमपितथेत्यर्थः॥४३॥ इति श्री एकादशे पंचदशः॥१५॥ षोडशेतुह
रेर्विभूतयुक्तविभूतयः ज्ञानवीर्यप्रभावादिविशेषेणप्रवर्णिताः॥ अनुश्रितेनयद्ध्यानमशक्यमकृतात्म
नो अतस्तद्यात्मापन्यैविभूत्यादिनिरूपणं एवंतावत्त्रवाध्यायामष्टप्रश्नानिरूपिताः ब्रह्मत्वसंभवेत्तावत्त्व

अहमात्मांभ्यंतरोवाह्योनावृतः सर्वदेहिनां यथाभूतानिभूतेषुवहिरंतःस्वयंतथा॥४३॥इति श्री म
द्भागवतेमहापुराणेएकादशस्कंधेपंचदशोध्यायः॥१५॥ उद्धवउवाच॥ त्वंब्रह्मपरमंसाक्षादना
द्यंतमपावृतं सर्वेषामपिभावानांत्राणस्थित्यप्ययोद्भवः॥१॥
प्रमादिचतुष्टये वंधमुक्तोपास्तुतिर्ह्रीरेसद्भक्तेराश्रुततःपरे द्वादशेअंतरंकर्मकृतित्यागव्यवस्थितौ हंसेतिहासतो
योगनिष्ठायांचत्रयोदशे श्रेयस्साधननिर्धारे ध्यानेचैवचतुर्दशे धारणासिद्धिभेदेचप्रसंगेननिरंतरे उद्धवप्रश्न
तोदत्तमुत्तरंहरिणोचितं षोडशेभ्रतिविस्तारेद्वयोःसप्तादशेव र्णाश्रमव्रतेस्नानादिनिर्णयेचाततोयमादीनांच
निर्णये योगत्रयाधिकारेतुविंशेचततरनंतरे तत्वसंख्याविवादेचपुंप्रकृत्योर्विवेचने जन्ममृत्युप्रकारेचद्वाद
शेदत्तमुत्तरं परापराधसहनेचतुर्भिस्तदनंतरे सप्तविंशेक्रियायोगप्रश्नेतदुपवर्णनं अष्टाविंशेततःप्रोक्ता

विशेषतोविभूतीराह कलयतांवशीकुर्वतांमध्येगुणानांसाम्यंप्रकृतिः गुणिनिधर्मिणिऔत्पत्तिकःस्वाभाविकोयोगुणः
सोहं १० सूत्रंप्रथमकार्यं महान्महत्तत्त्वंसूक्ष्मोपाधित्वात् दुर्ज्ञेयत्वाच्चजीवस्यसूक्ष्मत्वं बुद्धेर्गुणेनात्मगुणेनचै

अहंगतिर्गतिमतांकालः कलयतामहं गुणानांचाप्यहंसाम्यंगुणिन्यौत्पत्तिकोगुणः १० गुणिना
मप्यहंसूत्रंमहतांचमहानहं सूक्ष्माणामप्यहंजीवोदुर्ज्जयानामहंमनः ११ हिरण्यगर्भोवेदानांमं
त्राणांप्रणवस्त्रिवृत् अक्षराणामकारोस्मिपदानिछंदसामहं १२ इंद्रोहंसर्वदेवानांवसूनामस्मि
हव्यवाट् आदित्यानामहंविष्णूरुद्राणांनीललोहितः १३ महर्षीणांभृगुरहंराजर्षीणामहंमनुः
देवर्षीणांनारदोहंहविर्द्धान्यस्मिधेनुषु १४ सिद्धेश्वराणांकपिलःसुपर्णोहंपतत्रिणां प्रजाप
तीनांदक्षोहंपितृणामहमर्यमा १५ मांविद्ध्युद्धवदैत्यानांप्रह्लादमसुरेश्वरं सोमंनक्षत्रौष
धीनांमनुष्याणांचभूपतिं १६ उच्चैःश्रवास्तुरंगाणांधातूनामस्मिकांचनं यमःसंयमतांचाहं
सर्पाणामस्मिवासुकिः १७

वमाराग्रमात्रोह्यपरोपिदृष्टइतिश्रुतेः ११ वेदानांसंबंधी
तेषामध्यापकः पदानित्रिपदागायत्रीत्यर्थः १२ १३ हविर्द्धानीकामधेनुः १४ १५ नक्षत्रौषधीनांप्रभुंसोमं
यादसांप्रभुं तपतांतापंच तांद्युमतांदीप्तिमतांचमध्ये १६ संयमतांदंडयतामित्यर्थः १७ रामरामरामराम

ताएवसाकल्येनपृच्छति हेमहाविभूते याःकाश्चिद्भूम्यादिषुतेविभूतयः रसायांरसातलेऽनुभाविताःस्त्वयै
वकेनचिच्छक्तिविशेषेणसंयोजिताः तीर्थानांपदंच तदंघ्रिपद्मंच ५ नएवावतारेभेतार्ज्जुनप्रश्नसंवादित्वात्तत्त्वा
यंप्रश्नः साधीयानितितावदनुमोदते एवमितित्रिभिः प्रश्नंपृष्टंयं सपत्नैर्योद्धुमिच्छताविनशनेकुरुक्षेत्रे हेयुयु
त्सुर्विभूतिप्रश्नेकः प्रसंगस्तत्राहज्ञात्वेति लौकिकः प्राकृतमतिःसन् ततोज्ञातिवधान्निवृत्तः ७ सचयस्ततोज्ञातिवधा

यांकाश्चभूमौदिविवैरसायांविभूतयोदिशःमहाविभूते तामह्यमाख्याह्यनुभाविताःस्तेनमामितितीर्थप
दांघ्रिपद्मं ॥५॥ श्रीभगवानुवाच ॥ एवमेतदहंपृष्टः प्रश्नंप्रश्नविदांवर युयुत्सुनाविनशनेसपत्नैरर्जुनेन
नवै ६ ज्ञात्वाज्ञातिवधंगर्ह्यमधर्मंराज्यहेतुकं ततोनिवृत्तोहंताहंहतोयमितिलौकिकः ७ सतदापुरुषव्या
घ्रोयुक्त्यामेप्रतिबोधितः अभ्यभाषतमामेवंयथात्वंरणमूर्द्धनि ८ अहमात्मोद्धवामीषांभूतानांसु
हृदीश्वरः अहंसर्वाणिभूतानितेषांस्थित्युद्भवाप्ययः ९

न्निवृत्तः तदामयाप्रतिबोधितःसन् यथात्वमभिभाषसे एवंसंग्राममुखेमामभ्यभाषत तद्वद्देवतवापिकथ
यिष्यामीतिभावः ८ ताविभूतीःकथयति अहमिति अस्मच्छब्दसमाधिकरणः प्रथमांताद्वितीयांताश्चसर्वा
विभूतयः ताश्चोपासनार्थंकथ्यंते षष्ठीचक्वचित्निर्द्धारणेसंबंधेचक्वचिद्यथायोग्यंद्रष्टव्या तत्रभूतानीषांभू
तानामात्मेति सुहृदिति ईश्वरइतिचसामान्येनाहमुपास्यइत्यर्थः एवंमत्तस्तेषांस्थित्युद्भवाप्ययः तद्धेतुरित्यर्थः ९

भा० ए०
८४

कुमारः सनत्कुमारः २४ संन्यासः भूताभयप्रदानं क्षेमाणाम् अभयस्थानानां मध्ये अबहिर्मतिः अंतर्निष्ठा सूनृतं प्रियवच
नं मौनं च न हि प्रियभाषणे मौने च पुरुषस्याभिप्रायो ज्ञायते अतः प्रजापतिः यस्य देहार्द्धाभ्यां मिथुनमभूत् स एव तद्
रूपमिथुनं अर्द्धौ वा एष आत्मनो यत्पत्नीति श्रुतेः २५ अनिमिषाम् अप्रमत्तानां मधुमाधवौ वसंतः इत्यर्थः अभि

स्त्रीणां तु सतरूपाहं पुंसां स्वायंभुवो मनुः नारायणो मुनीनां च कुमारो ब्रह्मचारिणां २४ धर्मा
णामस्मि संन्यासः क्षेमाणाम् अबहिर्मतिः गुह्यानां सूनृतं मौनं मिथुनानामजस्त्वहं २५ संवत्सरो
स्म्यनिमिषामृतूनां मधुमाधवौ मासानां मार्गशीर्षोहं नक्षत्राणां तथाभिजित् २६ अहं युगानां
च कृतं धीराणां देवलोऽसितः द्वैपायनोऽस्मि व्यासानां कवीनां काव्य आत्मवान् २७ वासुदेवो
भगवतां त्वं तु भागवतेष्वहं किंपुरुषाणां हनुमान् विद्याध्राणां सुदर्शनः २८ रत्नानां पद्मरा
गोऽस्मि पद्मकोशः सुपेशसां कुशोऽस्मि दर्भजातीनां गव्यमाज्यं हविःष्वहं २९ ॥ ऽऽ ॥०

जित् उत्तराषाढाचतुर्थपादः तथा च श्रुतिः अभिजिन्नाम नक्षत्रमुपरिष्टादषाढानामवस्ताच्छ्रोणायाः इत्यादि
२६ कृतं कृतयुगं देवलः असितश्च व्यासानां वेदविभागकर्तॄणां कवीनां विदुषां काव्यः शुक्रः २७ भगवतां उत्प
त्तिप्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति एवं लक्षणानां २८ सुपेशसां सुंद
राणां दर्भजातीनां कासदूर्वादीनां हविःषु चरुपुरोडाशादिषु घृतं पुवा २९ ॥

८४

ऋषीणां देवर्षीणां च मध्ये तेषां प्रभुर्वा तुर्यः संन्यासः प्रथमो ब्राह्मणः १८ स्रोतसां प्रवाहानां च सरसां स्थिरोद
काशयानां १९ धिष्ण्यानां निवासस्थानानां गहनानां दुर्गमाणां २० ब्रह्मिष्ठानां वेदार्थनिष्ठानां सेनान्यां चमूपती
नां अग्रण्यां सन्मार्गप्रवर्तकानां अजो ब्रह्मा २१ शुचीनां शोधकानाम पिमार्ज्जनेन तेहणा घर्षणादीनां मध्ये वाय्वादि

नागेन्द्राणामनन्तोऽहं मृगेन्द्रः ऋषीणां देवर्षीणां आश्रमाणामहं तुर्यो वर्णानां प्रथमोऽनघ १८ ती
र्थानां स्रोतसां गंगा समुद्रः सरसामहं आयुधानां धनुरहं त्रिपुरघ्नो धनुष्मतां १९ धिष्ण्या
नामस्म्यहं मेरुर्गहनानां हिमालयः वनस्पतीनामश्वत्थ ओषधीनामहं यवः २० पुरोधसां व
सिष्ठोऽहं ब्रह्मिष्ठानां बृहस्पतिः स्कन्दोऽहं सर्वसेनान्यामग्रण्यां भगवानजः २१ यज्ञानां ब्रह्मय
ज्ञोऽहं व्रतानामविहिंसनं वाय्वग्न्यर्काम्बुवागात्मा शुचीनामप्यहं शुचिः २२ योगानामात्मसंरो
धो मन्त्रोऽस्मि विजिगीषतां आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनां २३

रूपः शोधकोऽहं २२ योगानां योगांगानामष्टानां मध्ये आत्मसंरोधः समाधिरहं मन्त्रो नीतिकौशलानां विवेक
निपुणानां मध्ये आन्वीक्षिकी आत्मानात्मविवेकविद्या अख्यात्यन्यथाख्यातिशून्यख्यात्यसत्ख्यात्यनिर्वच
नीयख्यातिवादिनामेवमिदमेवं वत्ति यो दुरन्तो विकल्पः सोऽहम् २३

तदेवं तत्र तत्र निर्द्धारणेन तत्र संबंधेन च विशेषतो विभूतीर्निरूप्येदानीं सामान्यतः सर्वा अपि निरूपयति पृथि
वीति सार्द्धद्वयेन पृथिव्यादिशब्दैस्तन्मात्राण्यपि विवक्षितानि अहं अहंकारः महान् महत्तत्वं एताः सप्त प्रकृतिवि
कृतयो विकारः पंचमहाभूतानि एकादशेंद्रियाणि चेत्येवं षोडशसंख्याकः पुरुषो जीवः अव्यक्तं प्रकृतिः एवं पं
चविंशतितत्वानि तदुक्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृति
र्न विकृतिः पुरुष इति किंच रजः सत्वं तम इति प्रकृतेर्गुणास्तथा परं ब्रह्म च तदेतत्सर्वमहमेव किंच एतत्प्रसंख्या

पृथिवी वायुराकाश आपो ज्योतिरहं महान् विकारः पुरुषोऽव्यक्तं रजः सत्वं तमः परं अहमेतत्प्र
संख्यानं ज्ञानं तत्वविनिश्चयः ३६ मयेश्वरेण जीवेन गुणेन गुणिना विना सर्वात्मनापि सर्वेण न
भावो विद्यते क्वचित् ३७ संख्यानं परमाणूनां कालेन क्रियते मया न तथा मे विभूतीनां सृजतोऽण्डानि कोटिशः ३८

नं गणनं परिगणनमेतेषां लक्षणतो ज्ञानं च तत्फलं तत्वविनिश्चयश्चाहमेव ३६ एतदेव संक्षि
प्याह मयेति जीवेश्वररूपो हि विधोयो भावः यश्च गुणगुणिरूपो यश्च तत्र ज्ञेयरूपः स सर्वोपि मया विना मद्व्यतिरेकेण नास्ति अ
हमेव सर्वं विभूत्यर्थः ३७ ननु सामान्यतः किमेवं संक्षिपन्कथयसि पूर्ववन्निर्द्धारणसंबंधाभ्यां विशेषतः सर्वाः कथयेति चेत्तत्राह
संख्यानं पृथिव्यादिपरमाणूनां कालेन महता तदपि मयैव क्रियत इति कृत्वा वक्तुं शक्यते न तथा मे विभूतीनां संख्यानं कर्तुं न श
क्यते कुत इत्यत आह सृजतोऽण्डानीति यदा मयासृज्यमानानामण्डानामेव तावत्संख्या नास्ति तदा कुतस्तदन्तर्गतानां विभूतीनां संख्येत्य

लक्ष्मीर्धनादिसंपत् ३० बलवतामोजःसहश्च सात्वतां भागवतानां भक्तमाहं तं कर्माहमित्यर्थः तेषामेव नव
व्यूहमूर्तीनां वासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववराहनृसिंहब्रह्माण इति या नव मूर्तयस्तासां मध्ये
वासुदेवाख्यः ३१ गंधर्वाणां विश्वावसुः अप्सरसां पूर्वचित्तिः गंधमात्रमविकृतं ३२ परमः मधुरः परः पराख्यः

व्यवसायिनामहं लक्ष्मीः कितवानां छलग्रहः तितिक्षास्मि तितिक्षूणां सत्वं सत्ववतामहं ३० ओजः
सहो बलवतां कर्माहं विद्धि सात्वतां सात्वतां नवमूर्तीनामादिमूर्तिरहं परा ३१ विश्वावसुः पूर्वचित्ति
र्गंधर्वाप्सरसामहं भूधराणामहं स्थैर्यं गंधमात्रमहं भुवः ३२ अपां रसश्च परमस्तेजस्वीनां वि
भावसुः प्रभा सूर्येंदुताराणां शब्दोहं नभसः परः ३३ ब्रह्मण्यानां बलिरहं वीराणामहमर्जुनः
भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः ३४ गत्युक्त्युत्सर्गोपादानमानंदस्पर्शलक्षणं आस्वादश्रु
त्यवघ्राणमहं सर्वेंद्रियेंद्रियं ३५

शब्दः ३३ अर्जुनः पार्थः भूतानां प्राणिनां प्रतिसंक्रमः प्रलयः ३४ गत्यादयः पंचकर्मेंद्रियव्यापाराः स्पर्शादयो ज्ञा
नेंद्रियव्यापाराः तत्र लक्षणं दर्शनं सर्वेंद्रियाणामिंद्रियं तत्तदर्थग्रहणशक्तिरप्यहं ३५ रामराम राम

ततःसम्प्रदशेपृष्टे स्वधर्मे भक्तिलक्षणे ॥ हंसोक्तंधर्ममन्वाह ब्रह्मणा गिरिगृहस्थयोः कर्माहंविद्धिसात्वतामित्य
नभक्त्याकृतंतत्कर्मसमोक्षसाधनंमद्धिभर्तिरित्युक्तं भक्तिसाधनत्वंचकर्मणोमयोदितेपूर्वविहितः स्वधर्मोपि
त्यादिनातत्रतत्रोक्तं॥ नचकर्मानुष्ठानंनृणांनियमेनभक्तिर्दृश्यते अतः पृच्छति यस्त्वयेतिसप्तभिः पूर्वंकल्पा

उद्धव उवाच ॥ यस्त्वयाभिहितःपूर्वंधर्मस्त्वद्भक्तिलक्षणः ॥ वर्णाश्रमाचारवतांसर्वेषांद्विपदामपि
यथानुष्ठीयमानेनत्वयिभक्तिर्नृणांभवेत् स्वधर्मेणारविंदाक्षतन्ममाख्यातुमर्हसि १ पुराकि
लमहाबाहोधर्मंपरमकंप्रभो यत्तेनहंसरूपेणब्रह्मणेभ्यात्थमाधव सद्दानींसुमहताकालेना
मित्रकर्शन नप्रायोभवितामर्त्यलोकेप्रागनुशासितः २ वक्ताकर्ताविताना न्योधर्मस्याच्युततेभुवि
सभायामपिवैरिंच्यांयत्रमूर्तिधराःकलाः ३ कर्त्रांविता प्रवक्त्राचभवतामधुसूदन त्यक्तेमहीतले
देवविनष्टंकःप्रवक्ष्यति ४ तत्वंनःसर्वधर्मज्ञधर्मस्त्वद्भक्तिलक्षणः यथायस्यविधीयेततथावर्णयमेप्र
भो ५

दीत्वद्भक्तिलक्षणः तज्ज्ञापकः तत्साधनमित्यर्थः वर्णाश्रमहीवानामपिद्विपदांनराणांयथायेनप्रकारेणानु
ष्ठीयमानेनस्वधर्मेण १ ननुसम्प्रदायादेवज्ञास्यते किंपुनर्वर्णनेनतत्राह पुरेति परमकं परमश्रेयसोकेसु
खरूपम्प्रतं यत्तेयुहंसरूपेणधर्मोप्युक्तस्तत्तुयोगमात्रेणानीतमागतं यत्तेसुमहदसंविवक्षयेत्युक्त्वान्त्राग
नुशासितोपिनभविता नभविष्यति २ तत्रहेतुमाह वक्तेतिद्वाभ्यां तेत्वत्तोऽन्यैःकल्पोवेदाद्याः ३ ४ ततस्मान्नोऽ

स्माकंमनुष्याणांमध्येयस्यय थाविधीयते ५

तथापि विशेषत एव सर्वोऽपि संक्षेपतः कथयामीत्याह तेजः प्रभावः श्रीः संपत् सौभगं मनोनयनाह्लादकत्वं भगो भाग्यं वीर्यं बलं अंशकः विभूतिः ३९ उपसंहरति एता इति एते च विभूतिभेदा मयि चिन्त्या वत्तारायकथिताः अतो नात्रातीवाभिनिवेशः कर्त्तव्य इत्याह मनोविकारा एव न तु परमार्थाः यथा किंचित्त्वपुष्पादि वाङ्मात्रेणाभिधीयते तत्तुल्याः ४०

तेजः श्रीः कीर्त्तिरैश्वर्यं ह्रीस्त्यागः सौभगं भगः वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मेंऽशकः ३९ एतास्ते कीर्त्तिताः सर्वाः संक्षेपेण विभूतयः मनोविकारा एवैते यथा वाचाभिधीयते ४० वाचं यच्छ मनो यच्छ प्राणान् यच्छेन्द्रियाणि च आत्मानमात्मना यच्छ न भूयः कल्पसेऽध्वने ४१ यो वै वाङ्मनसी सम्यगसंयच्छन् धिया यतिः तस्य व्रतं तपो दानं स्रवत्याम घटाम्बुवत् ४२ तस्माद्वचो मनः प्राणान्नियच्छेन्मत्परायणः मद्भक्तियुक्तया बुद्ध्या ततः परिसमाप्यते ४३ इति श्रीमद्भागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्धवसंवादे महाविभूतिवर्णनं षोडशोऽध्यायः १६॥

तस्माद्वागादीन्नियच्छ आत्मानं बुद्धिं आत्मना सत्त्वसंपन्नया तत्पैव नियच्छ अध्वने संसारमार्गाय ४१ असंयच्छतो दोषमाह य इति असंयच्छन् न संयच्छति ४२ परिसमाप्यते कृतकृत्यो भवतीत्यर्थः ४३ इति श्री एकादशे षोडशः॥१६॥

भा० ए० ममवैराजरूपस्यहृदंवक्षोऽधस्तात्ब्रह्मचर्यमितिनैष्ठिकाभिप्रायं ११ तेषामधिकारविशेषेणस्वभावाना
८१ ह वर्णानामितिपंचभिः जन्मस्थानानुसारिण्यः नीचैरित्यव्ययं अतोऽयमर्थः मंदाभिर्जन्मभूमिभिर्मंदाः
उत्तमाभिरुत्तमाश्चेति १२ तपआलोचनं १३ तेजःप्रतापः १४ १५ १६ एतैरेवाश्रमस्वभावाश्चविज्ञेयाः

गृहाश्रमोजघनतोब्रह्मचर्यंहृदोमम वक्षःस्थलाद्वनेवासोन्यासःशीर्षणिसंस्थितः ११
वर्णानामाश्रमाणांचजन्मभूम्यनुसारिणीः आसन्प्रकृतयोनृणांनीचैर्नीचोत्तमोत्तमाः १२ श
मोदमस्तपःशौचंसंतोषःक्षांतिरार्जवं मद्भक्तिश्चदयासत्यंब्रह्मप्रकृतयस्त्विमाः १३ तेजोबलं
धृतिःशौर्यंतितिक्षौदार्यमुद्यमः स्थैर्यंब्रह्मण्यतैश्वर्यंक्षत्रप्रकृतयस्त्विमाः १४ आस्तिक्यंदा
ननिष्ठाचअदंभोविप्रसेवनं अतुष्टिरर्थोपचयैर्वैश्यप्रकृतयस्त्विमाः १५ शुश्रूषणंद्विजगवांदेवा
नांचाप्यमायया तत्रलब्धेनसंतोषःशूद्रप्रकृतयस्त्विमाः १६ अशौचमनृतंस्तेयंनास्तिक्यंशुष्क
विग्रहः कामःक्रोधश्चतर्षश्चसस्वभावोऽन्त्यवसायिनां १७ अहिंसासत्यमस्तेयमकामक्रोधलोभता भू
तप्रियहितेहाचधर्मोयंसार्ववर्णिकः १८

तद्बाह्यानांस्वभावानाह अशौचमिति शुष्कविग्रहः निर्मूलः कलहः तर्षःतृष्णा १७ तत्रतावत्सर्वसाधारणंध
र्ममाह अहिंसेति सार्ववर्णिकइतिवर्णग्रहणमुपलक्षणार्थम् १८ रामरामरामरामरामरामरामराम ८१

धर्म्योधर्मोदनपेतः कुतः नैःश्रेयसकरः भक्तिजनकः अतोमेमतः तंधर्मंनिबोध॥६॥तत्रादौमदुपासनलक्षण
एवमुख्योधर्मआसीत् अथवारलक्षणस्तुपश्चात्प्रवृत्तः सचैवमनुष्ठितोभक्तिहेतुरितिदर्शयितुमाह॥आदाविति
कल्यादौयत्कृतयुगंतस्मिन् तेचतदामामुपासतएवकेवलंनान्यत्कुर्वन्तीतिवक्तुंकृतयुगनामनिरुक्तिमाह॥कृत
कृत्याइतिजात्याजन्मनैव ७ किंचविधायकाभावादपितदानींनान्यत्कर्मास्तीत्याह वेदइति धर्मश्चमनोवि

श्रीभगवानुवाच॥धर्म्यएषतवप्रश्नोनैःश्रेयसकरोनृणां वर्णाश्रमाचारवतांतमुद्धवनिबोधमे ६
त२ आदौकृतयुगेवर्णोनृणांहंसइतिस्मृतः कृतकृत्याःप्रजाजात्यातस्मात्कृतयुगंविदुः ७ वेदःप्रणवए
वाग्रेधर्मोहंवृषरूपधृक् उपासतेतपोनिष्ठाहंसंमांमुक्तकिल्बिषाः ८ त्रेतायुगेमहाभाग
प्राणान्मेहृदयात्त्रयी विद्याप्रादुरभूत्तस्याअहमासंत्रिवृन्मखः ९ विप्रक्षत्रियविट्शूद्रामुखबाहू
रुपादजाः वैराजात्पुरुषाज्जातायआत्माचारलक्षणाः १०

षयोऽहमेववृषरूपधृक् चतुष्पात् नक्रियावि
षयायज्ञादिः अतस्तपोनिष्ठाः मनसश्चेंद्रियाणांचह्येकाग्र्यंपरमंतपइतिवचनादेकाग्रतयाहंसंस्वरूपंमांध्या
यंतीत्यर्थः पश्चात्त्रेतायुगप्रवेशेमेवैराजरूपस्यप्राणान्निमित्तात् हृदयात्सकाशात् तस्यास्त्रय्याःसकाशात् होत्रा
ध्वर्य्यवौद्गात्रैस्त्रिवृत् त्रिरूपः यज्ञोवैविष्णुरितिश्रुतेः ९ वर्णानामाश्रमाणांचधर्मान्वक्तुंतेषामुत्पत्तिमाह विप्रेति

मा० ए० अन्यदपि यन्मंत्रप्राप्तं तच्च निवेदयेत् तेनानुज्ञातं तु संयतः सन्नुपयुंजीतेत्यर्थः २५ यानशय्यासनस्थानैः यांतं
४८ दृष्ट्वा यानेन निद्रितः सप्रमत्तः तयासमीपे शयीत न विश्रांतं पादसंवाहनादिभिः समीपासनेन आसीनः कृतांज
लिः सन्निधानप्रतीक्षया दूरेऽवस्थानेनेत्यर्थः २६ एवंवृत्तेयस्यसः २७ एवमुपकुर्वाणस्य धर्मानुक्त्वाने

सायंप्रातरुपानीय भैक्ष्यं तस्मै निवेदयेत् यच्चान्यदप्यनुज्ञातमुपयुंजीत संयतः २५ शुश्रूषमा
ण आचार्यं सदोपासीत नीचवत् यानशय्यासनस्थानैर्नातिदूरे कृतांजलिः २६ एवंवृत्तो गुरु
कुले वसेद्भोगविवर्जितः विद्यां समाप्नुयाद्यावद्बिभ्रद्व्रतमखंडितं २७ यद्यसौ छंदसां लोकमारो
ढुमिच्छेत् तं गुरवे विन्यसेद्देहं स्वाध्यायार्थे दृढव्रतः २८ अग्नौ गुरावात्मनि च सर्वभूतेषु मां प
रं अपृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः २९ स्त्रीणां निरीक्षणस्पर्शसंलापक्ष्वेलनादिकं प्राणि
नां मिथुनीभूतानगृहस्थोऽग्रतस्त्यजेत् ३०

ष्ठिकस्य विशेषधर्मानाह यदीति षड्भिः असौ ब्रह्मचारी यदि छंदसां लोकं महर्लोकं ततो ब्रह्मलोकं वा हत्वा न आरोढुमि
च्छतीत्यर्थः यद्वा छंदसां लोकविशेषणं यत्र मूर्त्तिधराः कलाइत्युक्तत्वात् तर्हि दृढव्रतः सन् दृढनैष्ठिकव्रतं यस्य सः विन्य
सेत् समर्पयेत् अधिकस्वाध्यायार्थं अधीतनिष्क्रयार्थं वा २८ ब्रह्मवर्चसं वेदाभ्यासजं तेजस्तद्वान् २९ नैष्ठिकवनस्थयतिसाधा

४८

वर्णधर्मोनरहस्यस्यप्रकरणेवक्ष्यति प्रथमंतावदाश्रमेषुब्रह्मचारिणोधर्मोवर्ण्यते सचद्विविधः उपकु
र्वाणोनैष्ठिकश्चतत्राद्यस्यधर्ममाह द्वितीयमितिनवभिः द्विजःत्रैवर्णिकः आनुपूर्व्याद्गर्भाधानादिसंस्कारक्रमे
णद्वितीयमुपनयनाख्यंजन्मप्राप्याचार्येणाहूतोवेदमधीयीत चकारात्तदर्थंचविचारयेत १९ किंचमेखलादीनकृष्णा

नय१ द्वितीयंप्राप्यानुपूर्व्याज्जन्मोपैनंद्विजः वसन्गुरुकुलेदांतोब्रह्माधीयीतचाहूतः १९ मेखलाजिनदं
डाश्चब्रह्मसूत्रकमंडलून् जटिलोऽधौतदद्वासोऽरक्तपीठः कुशान्दधत् स्नानभोजनहोमेषुजपो
च्चारेचवाग्यतः २० नछिंद्यान्नखरोमाणिकक्षोपस्थगतान्यपि २१ रेतोनावकिरेज्जातुब्रह्मव्रतधरःस्वयं
अवकीर्णेऽवगाह्याप्सुयतासुस्त्रिपदांजपेत् २२ अग्न्यर्काचार्यगोविप्रगुरुवृद्धसुरान्शुचिः समाहितउ
पासीतसंध्येचयतवाग्जपन् २३ आचार्यंमांविजानीयान्नावमन्येतकर्हिचित् नमर्त्यबुद्ध्यासूयेतसर्वदेवमयो
गुरुः २४

श्चदधत् तत्राजिनशब्देनाक्षमाला कथंभूतःजटिलः अनभ्यंगादिनाजातजटः तथाअधौतदद्वासो
ऽरक्तपीठः रंताश्चवासश्चदद्वासी नधौतानितानियस्यसःअधौतदद्वासाः सचासावरक्तपीठश्च नकौतुकादिनारक्तंपीठमास
नंयस्यसः जपश्चउच्चारोमंत्रपुरीषोत्सर्गश्चजपोच्चारंतस्मिन्वाग्यतःमौनीभवेत् २०२१ रेतोबुद्धिपूर्वकंनावकिरेत् नोत्सृजे
त् ब्रह्मव्रतधरः अगृहस्थः स्वयमेवकथंचिदवकीर्णे अवगाह्यस्नात्वायतासुःकृतप्राणायामः त्रिपदांगायत्रींजपेत्
२२ संध्येचउच्यतवाग्जपन्नुपासीत मध्याह्नसंध्यानिमित्तंमौनंनास्तीतिवचनं २३ २४ ॥ ॥ ॥ ॥

मि० ५०
८६

नियम १

विवाहैः पूर्वकं वर्णधर्मैः सह गृहस्थधर्मानाह गृहार्थीति सदृशीं सवर्णां अजुगुप्सितं केवलग्नोलक्षणां तस्या
निंदितां कामतस्तु यामन्यां मुद्वहेत् नोसवर्णामन्तु तस्यां अनंतरं तत्रापि वर्णक्रमेणोद्वहेदित्यर्थः स्मृत्यंतरे
पि ह्युक्तं तिस्रो वर्णानुपूर्वेण द्वे तथैका यथाक्रमं ब्राह्मणक्षत्रियविशां भार्याः स्वाः शूद्रजन्मन इति स्मृतेः
३५ इज्यादयस्त्रैवर्णिकानामावेश्यकधर्माः प्रतिग्रहादिर्यं तु वृत्तिः साच ब्राह्मणस्यैव ३६ तत्रापि मु

गृहार्थी सदृशीं भार्यामुद्वहेदजुगुप्सितां यवीयसीं तु वयसा यां सवर्णामनुक्रमात् ३५ इज्याध्य
यनदानानि सर्वेषां च द्विजन्मनां प्रतिग्रहोऽध्यापनं च ब्राह्मणस्यैव याजनं ३६ प्रतिग्रहं मन्य
मानस्तपस्तेजोयशोनुदं अन्याभ्यामुपजीवेत शिलैर्वा दोषदृक्तयोः ३७ ब्राह्मणस्य हि देहोऽ
यं क्षुद्रकामाय नेष्यते कृच्छ्रायतपसे चेह प्रेत्यानंतसुखाय च ३८ शिलोंछवृत्त्या परितुष्ट
चित्तो धर्मं महांतं विरजं जुषाणः मय्यर्पितात्मा गृहएव तिष्ठन्नोति प्रशांतेः समुपैति शांतिम्

ख्यां मुख्यमां चान्यां वृत्तिमाह प्रतिग्रहमिति तयोर्याजनाध्यापनयोरपि कार्पण्यादिदोषं पश्यन् शिलैः स्वा
मित्युक्तेः क्षेत्रपतितैः कणिशैः ३७ एवं वृत्तिकार्यं ब्राह्मणेन सोढव्यमित्याह ब्राह्मणस्येति ३८ उंछवृ
त्तिर्नाम विपण्यादिपतितकणोपादानं तां शिलवत्सैकीकृत्य यातुष्टचित्तस्य मोक्षफलमाह शिलोंछेति

तस्यैव सर्वाश्रमसाधारणं धर्ममाह शौचमिति द्वाभ्यां ३१ निष्कामनैष्ठिकस्य तु मोक्षफलमाह एवमिति अमलः
निष्कामश्चेद्दग्धः कर्माशयोऽन्तःकरणं यस्य तथाभूतः सन् मद्भक्तो भवति ३२ उपकुर्वाणस्य समावर्तनप्रकार
माह अथेति अनंतरं द्वितीयाश्रमं आवेक्ष्यन् प्रवेष्टुमिच्छन् यथाय थावद्विचारितवेदार्थः स्नायात् अभ्यंगादिकं

शौचमाचमनं स्नानं संध्योपासनमार्जनं तीर्थसेवा जपोऽस्पृश्याभक्ष्यासंभाष्यवर्जनं सर्वाश्र
मप्रयुक्तोऽयं नियमः कुलनंदन मद्भावः सर्वभूतेषु मनोवाक्कायसंयमः ३१ एवं बृहद्व्रतधरो
ब्राह्मणोऽग्निरिव ज्वलन् मद्भक्तस्तीव्रतपसा दग्धकर्माशयोऽमलः ३२ अथानंतरमावेक्ष्यन् य
था जिज्ञासितागमः गुरवे दक्षिणां दत्वा स्नायाद्गुर्वनुमोदितः ३३ गृहं वनं वोपविशेत् प्रव्रजेद्वा
द्विजोत्तमः आश्रमादाश्रमं गच्छेन्नान्यथामत्परश्चरेत् ३४ ॥ ऽऽ ॥ ऽऽ

कृत्वा समावर्तेतेत्यर्थः ३३ तस्याधिकारानुरूपमाश्रमविकल्पसमुच्चयावाह गृहमिति सकामश्चेद्गृहं अ
न्तःकरणशुद्ध्यादिकामश्चेद्वनं प्रविशेत् शुद्धान्तःकरणः स च द्विजोत्तमः ब्राह्मणश्चेत् प्रव्रजेदित्यर्थः यद्वा
आश्रमादाश्रमांतरं गच्छेत् अन्यथा अनाश्रमी प्रतिलोमं च नाचरेदित्यर्थः अमत्पर इति वाच्छे स्वभक्तस्या
श्रमनियमाभावस्य वक्ष्यमाणत्वात् ३४

भा० ए०
६०

तदेवं वर्णत्रिव्यवस्थामुक्त्वा पुनर्गृहस्थस्यावश्यकान् पंचयज्ञानाह वेदाध्ययनं ब्रह्मयज्ञस्तेन ऋषीन् स्वधाकारे
ण पितॄन् स्वाहाकारेण देवान् बलिहरणेन भूतानि अन्नाद्यैरन्नोदकादिभिर्मनुष्यानिति ज्ञातव्यं यथोदयं वि
भवानुसारतः ते चेश्वरदृष्टिं विधत्ते मद्रूपाणीति ६६ आवश्यकं धर्ममुक्त्वा शक्त्यनुसारं धर्ममाह यदृच्छयात्
द्यमं विना उपार्जितेन वा शुल्केन स्वरस्त्या लब्धेन शुद्धेन धनेन वा भृत्यान् पोष्यान् ६७ गृहस्थस्यापि निवृत्तिनि

वेदाध्यायस्वधास्वाहाबल्यन्नाद्यैर्यथोदयं देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत् ६६ यदृच्छ
योपपन्नेन शुल्केनोपार्जितेन वा धनेनापीडयन्भृत्यान्न्यायेनैवाहरेत् क्रतून् ६७ कुटुंबेषु न
सज्जेत न प्रमाद्येत्कुटुंब्यपि विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ६८ पुत्रदाराप्तबंधूनां संगमः
पांथसंगमः अनुदेहं वियंत्येते स्वप्नो निद्रानुगो यथा ६९ इत्थं परिमृशन्मुक्तो गृहेष्वतिथिवद्व
सन् न गृहैरनुबध्येत निर्ममो निरहंकृतः ७०

मामाह कुटुंबेष्विति त्रिभिः न प्रमाद्येत् ईश्वराविष्टायां प्रमत्तो न भवेत् ननु दृष्टार्थकर्मासक्तस्य कथमप्रमादः वि
चारेणेत्याह विपश्चिदिति ६८ तत्रापि दृष्टेष्वासक्तेरधिकत्वात्तेषां नश्वरतां प्रपंचयति पुत्रादीनामेकत्र संग
मः पंथानां प्रपायां संगम इव तत्र हेतुः अनुदेहं प्रतिदेहं मेते वियंति न पश्यन्ति द्रष्टानुवर्ती स्वप्नो निद्रापायेयथे ८८

६०

एवमधनस्यमहत्फलमुक्त्वासधनानामप्याहत्रिभिः समुद्धरंतिदारिद्र्यादुत्तारयंति विप्रमित्युपलक्षणम्
मत्परायणंयंकमपि ६० राज्ञस्त्वावश्यकमेतदित्याह सर्वाइति ६१ ६२ सर्वेषामापद्वृत्तीराहत्रिभिः पण्यैर्वि
क्रयाद्यैः नतुसुरालवणाद्यैः तत्रापदाक्रांतश्चेत्खड्गेनक्षत्रियवृत्त्यावा यद्यपिगौतमोऽन्तरांपापीयसींवृत्तिमातिष्ठे

समुद्धरंतियेविप्रंसीदंतंमत्परायणं तानुद्धरिष्येनचिरादापद्भ्योनौरिवार्णवात् ६० सर्वाःसमु
द्धरेद्राजापितेवव्यसनात्प्रजाः आत्मानमात्मनाधीरोयथागजपतिर्गजान् ६१ एवंविधोनरपतिर्वि
मानेनार्कवर्चसा विधूयेहाशुभंकृत्स्नमिंद्रेणसहमोदते ६२ सीदन्विप्रोवणिग्वृत्त्यापण्यैरेवापदंतरेत्
खड्गेनवापदाक्रांतोनश्ववृत्त्याकथंचन ६३ वैश्यवृत्त्यातुराजन्योजीवन्मृगययापदि चरेद्वाविप्ररूपे
णनश्ववृत्त्याकथंचन ६४ शूद्रवृत्तिंभजेद्वैश्यः शूद्रः कारुकरक्रियां कृच्छ्रान्मुक्तोनगर्ह्येणवृत्तिंलिप्से
तकर्मणा ६५

दितिस्मरन् खड्गधारणंपण्यविक्रियाच्छ्रेष्ठंमन्यते तथापिहिंसातोवणिग्वृत्तिरेवश्रेष्ठेतिभगवतो
मतम् नतुश्ववृत्त्यानीचसेवया ६३ तत्राप्यापदिमृगययाविप्ररूपेणाध्यापनादिना ६४ कारवः प्रति
लोमजविशेषावरुडादयः तेषांवृत्तिंकरादिक्रियां आपद्वृत्तीरस्तुनानुकल्पेनवर्त्तेतेत्याह कृच्छ्रादिति ६५ ॥

भा० १० दृत्तोदंतान् नधावेन्नशोधयेत् त्रिकालमप्सुमज्जेत्तसुषवल्वस्नायात् स्थंडिलेशयः भूमिशायी ३ तप्येत
९१ पंचाग्नीन् सूर्य्येणसहचतुर्दिक्षु अग्नीन्निधायात्मानंतापयेदित्यर्थः आसारषाट् आसारंधारासंपातंसहते
इतितथा अभ्रावकाशनामव्रतंचरेदिति जलेआकंठमग्नः उदवासनामव्रतंचरेत् ४ उलूखलेनवात्र

केशरोमनखश्मश्रुमलानिविभृयाद्दंतः नधावेदप्सुमज्जेत्त्रिकालंस्थंडिलेशयः ३ ग्री
ष्मेतप्येतपंचाग्नीन्वर्षास्वासारषाड्जले आकंठमग्नःशिशिरएवंवृत्तस्तपश्चरेत् ४ अ
ग्निपक्वंसमश्नीयात्कालपक्वमथापिवा उलूखलाश्मकुट्टोवादंतोलूखलएववा ५ स
द्यःसंचिनुयात्सर्वमात्मनोवृत्तिकारणं देशकालबलाभिज्ञोनाददीतान्यदाहृतं ६ व
न्यैश्चरुपुरोडाशैर्निर्वपेत्कालचोदितान् नतुश्रौतेनपशुनामांयजेतवनाश्रमी ७ अग्नि
होत्रंचदर्शश्चपूर्णमासश्चपूर्ववत् चातुर्मास्यानिचमुनेराम्नातानिचनैगमैः ८

अश्मनावाकुट्टयतिकंडयतीतितथा दंताएवोलूखलंयस्यसतथा ५ संचिनुयात् आहरेत् अन्यदाका
लान्तरेआहृतंकालांतरेनाददीत लब्धेनवेनाद्येपुराणंतुपरित्यजेदितिनारदोक्तेः ६ कालचोदितान्
आग्रयणादीन् ७ किंच अग्निहोत्रमिति नैगमैर्वेदवादिभिर्मुनेश्चाम्नातानि ८ ९१

५६

अस्यापवर्गमविकल्पमाह कर्मभिरिति गृहाश्रमएवतिष्ठेयदिप्रज्ञावानत्तर्हिप्रव्रजेद्वा ५१ गृहाद्यासंगेदोषमाह
यस्त्वितित्रिभिः ५२ बंधएवाभिनयेनदर्शयति अहोइति वालाआत्मजायस्याःसावालात्मजाःप्रजाअमांविनाअना
थाःसन्तकथंजीविष्यंतीति ५३ [illegible] गृहेयआशयोवासनाभोगस्तेन आसर्वतःक्षिप्तंहृदयंयस्यसः अ

कर्मभिर्गृहमेधीयैरिष्ट्वामामेवभक्तिमान् तिष्ठेद्वनंचोपविशेत्प्रजावान्वापरिव्रजेत् ५१ यस्त्वासक्त
मतिर्गेहेपुत्रवित्तैषणातुरः स्त्रैणःकृपणधीर्मूढोममाहमितिवध्यते ५२ अहोमेपितरौवृद्धौभार्या
वालात्मजात्मजाः अनाथामामृतेदीनाःकथंजीवंतिदुःखिताः ५३ एवंगृहाशयाक्षिप्तहृदयोमूढधीर
यं अतृप्तस्ताननुध्यायन्मृतोंधंविशतेतमः॥५४॥ इतिश्रीमद्भागवतेमहापुराणेएकादशस्कंधे
श्रीभगवदुद्धवसंवादेसप्तदशोध्यायः॥१७॥ श्रीभगवानुवाच॥ वनंविविक्षुःपुत्रेषुभार्यांन्यस्यसहैववा
वनएववसेच्छांतस्तृतीयंभागमायुषः॥१॥ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिंप्रकल्पयेत् वसीतवल्कलं
वासस्तृणपर्णाजिनानिच २ स ३

धंतमः अतितामसीयोनिं ५४॥ इतिश्रीएकादशेसप्तदशः॥१७॥ अथाष्टादशेवदद्धर्मंवनस्थयतिगोचरं अधिकारविशेषे
णविशेषंचापितद्भूतं क्रमप्राप्तान्वनस्थधर्मानाह वनमिति आयुषस्तृतीयंभागंपंचसप्ततिवर्षपर्यंतं ततःपरं
क्षीणेंद्रियस्यषष्ठिणेपिसंन्यासाधिकारःस्यादितिभावः १ वसीतपरिदधीत २ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ

भा० ए० संन्यासे विघ्ना भवंति तान विगणय्य संन्यसेदेवेत्याशयेनाह विप्रस्येति केनाभिप्रायेण कुर्वंतीत्यत आह अय
९२ मिति परं परब्रह्म १४ एवं प्रव्रजितस्य धर्मानाह बिभृयाच्चेदिति परं कौपीनादन्यद्वासो यदि धारयितुमिच्छ
ति तर्हि कौपीनमाच्छाद्यते यावत्तावन्मात्रं धारयेदित्यर्थः त्यक्तं प्रैषोच्चारात्सर्वमेव अतोऽन्यत्किंचिदपि न वि

विप्रस्य वै संन्यसतो देवा दारादिरूपिणः विघ्नान्कुर्वंत्ययं ह्यस्मानाक्रम्य समियात्परं १४
बिभृयाच्चेन्मुनिर्वासः कौपीनाच्छादनं परं त्यक्तं न दंडपात्राभ्यामन्यत्किंचिदनापदि १५
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलं सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् १६ मौना
नीहानिलायामा दंडा वाग्देहचेतसां नह्येते यस्य संत्यंग वेणुभिर्न भवेद्यतिः १७ भिक्षां
चतुर्षु वर्णेषु विगर्ह्यान्वर्जयंश्चरेत् सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेन तावता १८

भृयात् दंडपात्राभ्यामित्यावश्यजलपात्रादेरुपलक्षणं १५ मनःपूतं मनसा सम्यग्विचार्य यच्छुद्धं तदाच
रेत् १६ मौनं वाचो दंडः अनीहा काम्यकर्मत्यागो देहस्य प्राणायामश्चेतसः एतेऽतस्त्रयो दंडा यस्य न संति
अंग हे उद्धव अंगच्छन्नैर्वेणुभिरिति वा १७ चतुर्ष्विति ब्राह्मणेष्वेव वृत्तिभेदेन चतुर्विधेषु पूर्वपूर्वासंभ
वे वा विगर्ह्यान् अभिशस्तपतितान् असंक्लृप्तान् अत्रायं लाभो भविष्यतीति पूर्वमनुद्दिष्टान् १८ ९२

अस्य निष्कामस्य फलमाह एवमिति धमनिभिः शिराभिः संततो व्याप्तः यावज्जीवं कृतेन तपसा मुमुक्षु
मां सइत्यर्थः ऋषिलोकात् महर्लोकादिक्रमेण अयं भावः अंतःकरणशुद्धिभक्तिद्वारा ऽत्रैव तावन्मुच्येत
प्रतिबंधकवाद्गुल्येन त्वनेन क्रमेण मुच्यत इति ९ तं सकामं निंदति यस्त्विति निःश्रेयसं मोक्षफलं अल्पी
यसे आविरिंच्यादल्पमेव तस्मै १० एवं यावज्जीवं वर्त्तमानस्य मोक्षः तृतीयभागावसाने तु मंदविरागे ऽ

एवं चीर्णेन तपसा मुनिर्धमनिसंततः मां तपोमयमाराध्य ऋषिलोकादुपैति मां ९ यस्त्वेतत्कृच्छ्र
तश्चीर्णं तपो निःश्रेयसं महत् कामायाल्पीयसे युंज्याद्बालिशः कोऽपरस्ततः १० यदासौ नियमेऽ
कल्पो जरया जातवेपथुः आत्मन्यग्नीन्समारोप्य मच्चित्तोऽग्निं समाविशेत् ११ यदा धर्मविपाके
षु लोकेषु निरयात्मसु विरागो जायते सम्यङ्न्यस्ताग्निः प्रव्रजेत्ततः १२ इष्ट्वा यथोपदेशं मां दत्वा स
र्वस्वमृत्विजे अग्नीन्स्वप्राण आवेश्य निरपेक्षः परिव्रजेत् १३
संन्यासाऽधिकारः यदितिः ततोऽर्वागेव धर्मो
शक्तो भवेत् तदापि सम्यगविरक्तः विरक्तो वा तत्राविरक्तस्य कृत्यमाह यदेति जातवेपथुः कंपादेहयस्य
सः ११ विरक्तं प्रत्याह यदेति १२ तत्रादौ कृत्यमाह इष्ट्वेति यथोपदेशं आद्याष्टकपूर्वकं प्राजापत्येष्ट्या मामि
॥ ऽऽ ॥ ऽऽ ॥ ष्ट्वा स्वप्राणे आत्मनि १३ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥

भा०ए० ६३

यतः शिलवृत्त्या प्राप्तेन मद्दीयेनान्धसा अन्नेन स्वच्छसत्त्वः सन् निवृत्तमोहः संसिद्धिं मुक्तिमुच्यते २५ ननु मिष्टा
न्नविषयकथं शिलान्ने प्रवृत्तिः स्यात्तत्राह नेति एतद्दृश्यमानं मिष्टान्नादि वस्तु तत्तया न पश्येत् यतो विन
श्यति अत इहामुत्र च लोके असक्तचित्तः सन् चिकीर्षितात्तदर्थेहात्याद्विरमेत् २६ ननु तत्तथापि यावद्विनाशं
सुखहेतुत्वात्तच्चिन्तावतः कुतो विरागः स्यात्तत्राह यदेतदिति एतज्जगत् ममतास्पदं मनोवाक्प्राणैः संहतं
सहितमहंकारास्पदं शरीरं च सर्वं तज्जन्यं सुखं च आत्मनि मायामात्रमिति तर्केण स्वप्नादिदृष्टान्तेन न्यस्त्वा स्व

वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत् संसिद्ध्यत्याश्वसंमोहः शुद्धसत्त्वः शिलान्धसा २५ नैतद्वस्तु
तया पश्येद्दृश्यमानं विनश्यति असक्तचित्तो विरमेदिहामुत्र चिकीर्षितात् २६ यदेतदात्मनि जगन्म
नोवाक्प्राणसंहतं सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत् २७ ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वाम
पेक्षकः सलिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः २८

स्थः आत्मनिष्ठः सन् पुनस्तन्न स्मरन्नापि चिंतयेत् २७
एवं वटूदकादिधर्मानुक्त्वा परमहंसधर्मानाह ज्ञाननिष्ठ इति सार्द्धैर्दशभिः बहिर्विरक्तो मुमुक्षुः सन् यो ज्ञाननि
ष्ठो वा मोक्षेऽप्यनपेक्षो मद्भक्तो वा स लिंगान् त्रिदंडादिसहितान् आश्रमान् नत्तकर्मान्त्यक्त्वा तदाशक्तिं त्यक्त्वा
यथोचितधर्मं चरेदित्यर्थः न पुनरत्यंतत्याग एव विवक्षितः पुनर्धर्मे विधर्मे विधानात् अक्रियत्वे स्यात्तेरा
ध्याय वक्ष्यमाणत्वाच्चेत्तर्हि पूर्वस्मात्को विशेषस्तमाह अविधिगोचरः विधिकिंकरो न स्यादिति एतदेव स्फुटी

करिष्यति शौचमाचमनं स्नानं न तु चोदनया चरेदित्यादिना २८ ॥

६३

वहिर्ग्रामात पावितं प्रोक्षणादिभिः शोधितं विभज्य विसृज्य त्राकंभूतेभ्यः अशेषमित्यधिकाहरणं निर
स्तयाचित्तमितिपाठे माधुकरेणयाचितमन्नं चेत्तर्हि विभज्य भुंजीत नत्वयाचितादि भक्ष्यचतुष्टयमित्यर्थः मा
धुकरे तु नैवेद्यभेदेनान्येषु विद्यते नैवद्यकं तिपस्तु वित्तयं भौतिकं वहिरिति स्मृतेः यद्वा तदानीकेनापि

२०॥२

वहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः विभज्य पावितं शेषं भुंजीताशेषमाहृतं १९ एकश्चरे
न्महीमेतामनिःसंगः संयतेंद्रियः आत्मक्रीड आत्मरत आत्मवान्समदर्शनः विविक्तक्षेमशरणो मद्भा
वविमलाशयः आत्मानं चिंतयेदेकमभेदेन मया मुनिः २१ अन्वीक्षेतात्मनो वंधं मोक्षं च ज्ञाननिष्ठ
या वंधइंद्रियविक्षेपो मोक्ष एषां च संयमः २२ तस्मान्नियम्य षड्वर्गं मद्भावेन चरेन्मुनिः विरक्तः क्षु
द्रकामेभ्यो लब्ध्वात्मनि सुखं महत् २३ पुरग्रामव्रजान्सार्थान्भिक्षार्थं प्रविशंश्चरेत् पुण्यदे
शसरिच्छैलवनाश्रमवतीं महीम् २४

चितं चेत्तन्मध्ये तस्मै किंचिद्विभज्य दत्त्वेत्यर्थः १९ किंच एकश्चरेदिति आत्मन्येव क्रीडाकौतुकं यस्य सः आ
त्मन्येव चरतः संतुष्टः आत्मवान् धीरः २० विविक्तं विजनं क्षेमं निर्भयं शरणं स्थानं यस्य सः मयि भावेन वि
मलआशयो यस्य सः २१ वंधं मोक्षं च केन वंधः केन वा मोक्ष इति तावाह वंध इति २२ २३ पुराणि हट्टादिमंति

भा० ए०
६४

अलंतर्हिभिक्षाप्रयत्नेनापितत्राह आहारमात्रार्थंसमीहेतचेष्टेततस्यप्राणधारणंयुक्तंसम्यक् कथंतेनप्राणधारणे
नतत्त्वंविचार्यते किंतेनापितत्राह तद्विज्ञायेति ३४ तर्हिकिंमिष्टान्नादिकमप्याद्यमेवकेनेवमुक्तमित्याहयदृच्छ
येति ३५ यथाहमीश्वरोलीलयाचरामि तथाज्ञानीज्ञाननिष्ठःनाशङ्कःकुर्यात्विधिकिंकरत्वेनतस्यज्ञाननिष्ठावि

आहारार्थंसमीहेतयुक्तंतत्प्राणधारणं तत्त्वंविमृश्यतेतेनतद्विज्ञायविमुच्यते ३४ यदृच्छयोपप
न्नान्नमद्याच्छ्रेष्ठमुतापरं तथावासस्तथाशय्यांप्राप्तंप्राप्तंभजेन्मुनिः ३५ शौचमाचमनंस्नानंनतु
चोदनयाचरेत् अन्यांश्चनियमान्ज्ञानीयथाऽहंलीलयेश्वरः ३६ नहितस्यविकल्पाख्यायाचमद्वी
वा ५ क्षयाहता आदेहांतात्क्वचित्ख्यातिस्ततःसंपद्यतेमया ३७ दुःखोदर्केषुकामेषुजातनिर्वेदआत्मवा
न् अजिज्ञासितमद्धर्मोगुरुंमुनिमुपव्रजेत् ३८ तावत्परिचरेद्भक्तःश्रद्धावाननसूयकः यावद्ब्रह्मविजा
नीयान्मामेवगुरुमादृतः ३९

रोधादित्यर्थः ३६ कुतोविधिकिंकरत्वाभावस्तत्राह नहितस्यविकल्पाख्याभेदप्रतीतिः नन्वस्तिसासत्यंयाचासीत्सा
पिमद्वीक्षयाज्ञानेनहता ननुनहतापुनर्दृश्यमानत्वात्तत्राह आदेहांतात्क्वचित्कदाचिद्बाधितैवख्यातिर्भवति ३७ तदेवं
निरुक्तस्याऽपरोक्षज्ञानवतःसंन्यासंतद्धर्मांश्चोक्त्वाकेवलवैराग्यवंतंविविदिषुंप्रत्याह दुःखोदर्केष्विति नजिज्ञासितोमद्ध
र्मोमत्प्राप्तिसाधनंयेनसः ३८ मामेवमद्दृष्ट्यैवगुरुंपरिचरेत् ततःपरमेकश्चरेदित्यादिधर्मैर्वर्तेतइतिभावः ३९ ६४

कथंचरेत्तदाह बुधोविवेकवानपिबालकवन्मानावमानविवेकशून्यः कुशलोनिपुणोपिजडवत्फलानु
संधानाभावेनविद्वान्पंडितोपिउन्मत्तवल्लोकरंजनाभावेननैगमोवेदार्थनिष्ठोपिगोचर्य्यां अनियताचा
रमिव २९ वेदवादरतः कर्मकांडव्याख्यानादिनिष्ठः हैतुकः केवलतर्कनिष्ठः शुष्कवादप्रयोजनेष्टो योविवाद

बुधोबालकवत्क्रीडेत्कुशलोजडवच्चरेत् वदेदुन्मत्तवद्विद्वान्गोचर्य्यांनैगमश्चरेत् २९ वेदवा
दरतोनस्यान्नपाषंडीनहैतुकः शुष्कवादविवादेनकंचित्पक्षंसमाश्रयेत् ३० नोद्विजेतजनाद्धीरो
जनंचोद्वेजयेन्नतु अतिवादांस्तितिक्षेतनावमन्येतकंचन ३१ देहमुद्दिश्यपशुवद्वैरंकुर्य्यान्नके
नचित् एकएवपरोह्यात्माभूतेष्वात्मन्यवस्थितः ३२ यथेंदुरुदपात्रेषुभूतान्येकात्मकानिच अल
ब्ध्वानविषीदेतकालेकालेशनंक्वचित् लब्ध्वानहृष्येद्धृतिमानुभयंदैवतंत्रितं ३३

स्तस्मिन् ३० अतिवादान्दुरुक्तानि ३१ आत्मदृष्ट्यातावद्वैरकारणंनास्तीत्युक्तं तमेवाह एकएवेति देह
दृष्ट्यापिनास्तीत्याह भूतानिचदेहाः अतिकारणरूपेणैकात्मकानि ३२ दैवतंत्रितम् दैवाधीनंयतः ३३ ॥

भा० ए० तत्तस्यासौ मुक्त एवेत्याह इत्येवंभूतेन स्वधर्म्मेण निर्णिक्तं शुद्धं सत्वं यस्य सः अत एव विज्ञाता मम गतिरैश्वर्यं येन सः

६५ ४५ उक्तमर्थं संक्षिप्याह य एष आचारलक्षणः पितृलोकसंप्राप्तिफलः मद्भक्तियुक्तः मदर्पणेन कृतः ४६ प्र

करणार्थमुपसंहरति एतत्तेभिहितं यथाभक्तो भूत्वा मां परं संप्राप्नुयादिति ॥४७॥ इति श्रीएकादशे ऽष्टादशः ॥१८॥ तेन

इति स्वधर्म्मनिर्णिक्तसत्वो निर्ज्ञातमद्गतिः ज्ञानविज्ञानसंपन्नो विरक्तः समुपैति मां ४५ वर्णाश्रमवतां

७२ धर्म्म एष आचारलक्षणः स एव मद्भक्तियुतो निःश्रेयसकरः परः ४६ एतत्तेभिहितं साधो भवान् पृ

च्छति यच्च मां यथा स्वधर्म्मसंयुक्तो भक्तो मां समियात्परं ॥४७॥ इति श्रीमद्भागवते महापुराणे एका

दशस्कंधे यतिधर्मवर्णनं नामाष्टादशोध्यायः ॥१८॥ श्रीभगवानुवाच ॥ यो विद्याश्रुतसंपन्न आत्मवा

न्नानुमानिकः मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत् ॥१॥

विशेषविमुक्तस्य कृत्यं नास्तीति गद्यते गुणदोषव्यवस्थार्थं यमादीनां च निर्णयः ज्ञानादेर्निर्णयः पूर्वं कृतो

ह्याश्रमधर्मतः एकोनविंशतितमे ज्ञानादिस्त्याग उच्यते तदेवं तर्कतो वाधितोपि देहादिप्रपंचो यावदपरो

क्षानुभवेन दिङ्मोहादिवन्न लीयते तावत्तज्ज्ञानमभ्यसेत्ततो मुक्तिरित्युक्तं आदेहान्तात्क्वचित्ख्यातिस्ततः संपद्यते

मयीत्यादि यस्य त्वपरोक्षानुभवेन प्रपंचो लीनप्रायस्तस्य न किंचित्कृत्यमस्तीत्याह य इति विद्यानुभवः तदुप

यंतेन श्रुतेन संपन्नः अत एवात्मवान् नानुमानिकः केवलपरोक्षज्ञानवान्न भवति अनकारपाठे प्राकृश्रुत्यनुकूलतर्कतो

६५ निश्चितार्थ इत्यर्थः सदिदं द्वैतं निवृत्तिसाधनं च मायामात्रमिति ज्ञात्वा ज्ञानं च तत्साधने संन्यसेत् अयमेव विद्वत्संन्यासो नाम १

अनधिकारिणः संन्यासं निंदति द्वाभ्यां यस्त्विति प्रचंडोऽत्यासक्त इंद्रियसारथिर्बुद्धिर्यस्य सः सुरान्यष्टव्यान्स्वात्मानं च नि
ह्नुते प्रतारयति निह्नवफलमाह अस्मादिति ४० चतुर्णां प्रधानधर्मानाह भिक्षोरिति द्विजस्य ब्रह्मचारिणः ४१
अन्यधर्मान्नकाङ्क्षेद्गृहस्थस्याप्यतिदिशति ब्रह्मचर्यमिति शौचं रागादिराहित्यं तस्य ब्रह्मचर्यमाह ऋतौ

यस्त्वसंयतषड्वर्गः प्रचंडेंद्रियसारथिः ज्ञानवैराग्यरहितस्त्रिदंडमुपजीवति सुरानात्मानमात्मस्थं निह्नु
ते मां च धर्महा अविपक्वकषायोऽस्मादमुष्माच्च विहीयते ४० भिक्षोर्धर्मः शमोऽहिंसा तप ईक्षा वनौ
कसः गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनं ४१ ब्रह्मचर्यं तपः शौचं संतोषो भूतसौहृदं गृह
स्थस्याप्यृतौ गंतुः सर्वेषां मदुपासनम् ४२ इति मां यः स्वधर्मेण भजेन्नित्यमनन्यभाक् सर्वभू
तेषु मद्भावो मद्भक्तिं विंदते दृढां ४३ भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरं सर्वोत्पत्त्यप्ययं ब्रह्म
कारणं मोपयाति सः ४४

ऋतौ गंतुरिति ४२ एवंभूतवर्णाश्रमधर्मानाह इति मामिति दृढां मद्भक्तिं विंदते ४३ ततः किमत आह
भक्त्येति महेश्वरत्वे हेतुः सर्वोत्पत्त्यप्ययं सर्वस्योत्पत्त्यप्ययौ यस्मात् अत एव तत्कारणम् मां ब्रह्मरूपं वैकु
ण्ठवासिनं यद्वा ब्रह्मणो वेदस्य कारणं मां उपयाति सामीप्येन प्राप्नोतीति ४४ ॥ ऽऽ ऽऽ ॥ ऽऽ ॥

भा०१० ९६ र्यदस्ति रज्ज्वादि तदेव मध्येपि न तु सर्प्पादि तद्वदयं विकारो नास्तीत्यर्थः यद्वा आद्यंतयोर्यदस्ति तन्मध्येप्यस्त्येव
न तस्य जन्मादयः संति अतस्त्वं निर्विकारं ब्रह्मेति ७ ज्ञानादेर्विशेषं जिज्ञासुः पृच्छति ज्ञानमिति विशुद्धमेतज्ज्ञा
नं विपुलं निश्चितं यथा भवति तथा कथयेति महद्भिर्ब्रह्मादिभिर्विमृग्यं ८ महद्विमृग्यत्वमभिनयेनाह तापत्र
येणाभिहतस्य अतः संतप्यमानस्य अंघ्रिद्वंद्वमेवातपत्रं तस्मात् न केवलमातपत्रात् किंत्वमृतमप्यभिवर्षाव

उद्धव उवाच ॥ ज्ञानं विशुद्धं विपुलं यथैतद्वैराग्यविज्ञानयुतं पुराणं आख्याहि विश्वेश्वर विश्वमूर्त्ते त्वद्भक्ति
योगं च महद्विमृग्यं ९ तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीश पश्यामि नान्यच्छरणं
तवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात् १० दष्टं जनं संपतितं बिलेस्मिन्कालाहिना क्षुद्रसुखोरुतर्षं
समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरासिंच महानुभाव ॥ ११ ॥ श्रीभगवानुवाच ॥ इत्थमेतत्पुरा राजा भी
ष्मं धर्मभृतां वरं अजातशत्रुः पप्रच्छ सर्वेषां नोनुशृण्वतां १२

र्षतीति यतः तस्मात् अतिकृपामुत्पादयन्नाह दष्टमिति अस्मिन्बिले संसारकूपे पतितं तत्र च कालाहिना दष्टमेव
मपि क्षुद्रसुखेष्वेव उरुः तर्षः स्पृहा यस्य तं दह्यमानः कथं समुद्धरणीय इति चेत्तत्राह आपवर्ग्यैः अपवर्गबोधकै
र्वचोमृतैरासिंचेति ११ तद्विश्वासार्थं विहृतसभायां निर्णीतमहं वक्ष्यामीत्याह इत्थमिति १२ ॥ ऽऽ ॥ ऽऽ

अत्र हेतुमाह ज्ञानिनस्त्विति यस्मादहमेव तस्येष्टः अपेक्षितः स्वार्थः फलं हेतुश्च तत्साधनं च संमतः स्वर्गोभ्युदयश्च अपव
र्गः संसारनिवृत्तिश्च अतस्तस्य मत्तोन्यत्कर्तव्यं वा किंचिदस्तीत्यर्थः २ अत्र विद्वदनुभवं प्रमाणयति ज्ञानविज्ञानेति यथोक्तं ज्ञा
निनमभिन्नं इति ज्ञानीति यतोऽसौ ज्ञानेन मां धारयति ३ तस्य ज्ञानं स्तौति तप इति अलमत्यर्थं ज्ञानस्य कलया लेशेन
४ ज्ञानेन सहितं नात्यर्थं तं यथा भवति तथा ज्ञात्वा तत्संपन्नः सन् मामेव भज अन्यत्सर्वं त्यजेत्यर्थः ५ तस्य प्रत्यया

ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः स्वर्गश्चैवापवर्गश्च नान्योर्थो मदृते प्रियः २ ज्ञानविज्ञानसं
सिद्धाः पदं श्रेष्ठं विदुर्मम ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बिभर्ति मां ३ तपस्तीर्थं जपो दानं पवि
त्राणीतराणि च नालं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता ४ तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मान
मुद्धव ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावितः ५ ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि
यति ५ सर्वयज्ञपतिं मां वै संसिद्धिं मुनयोऽगमन् ६ त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो मायांतरापतति नाद्य
पवर्गयोर्यत् जन्मादयोस्य यदमी तव तस्य किं स्युराद्यंतयोर्यदसतोऽस्ति तदेव मध्ये ७

पूर्वेषां संमतमाह ज्ञानेति मामेव संसिद्धिं प्राप्ताः ६ तदेव ज्ञानं संक्षेपत उपदिशति त्वयीति त्रिविधः आध्या
त्मिकादिविकारो देहादिः स मायानतु परमार्थः यद्यस्मादंतरा मध्य एवापतति रज्जौ सर्पमालादिवत् नाद्य
पवर्गयोः तत्वादावंते चास्ति अतो यत् यदा स्य विकारस्यामी जन्मादयः स्युः तदा तस्य तवाधिष्ठानभूतस्य किं न

भा० ए०
९६

एकेनैव सर्वकार्याणामनुगतिं कार्याणां कारणात् पृथक् सत्त्वं चोपपादयति सार्धेन तत्र यदि न कदाचिदनीदृ-
शं जगदित्यादिमतेनैव तेषां भावानामुत्पत्त्यादयो न स्युः तर्हि कारणस्यैकस्याभावादेकात्मता मिथ्यात्वं च न स्यात्
अतस्तेषामुत्पत्त्यादीन् साधयति स्थित्येति त्रिगुणात्मनां सावयवानामित्यर्थः विमता भावा उत्पत्त्यादिमं-
तः सावयवत्वात् घटादिवदिति पश्येत् १५ ततश्चादावुत्पत्तौ अन्ते परिणामान्तरापत्तौ च कारणत्वेन मध्ये चाश्रय-
त्वेन सृज्यात् सृज्यं कार्यान्तरं प्रतिपादनियात् अनुगच्छेत् ततः प्रतिसंक्रामे तेषां प्रलये च यदवशिष्येत तत्

स्थित्युत्पत्त्यप्ययान् पश्येद्भावानां त्रिगुणात्मनां १५ आदावन्ते च मध्ये च सृज्यात्सृज्यं यद-
न्वियात् पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् १६ श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतु-
ष्टयं प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते १७

देव सदिति पश्येदित्यर्थः १६ वैराग्यमाह श्रुति-
रिति द्वाभ्यां श्रुतिः नेह नानास्ति किंचनेत्यादिः प्रत्यक्षं पटादिकार्यं तन्त्वादिव्यतिरेकेण न दृश्यते चैतन्यव्य-
तिरेकेण च न किंचिद्दृश्यत इति ऐतिह्यं महाजनप्रसिद्धिः निराकारा बहिर्भूता त्माभूते भूते भूते व्यवस्थि-
तः इति पठीयः अनुमानं विमतं मिथ्या दृश्यत्वात् शुक्तिरजतवदित्यादि एवं प्रमाणचतुष्टयं एतेष्वनव-
स्थानात् एतैर्बाधितत्वात् सर्वं सर्वानुगतं सत्यमात्मतत्त्वं पश्यन् विकल्पस्य च मिथ्यात्वात्ततो विरज्यते विरक्तो

२८ [illegible]
९६

१२ त्यानादिभिरुपबृंहितान् तत्सहितानित्यर्थः १२ तत्र ज्ञानं कथयति नवेति प्रकृतिपुरुषमहदहंकाराः पंचतन्मात्राणि
एकादशेंद्रियाणि पंचमहाभूतानि त्रयोगुणाः एतान् भावान् अष्टाविंशतितत्त्वानि भूतेषु ब्रह्मादिस्थावरांतेषु
कार्येष्वनुगतानि येन ज्ञानेनेक्षेत अथ एष्वपि भावेषु एकं परमात्मतत्त्वं अनुगतं येनेक्षेत कार्यकारणा
त्मकं जगत् पश्यन् परमकर्मैवैतत् न तु ततः पृथगिति येन पश्येत् तज्ज्ञानमित्यर्थः १४ विज्ञानमाह एतदे

निवृत्ते भारते युद्धे सुहृन्निधनविह्वलः श्रुत्वा धर्मान् बहून् पश्चान्मोक्षधर्मान् पृच्छत १२
तानहं तेऽभिधास्यामि देवव्रतमुखाच्छ्रुतान् ज्ञानवैराग्यविज्ञानश्रद्धाभक्त्युपबृंहितान् १३ नवै
कादश पंच त्रीन् भावान् भूतेषु येन वै ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितं १४ एतदेव हि वि
ज्ञानं न तथैकेन येन यत् १५ स्थित्युत्पत्त्यप्ययान् पश्येद्भावानां त्रिगुणात्मनाम्

वेति श्लोकार्धेन यत् यदा येनैकेनानुगतान् एकात्मकान् भावान् पूर्वमैक्षत तान् तथा पूर्ववन्नैक्षेत किंतु तदेकं
परमकारणं ब्रह्मैव तदा एतदेव विज्ञानमुच्यते एतदुक्तं भवति परोक्षज्ञानेनापरोक्षभ्रमस्य दिङ्मोहादिवि
वनिवृत्त्यभावात् तदा जगत्पश्यन्नप्यात्मनः पृथक् सदिति न मन्यते अपरोक्षज्ञानेन तु बाधितमेव जीवन्मुक्तः
संस्कारशेषं पश्यति अतः परोक्षापरोक्षज्ञाने ज्ञानविज्ञानशब्दाभ्यामुच्यते इति १५ रामरामरामराम॥

भा० ए०
६८
किंवद्गुणाचित्तमेवांतर्बहिर्निष्प्रसक्तोनधेयोः कारणं तदेवाह यदात्मनीति द्वाभ्यां यदात्मनि मय्यीश्वरे चित्त
मर्पितं तदा पुमान् धर्मादीन् प्राप्नोत्येव २३ एतदेव व्यतिरेकेणाह यदीति यदि हत्तत्र्छितं विकल्पे देहगेह
दावर्पितं सत् परिधावति तदाधिकं रजस्वलमसन्निष्ठं च भवति ततश्च विपर्ययं अधर्मादिकं विद्धि
यदात्मन्यर्पितं चित्तं शांतं सत्वोपबृंहितं धर्मं ज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते २३ यदर्पि
तं तद्विकल्पे इंद्रियैः परिधावति रजस्वलं चासन्निष्ठं चित्तं विद्धि विपर्ययं २४ धर्मो मद्भक्ति
कृत्प्रोक्तो ज्ञानं चैकात्म्यदर्शनं गुणेष्वसंगो वैराग्यमैश्वर्यं चाणिमादयः २५ उद्धव उवाच
यमः कतिविधः प्रोक्तो नियमो वारिकर्षन कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो २६
किं दानं किं तपः शौर्यं किं सत्यं चर्तमुच्यते कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा २७
पुंसः किंस्विद्बलं श्रीमन् भगो लाभश्च केशव का विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव च २८ कः
पंडितश्च मूर्खः कः पंथा उत्पथश्च कः कः स्वर्गो नरकः कः स्वित्को बंधुरुत किं गृहं २९
२४ स्वाभिप्रेतान् धर्मादीन् व्याचष्टे धर्मो मद्भक्तिकृत् ततस्स एव प्रोक्तः प्रकृष्ट उक्तः शास्त्रेषु २५ धर्मादीनां
महाजनप्रसिद्धानमन्यथात्वात् यमादिष्वपि संख्यातः स्वरूपतो वा किंचिद्विलक्षणं स्यादिति संभावनया त
द्विशेषजिज्ञासुः पृच्छति यम इति पंचभिः २६ इष्टमभ्यर्हितं धनं चकिं २७ परेति विद्यादीनां श्रीमंडितं २८ २९ ६८

ननुवेदोक्तस्वर्गादिसुखाशयानविरज्येतेत्याह कर्म्मणामिति आविरिंच्याद्ब्रह्मलोकपर्य्यंतंअदृष्टमपिसुखं
अमंगलंदुःखरूपंनश्वरंचपश्येत् १९ भक्तियोगंसकारणमाह भक्तियोगःपूर्वमुक्तएव तथापितस्मिन्प्री
तिंशृण्वतेतुभ्यंपुनश्चकथयिष्यामि २० श्रद्धा श्रवणादरः शश्वदितिसर्वत्रानुषज्यते मदनुकीर्त्तनंश्रवणा
नंतरमत्कथाव्याख्यानमित्यर्थः १ २ अंगचेष्टालौकिकीक्रिया वचसालौकिकेनापिमद्गुणानामीरणंकथ

कर्मणांपरिणामित्वादाविरिंच्यादमंगलं विपश्चिन्नश्वरंपश्येददृष्टमपिदृष्टवत् १९ भक्तियोगः
पुरैवोक्तःप्रीयमाणायतेनघ पुनश्चकथयिष्यामिमद्भक्तेःकारणंपरं २० श्रद्धामृतकथायांमेश
श्वन्मदनुकीर्त्तनं परिनिष्ठाचपूजायांस्तुतिभिःस्तवनंमम १ आदरःपरिचर्य्यायांसर्वांगैरभिवंद
नं मद्भक्तपूजाभ्यधिकासर्वभूतेषुमन्मतिः २ मदर्थेष्वंगचेष्टाचवचसामद्गुणेरणं मय्यर्पणंचमन
सःसर्वकामविवर्ज्जनं ३ मदर्थेऽर्थपरित्यागोभोगस्यचसुखस्यच इष्टंदत्तंहुतंजप्तंमदर्थंयद्व्रतंत
पः ४ २१ एवंधर्मैर्मनुष्याणामुद्धवात्मनिवेदिनां मयिसंजायतेभक्तिःकोऽन्योऽर्थोऽस्यावशिष्यते २२

नं ३ मदर्थेमद्भक्तजनार्थंतद्विरोधिनोऽर्थस्यपरित्यागः भोगस्यतत्साधनस्यचंदनादेः सुखस्यपुत्रोपलालनादेः
इष्टादिवैदिकंयत्कर्मतदपिमदर्थंकृतंभक्तेःकारणमित्यर्थः ४ २१ भक्तिप्रेमलक्षणासंजायते अतोऽस्यभक्तस्यअन्यः
कोऽर्थःसाधनरूपःसाध्यरूपोवावशिष्यते सर्वोऽपिस्वतएवभवतीत्यर्थः २२

दंडोभूत द्रोहः तस्य त्यागो दानं न धनार्पणं कामत्यागो भोगो ऽनपेक्षा तपः न कृच्छ्रादि स्वभावो वासना तस्य ज
यः प्रबंधः शौर्यं न विक्रांतिः समं ब्रह्म तस्य दर्शनमालोचनं सत्यं विषयत्वात्सत्यं न यथार्थभाषणमात्रं ३३ ऋ
न्यच्च ऋतं सूनृता सत्या प्रिया च वाक् एवं च ऋतसत्ययोः स्फुट एव विवेकः कर्मप्राप्तत्यागो व्याख्यातुमादौ त
तोभेदेन शौचं व्याचष्टे तस्यापि मलत्यागरूपत्वेन त्यागभेदप्रतीतेः कर्मसु असंगमो ऽनासक्तिः शौचं त्यागस्तु

दंडन्यासः परं दानं कामत्यागस्तपः स्मृतम् स्वभावविजयः शौर्यं सत्यं च समदर्शनं ३३ ऋतं च
सूनृता वाणी कविभिः परिकीर्तिता कर्मस्वसंगमः शौचं त्यागः संन्यास उच्यते ३४ धर्म इष्टं
धनं नृणां यज्ञो ऽहं भगवत्तमः दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलं ३५ भगो मे ऐश्वरो भावो
लाभो मद्भक्तिरुत्तमः विद्यात्मनि भिदाबाधो जुगुप्सा ह्रीरकर्मसु ३६ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ

संन्यास इति तयोर्भेद इत्यर्थः ३४ नृणामिष्टं धनं धर्मः न पश्वादिसाधारणं भगवत्तमः परमेश्वरो ऽहमेव यज्ञः मद्बुद्ध्या
यज्ञः अनुष्ठेय न क्रियाबुद्ध्येत्यर्थः यज्ञार्थदानं दक्षिणा सा च ज्ञानोपदेशः न हिरण्यादिदानं तेन हि यज्ञरूपो विष्णुः प्रीयते
दुर्दमस्य मनसो दमनं बलं तत्त्वमनोदमने हेतुत्वात्प्राणायाम इति दयालोकप्रसिद्धौ वाभिप्रेता ३५ लाभं व्याचिख्यासुः प्रथमं भगं त
तोभेदेन व्याचष्टे लोके तयोरभेदप्रसिद्धेः भगो भाग्यं तच्च मे ऐश्वरो भावो मदीयं ऐश्वर्यादि षाड्गुण्यमित्यर्थः उत्तमो लाभस्तु
मद्भक्तिः न पुत्रादिः विद्या चात्मनि प्रतीतस्य भेदस्य बाधः न ज्ञानमात्रं अकर्मसु जुगुप्साहेयत्वदर्शने ह्रीः न ल

प्रश्नान्पृष्टार्थान् विपरीतान् अत्र शमादीन् ३० यमनियमानाह अहिंसेति त्रिभिः अस्तेयं मनसापि परार्थस्याग्र-
हणं आस्तिक्यं धर्मे विश्वासः शौचं बाह्याभ्यंतरं चेति द्वयं अतो द्वादश नियमाः श्रद्धा धर्मादरः उभयोः श्लोक-
योर्यमस्मृतास्ते यमा नियमाश्च यद्वा उभयोः प्रवृत्तयोः मुमुक्षोर्यमा मुख्याः सकामस्य नियमा मुख्याः स्मृता इत्य-

क आढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः एतान्प्रश्नान्मम ब्रूहि विपरीतांश्च सत्पते ३० श्रीभग-
वानुवाच॥ अहिंसा सत्यमस्तेयमसंगो ह्रीरसंचयः आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयं
शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनं तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं एते यमाः सनि-
यमा उभयोर्द्वादश स्मृताः॥ पुंसामुपासितास्तात यथाकामं दुहंति हि ३१ शमो मन्निष्ठता बुद्धेर्द-
म इंद्रियसंयमः॥ तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ३२

धेः अत्र हेतुमाह हि यस्मात् उपासिताः सेविताः संतः पुंसां प्रवृत्तानां च यथाकामं कामानुसारेण मोक्षमभ्युदयं च
दुहंतीति ३१ मुमुक्षोरुपादेयान् शमादीन् हेयांश्च दुःखादीन् महाजनप्रसिद्धेभ्यो विलक्षणानाह शम इत्या-
दीनायावत्समाप्ति एतेनैव तद्विपरीता अशमादयोप्युक्ता ज्ञेयाः शमो मन्निष्ठता बुद्धेः न तु शांतिमात्रं दमः इंद्रियसंयमः

नतु बोधादिदमनं तितिक्षा विहितदुःखस्य संमर्षः सहनं न मारण-
दैः जिह्वोपस्थयोर्जयो वेगधारणं धृतिः न त्वनुद्वेगमात्रं ३२

भा० ए०
१००

उपसंहरति एतद्इति साधुमोक्षोपयोगितया ॥ ४१ एतदेव सर्वं गुणदोषयोर्विवेकायोद्भवेन स्पष्टमिति तयोः संक्षेप
तो लक्षणमाह किं वहुना वर्णितेन गुणदोषयोर्लक्षणमेतावदेव तदाह गुणदोषयोर्विवेकदृष्टिर्दर्शनं दोषः
गुणस्तु तदुभयदर्शनवर्जितः स्वभावइति ॥ ४२ ॥ इति श्रीएकादशएकोनविंशः ॥ १९ ॥ विशेषयोगत्रयं प्रोक्तं भक्तिज्ञान
क्रियात्मकं गुणदोषव्यवस्थार्थमधिकारिविभागतः गुणदोषाह दृष्टिर्दोषो गुणस्तूभयवर्जित इत्युक्तं तदादि

एतत्क्रवते प्रश्नाः सर्वे साधुनिरूपिताः ॥ ४१ किं वर्णितेन बहुना लक्षणं गुणदोषयोः गुणदोषदृष्टि
र्दोषो गुणस्तूभयवर्जितः ॥ ४२ इति श्रीमद्भागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्धवसंवादे श्रेयोभे
दे एकोनविंशोध्यायः ॥ १९ ॥ उद्धव उवाच ॥ विधिश्च प्रतिषेधश्च निगमो ह्यीश्वरस्य ते अवेक्षतेरविंदाक्ष गु
णं दोषं च कर्मणां ॥ वर्णाश्रमविकल्पं च प्रतिलोमानुलोमजं द्रव्यदेशवयःकालान्स्वर्गं नरकमेव च १
प्रति विधिश्चेति षड्भिः विधिश्च प्रतिषेधश्च ईश्वरस्य तव निगमः आज्ञारूपो वेदः स च विधेयानां प्रतिषेध्याना
वा कर्मणां गुणदोषं च पुण्यपापरूपमवेक्षते उत्तमाधमभावेन तदधिकारिणां वर्णानामाश्रमाणां च विक
ल्पभेदं च गुणदोषरूपमवेक्षते प्रतिलोमानुलोमजं च गुणदोषत एवावेक्षते प्रतिलोमजा उत्तमवर्णा
सु स्त्रीषु हीनवर्णेभ्यः पुरुषेभ्यो जाताः सूतवैदेहकादयः अनुलोमजास्तु उत्तमवर्णेभ्यः पुरुषेभ्यो हीनवर्णा
सु स्त्रीषु जाताः मूर्धावसिक्ताम्बष्ठादयः आसन्संतस्तु विज्ञेयाः प्रतिलोमानुलोमजा इति गुणदोषौ द्रव्यादीनक

गुणा एव श्रीर्मंडनं न विरागादि दुःखसुखयोरत्ययोऽतिक्रमः अननुसंधानं सुखं न भोगः विषयभोगापेक्षैव दुः
खं नाग्निदाहादि बंधान्मोक्षं द्वयं वा यो वेत्ति स पंडितः न विद्वान्मात्रम ३७ अहं बुद्धिरित्युपलक्षणं देहगेहादि
ष्वप्यहं ममेत्यभिमानवान्मूर्ख इत्यर्थः मन्निगमः मां नितरां गमयति प्रापयतीति यो निवृत्तिमार्गः स एव पंथाः
सन्मार्गः न कंटकादिशून्यः चित्तविक्षेपः प्रवृत्तिमार्गः स उत्पथः कुमार्गः न तु चोराद्याकुलः सत्वगुणस्योद
य उद्रेकः स्वर्गः नेंद्रादिलोकः ३८ तमस उन्नाह उद्रेकः स नरकः न तामिस्रादिः गुरुरेव बंधुः न भ्रात्रादिः स चाहमेव
श्रीगुरुणा नैरपेक्ष्याद्याः सुखं दुःखसुखात्ययः दुःखं कामसुखापेक्षा पंडितो बंधमोक्षवित् ३७ मूर्खो दे
हाद्यहंबुद्धिः पंथा मन्निगमः स्मृतः उत्पथश्चित्तविक्षेपः स्वर्गः सत्वगुणोदयः ३८ नरकस्तमउन्नाहो
बंधुर्गुरुरहं सखे गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ३९ दरिद्रो यस्त्वसंतुष्टः कृपणो यो ह्यजितेंद्रि
यः गुणेष्वसक्तधीरीशो गुणसंगो विपर्ययः ४० यथाहं जगद्गुरुः एक एव परो बंधुर्विषमे समुपस्थिते
गुरुः सकलधर्मात्मा यत्र किंचन गोप्यहरिरिति स साधनभोगाय तन्न गृहं तच्च मानुष्यं मनुष्यशरीरमेव न ह
र्म्यादि गुणैः संपन्न आढ्य उच्यते न धनी ३९ असंतुष्टो यः स दरिद्रः न निःस्वः योऽजितेंद्रियः स कृपणः शोच्यः
न दीनः विषयेष्वनासक्तधीर्यः स ईशः स्वतंत्रः न राजादिः गुणसंगः गुणेषु संगो यस्य स विपर्ययः अनीशः
एतच्च समादि विपर्ययोपलक्षणार्थम् ४० ॥ ६६ ॥ ६६ ॥

विषयाभेदेऽप्यधिकारिभेदेनाविरोधं वक्तुं प्रथमं योगत्रयमाह योगा इति योगा उपाया ब्रह्मकर्मदेवताकांडैः
प्रोक्ताः कर्म च निष्कामं श्रेयो विधित्सया मोक्षसाधनेच्छया अन्यस्तूपायो नास्तीति काम्यकर्मादिकं व्यावर्त्तयति
तथा चोत्तराध्याये स्फुटीकरिष्यति य एतानित्यादिना ५ तेष्वधिकारिभेदमाह निर्विण्णानामिति द्वाभ्यां इह एषां
मध्ये कर्मसु निर्विण्णानां दुःखबुद्ध्या तत्फलेषु विरक्तानां अत एव तत्साधनभूतकर्मन्यासिनां ज्ञानयोगः सिद्धिद इत्युत्तरे

श्रीभगवानुवाच योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽ
स्ति कुत्रचित ५ निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु तेष्वनिर्विण्णचित्तानां कर्मयोग
स्तु कामिनां ६ यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् न निर्विण्णो नातिसक्तो भक्तियोगो
ऽस्य सिद्धिदः ७ तावत्कर्माणि कुर्वीत न निर्विद्येत यावता मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ८

णान्वयः अनिर्विण्णचित्तानां दुःखबुद्धिशून्यानां अतः कामिनां तत्फलेष्वविरक्तानामित्यर्थः ६ यदृच्छया केनापि भा
ग्योदये ७ तत्र काम्यकर्मप्रवर्त्तमानस्य सर्वात्मना विधिप्रतिषेधाग्रविकार इत्युत्तराध्याये वक्ष्यति. निष्कामकर्मयो
गाधिकारिणस्तु यथाशक्ति सच ज्ञानभक्तियोगाधिकारात्प्रागेव तदधिकृतयोस्तु स्वल्पः ताभ्यां सिद्धत्वात्तु न किंचि
दिति सावधि कर्मयोगमाह तावदिति नवभिः कर्माणि नित्यनैमित्तिकानि यावता यावत् ८ ऽऽ ॥ ऽऽ ॥ ऽऽ

तथापिप्रस्तुतेकिमायातमतआह गुणदोषेति गुणदोषदृशिर्दोषइतिनिराकृतत्वात् गुणदोषभिदादृष्टिमंतरे
णत्वांविनानिषेधविधिलक्षणंतवेववचः कथं तत्त्ववचोंऽतरेणनृणांनिःश्रेयसंकथंस्यात् तत्रापिश्रोतव्योमंतव्यइत्या
दिसाधनविधेः नानुध्यायाद्बहूञ्छब्दान्वाचोविग्लापनंहितदित्यादिनिषेधस्यचावश्यकत्वादितिभावः यद्वा
गुणदोषभिदादृष्टिमंतरेणनिषेधलक्षणंतेववचोविनेतिसामानाधिकरण्यमेवास्तु यद्वा गुणदोषभिदादृष्टिमंत
रेणनिषेधविधिलक्षणमपि वचनंकथंनुतत्त्वमस्यादिवाक्यवन्निःश्रेयस्यपरंस्यात् सर्वस्यतत्परत्वांगीकारादि

गुणदोषभिदादृष्टिमंतरेणवचस्तव निःश्रेयसंकथंनृणांनिषेधविधिलक्षणं २ पितृदेवम
नुष्याणांवेदश्चक्षुस्तवेश्वर श्रेयस्त्वनुपलब्धेऽर्थेसाध्यसाधनयोरपि ३ गुणदोषभिदादृष्टिर्नि
गमात्तेनहिस्वतः निगमेनापवादश्चभिदाया इतिविभ्रमः ४ त्यर्थः २ ननुपितरोदेवाश्चसर्वज्ञाः प्र
त्यक्षतोदृष्ट्वामनुष्येभ्यः कथयिष्यंतिनेत्याह पित्रादीनांसर्वेषांतवत्वदीयवेदरूपोवेदस्त्वनुश्रेयः श्रेष्ठंचक्षुः प्रमा.
णकं अत्वनुपलब्धेऽर्थेमोक्षस्वर्गादौचतथासाध्यसाधनयोः इदमस्यसाध्यमिदमस्यसाधनमत्रापि ३ ननुदेवगु
णदोषदृष्ट्यभावेनिःश्रेयसंनघटेत किंच शास्त्रेणैवविहितंभेददृष्टिंतस्मिन्नेवविषयेशास्त्रंकथंनिवर्तयेदि
त्याह गुणेति तेनिगमात्त्वदाज्ञारूपाद्भेदादेवनहिस्वतः यस्मादर्थप्राप्तत्वेननिवर्तितेति इतिश्रुतिः हस्फुवंभे मोभवति तेनिवर्तयेतिशेषः ४

अप्रमत्तो मुक्तसंगः सुखं प्राप्नोति इत्यत्र दृष्टांतः छिद्यमानमिति यमैर्यवन्निर्दयैः पुरुषैः कृतं नीडं यस्मिन्‌ तं स्वके
तनं स्वस्याश्रमं अलंपटः अनासक्तः १४ दार्ष्टांतिकमाह अहोरात्रैश्छिद्यमानमायुर्बुद्ध्वा भयेन वेपथुः कंपो य
स्य सः १५ एवमप्रयतमानं प्रमत्तो निंदति नृदेहं प्लवं नावं प्राप्येत्यध्याहारः यो भवाब्धिं न तरेत्स आत्महा
तत्र हेतवः आद्यं सर्वफलानां मूलं एतदुपार्जितकर्मभिः सर्वप्राप्तेः सुदुर्लभमुद्यमकोटिभिरप्याप्तुम

छिद्यमानं यमैरेतैः कृतनीडं वनस्पतिं खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः १४ अहो
रात्रैश्छिद्यमानं बुद्ध्वायुर्भयवेपथुः मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति १५ नृदेहमाद्यं
सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिं न
तरेत्स आत्महा १६ यदारंभेषु निर्विण्णो विरक्तः संयतेन्द्रियः अभ्यासेनात्मनो योगी धारये
दचलं मनः १७

शक्यं तथापि तु सुलभं यदृच्छया लब्धत्वात्‌ तं च सुकल्पं पटुतरं किंच
गुरुः संश्रितमात्र एव कर्णधारो नेता यस्य तं मया च स्मृतमात्रेणानुकूलमारुतेन प्रेरितं १६ एवं तावदविरक्तस्य
वैराग्यद्वारा ज्ञानभक्तिसाधकं कर्मयोगमुक्त्वेदानीं सम्यग्विरक्तस्य ज्ञानयोगं तस्य च ज्ञानयोगं तस्य च ज्ञानयो
एवं किंचित्कृत्यं वर्ज्जनीयं चाह सार्द्धैर्नवभिः यदा तु आरंभेषु कर्मसु निर्विण्णः दुःखदर्शनेन नो द्विग्नः तत्फलेषु विरक्तश्च

508

कर्म्मयोगिनो ज्ञानभक्तिभूमिकारोहप्रकारमाह स्वधर्मस्थ इति अनाशीःकामः अफलकामः अन्यस्मिन्निषिद्धव
र्ज्जीवं नरकयानं हि दैवेधैव विहितातिक्रमाद्वा निषिद्धाचरणाद्वा अतः स्वधर्मस्थत्वान्निषिद्धवर्ज्जेनात्वं नरकं नया
ति अफलकामत्वान्न स्वर्गमपीत्यर्थः ९ किंत्वस्मिंल्लोकेऽस्मिन्नेव देहे अनघः निषिद्धत्यागी अतः शुचिः निवृत्त
रागादिमलः यदृच्छयेति केवलज्ञानादपि भक्तेर्दुर्लभतां द्योतयति १० अनेन प्रकारेण ज्ञानभक्तिसाधनत्वान्नरदे

स्वधर्मस्थो यजन्यज्ञैरनाशीःकाम उद्धव न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् ९ अस्मिंल्लोके वर्त्त
मानः स्वधर्मस्थोऽनघः शुचिः ज्ञानं विशुद्धमाप्नोति मद्भक्तिं च यदृच्छया १० स्वर्गिणोऽप्येतमि
च्छंति लोकं निरयिणस्तथा साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकं ११ न नरः स्वर्गतिं कांक्षे
न्नारकीं वा विचक्षणः नेमं लोकं च कांक्षेत देहावेशात्प्रमाद्यति १२ एतद्विद्वान्पुरा मृत्योरभ
वाय घटेत सः अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदं १३ छिद्यमानं यमैरेतैः हे

देहेऽस्तीति स्वर्गिणोऽपीति निरयिण इति दृष्टान्तत्वेनोक्तं ज्ञानभक्तिभ्यां ज्ञानभक्त्योः तदुभयं स्वर्गिनारकिश
रीरं ११ अतो नरः स्वर्गतिं न कांक्षेत नारकीमिति दृष्टान्तः यद्वा स्वर्गनरकसाधनकर्माणि न कुर्यादित्यर्थः अ
स्यातिश्रेष्ठत्वात्पुनरपि मनुष्यो भवेयमित्यपि न कांक्षेत यतो देहावेशात् देहासक्त्या स्वार्थे प्रमाद्यति अवधान
शून्यो भवति १२ अपि तु एतद्देहं साधकमिति विद्वान् तत्त्वार्थसिद्धिः इदमपि मर्त्यं ज्ञात्वा अप्रमत्तः अनलसः सन्

ततश्चागमापायिषु तेषवधिभूतात्मदर्शनात्तद्विवेकापन्नसंसारनिर्विण्णस्य अतो विरक्तस्य ततश्चोक्तवेदिनः
गुरूपदिष्टालोचनस्य ततो गुरूपदिष्टस्यैव चिंतितस्य पुनः पुनरनुचिंतया दौरात्म्यं देहाद्यभिमानं त्यजति
२२ किंच यमादिभिर्योगमार्गैः आन्वीक्षिक्या पदार्थद्वयशोधनेन ममार्चनाध्यानादिभिर्वा वासुदेवेनास्य
पन्नस्य स्वात्मदर्शयति एतैरुपायैर्योग्यं परमात्मानं मनः स्मरेत् नान्यैः अतोन्यत्तं कुर्यादित्यर्थः २३ ननु

निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः मनस्त्यजति दौरात्म्यं चिंतितस्यानुचिंतया २२ यमादि
भिर्योगपथैरान्वीक्षिक्या च विद्यया ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः २३ यदि कुर्या
त्प्रमादेन योगी कर्म विगर्हितं योगेनैव दहेदंहो नान्यत्तत्र कदाचन २४ स्वे स्वेऽधिकारे
यानिष्ठा स गुणः परिकीर्त्तितः २५

पापप्राप्तौ प्रायश्चित्तं कार्यमेव तत्राह यदीति योगेन ज्ञानाभ्यासेनैव एतच्च भक्तस्यापि नामसंकीर्त्त
नाद्युपलक्षणार्थं नान्यत्कृच्छ्रादि २४ ननु नित्यनैमित्तिकं कर्म सत्त्वशोधकत्वाद्गुणः हिंसादिकं त्व
शुद्धिहेतुत्वाद्दोषः तत्र च तन्निवर्त्तकत्वात्कृच्छ्रादिप्रायश्चित्तं गुण इति विधिप्रतिषेधाभ्यामुक्तत्वात्
प्रायश्चित्तं विना योगेनैव कथं पापं दहेत्तत्राह स्वे स्व इति सार्द्धेन स एव गुणो नेतरः २५ रामरामरामराम

तत्रप्रथममेवास्थैर्यंतद्धारणासंभवात्तत्स्वभावानुसारेणवशीकरणमाह यर्हीत्याशुभ्राम्यत्परिभ्रमत् दनवस्थितंभव
ति तदानुरोधेनकिंचिदपेक्षापूरणद्वारेण १८ ननुतर्हियथासुखमेवस्यात्तत्राह मनोगतिमितिनविसृजेत्तन्नोपेक्षेत किं
त्वप्रमत्तःसन् आत्मवशंनयेत् आत्मानंलक्षयेदित्यर्थः १९ अनुरोधमार्गंसदृष्टांतंस्तौति एषइति एषःअनुवृत्तिमार्गेणम
नःसंग्रहःपरमोयोगः तत्साधनत्वादुपचारेणस्तुतिः यथाअदांतस्यदमनीयस्य अर्वतःअश्वस्यहृदयज्ञत्वेनाभि

धार्यमाणंमनोयर्हिभ्राम्यदाश्वनवस्थितं अतंद्रितोनुरोधेनमार्गेणात्मवशंनयेत् १८ मनोगतिं
नविसृजेज्जितप्राणोजितेंद्रियः सत्वसंपन्नयाबुद्ध्यामनआत्मवशंनयेत् १९ एषवैपरमोयोगो
मनसःसंग्रहःस्मृतः हृदयज्ञत्वमन्विच्छन्दम्यस्येवार्वतोमुहुः २० सांख्येनसर्वभावानांप्रति
लोमानुलोमतः भवाप्ययावनुध्यायेन्मनोयावत्प्रसीदति २१

प्रायेणागतिमन्विच्छन्अपेक्षमाणः अश्वधारकः प्रथमंकिंचिद्गतिमनुवर्तते तदाचरश्मिनातंधृत्वैवगच्छति
नतूपेक्षते तद्वदित्यर्थः २० एवमीषद्वशीकृतस्यमनसोऽत्यंतनैश्चल्योपायानाह सांख्येनेतित्रिभिः सांख्येनतत्त्वा
विवेकेनसर्वभावानांमहदादिदेहांतानां अनुलोमतःप्रतिलोमतःप्रकृत्यादिक्रमेणभवं प्रतिलोमतः
पृथिव्यादिक्रमेणाप्ययंच अनुध्यायेत् प्रसीदतीतिनिश्चलंभवति २१ ॥ २१

कथं भजेत किं वा ततो भवतीति तदाह प्रोक्तेनेति द्वाभ्यां श्रद्धालुर्मत्कथायां मे शृण्वन्मदनुकीर्त्तनमित्यादि
ना तत्रैवोक्तेन मामसकृन्नित्यं हृदय्या हृत्कृताः कामा नश्यन्ति २८ हृदयमेव ग्रन्थिरहंकारस्तत्रैव कार्य्य
सर्वसंशयाः असंभावनादयः कर्म्माण्यनारब्धफलानि संसारहेतुभूतानि २९ तदेवं व्यवस्थया ऽधिकारि

प्रोक्तेन भक्तियोगेन भजतो मा ऽसकृन्मुनेः कामा हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते २८ भि
द्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्म्माणि मयि दृष्टे ऽखिलात्मनि २९ त
स्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ३० यत्क
र्म्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् योगेन दानधर्म्मेण श्रेयोभिरितरैरपि सर्वं मद्भक्तियोगे
न मद्भक्तो लभते ऽञ्जसा स्वर्गापवर्गं मद्धाम कथंचिद्यदि वाञ्छति ३१

यदुक्तं तत्र च भक्तेरन्यनिरपेक्षत्वादन्यस्य च तत्सापेक्षत्वाद्भक्तियोग एव श्रेष्ठ इत्युपसंहरति तस्मादि
ति त्रिभिः मदात्मनः मयि आत्मा चित्तं यस्य तस्य श्रेयः श्रेयःसाधनं ३० तत्र हेतुः यत्कर्मभिरित्यादि
इतरैरपि तीर्थयात्राव्रतादिभिः श्रेयःसाधनैर्यद्भाव्यं सत्त्वशुद्ध्यादि तत्सर्वं अञ्जसा अनायासेनैव स्व
र्गमपवर्गं मद्धाम वैकुंठं लभत एव वाञ्छा तु नास्तीत्युक्तं यदि वाञ्छतीति ३१ ॥ ऽऽ ऽऽ ॥ ऽऽ ॥ ऽऽ

तदुपपादयति यस्माद्विधिनिषेधाभ्यामनेन गुणदोषविधानेन कर्म्मणां नियमः संकोचः कृतः कृत इत्यत
आह जात्यैवोत्पत्त्यैवाशुद्धानां सर्वप्राणिनां संगानां त्याजनेच्छया अयंभावः पुरुषस्याशुद्धिर्नाम प्रवृ
त्तेरन्यास्ति स्वाभाविकप्रवृत्त्यैव तस्य मलिनत्वात् न च सहसा सर्वतो निवृत्तिः कर्तुं शक्यते अतस्तदं न कर्तव्य
मिदमेव कर्त्तव्यमिति स्वाभाविकप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रियते यथा न वेदप्रवृत्तिपरो वेदस्तथान्तरा

कर्म्मणां जात्यशुद्धानामानेन कर्म्मणां नियमः कृतः गुणदोषविधानेन संगानां त्याजनेच्छया २६
जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु वेद दुःखात्मकान्कामान् परित्यागेऽप्यनीश्वरः ततो
भजेत मां प्रीत्या श्रद्धालुर्दृढनिश्चयः जुषमाणश्च तान्कामान्दुःखोदर्कांश्च गर्हयन् २७

ध्याये वक्ष्यामः उत्पत्त्यैव हि कामेष्वित्यादिना अतो योगिनः स्वाभाविकवृत्त्यभावान्न प्रायश्चित्तादिविधिर्गो
चरेतेति २६ भक्त्याधिकारिणो भक्तियोगमाह जातश्रद्ध इति नवभिः मत्कथासु जातश्रद्धः अत एवान्येषु क
र्मसु उद्विग्नः न तु तत्फलेषु विरक्तः तदाह वेदेति यद्यपि वेद तथापि तत्परित्यागे अनीश्वरः असक्तः एवंभूतो
यः श्रद्धालुः भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः सन् ततस्तदनंतरं मां प्रीत्या भजेत विषयांश्च सेवमानोऽपि तेषु
प्रीतिं कुर्य्यादित्याह गर्हयन्निति २७

भा०ए०
१०५

इत्येकादशे विंशतितमः ॥२०॥ जयति श्रीस्वपरानंदपरानंदनृकेशरी यत्कृपालवलेशेन श्रीधरः सत्कृतिः
कृती इत्थं तन्नामिच्छयासंतः क्षमंतां मम साहसं मयाह्निस्वीयबोधाय यत्कृतं मतं तन्न सर्वतः एकविंशे क्रिया
ज्ञानमुक्तिष्वनधिकारिणां कामिनां द्रव्यदेशादिगुणदोषाः प्रपंचिताः तदेव गुणदोषव्यवस्थार्थं
योगत्रयमुक्तं तत्र च ज्ञानभक्तिसिद्धानां तत्किंचिद्गुणदोषोऽसाधकानां तु प्रथमतो निवृत्तकर्मनिष्ठा
नां यथाशक्ति नित्यनैमित्तिकं कर्मसत्वशोधकत्वाद्गुणः तदकरणं निषिद्धकरणं च तन्मलीमसकरणत्वा

इति श्रीमद्भागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्धवसंवादे भक्तियोगो विंशोऽध्यायः ॥२०॥
श्रीभगवानुवाच ॥ य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान् क्षुद्रान्कामांश्चलैः प्राणैर्
जुषंतः संसरंति ते १

द्दोषः तन्निवर्तकत्वाच्च प्रायश्चित्तं गुणः विशुद्धसत्वानां तु ज्ञाननिष्ठानां ज्ञानाभ्यास एव सिद्धिहेतुत्वाद्गुणः
भक्तिनिष्ठानां पुनः श्रवणकीर्तनादिभक्तिरेव गुणः तद्विरुद्धं सर्वमुभयेषां दोष इत्युक्तं इदानीं तु येन सिद्धाना
मपि साधकाः किंतु केवलं काम्यप्रधानाः तेषां सकलगुणदोषान् प्रपंचयिष्यन् आदौ तान् बहिर्मुखान्
निंदति य एतानिति मत्पथः मदुक्तमार्गान् क्षुद्रान् तुच्छान् चलैः अस्थिरैः प्राणैर्देहवायुभिरिंद्रियैर्वा जुषं
तः सेवमाना भवंति ते संसरंति निखिलगुणदोषभाक्त्वेन नानायोनीः प्राप्नुवंतीत्यर्थः १ ॥ ऽऽ ॥ १०५

तत्र हेतुमाह नकिंचिदिति धीरा धीमंतः यतो मम एकांतिनः मय्येव प्रीतियुक्ताः अतो मया दत्तमपि न
गृह्णंति किंच कथ्यं न वांछंतीत्यर्थः अपुनर्भवं आत्यंतिकमपि कैवल्यं ३२ तदुपपादयति नैर
पेक्ष्यमेव परमुत्कृष्टं अनल्पं महत् निःश्रेयसं फलं तत्साधनं च प्राहुः मे भक्तिर्निराशिषः प्रार्थना
शून्यस्य निरपेक्षस्य प्रार्थनाकारणभूतापेक्षारहितस्य पुंसो भवेत् यद्वा मे निरपेक्षस्य या भक्तिः सा

नकिंचित्साधवो धीरा भक्ता ह्येकांतिनो मम वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवं ३२ नैरपेक्ष्यं
परं प्राहुर्निःश्रेयसमनल्पकं तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ३३ न मय्येकांत
भक्तानां गुणदोषोद्भवा गुणाः साधूनां समचित्तानां बुद्धेः परमुपेयुषां ३४ एवमेतान्मयादि
ष्टाननुतिष्ठंति मे पथः क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः ३५

निराशिषो भवेदित्यर्थः ३३ अनेन प्रकारेण सिद्धानां न गुणदोषा इति विरोधपरिहारमुपसंहरति न मयीति गु
णदोषैर्विहितप्रतिषिद्धैरुद्भवो येषां ते गुणाः पुण्यपापादयः साधूनां निरस्तरागादीनां अतः समचित्तानां अत
एव बुद्धेः परमीश्वरं प्राप्तानां ३४ काम्यकर्मनिष्ठान्निंदयिष्यंस्तान्मुक्तिमार्गानुपसंहरति मे पथः मत्प्राप्त्यु
पायान् येऽनुतिष्ठंति ते क्षेमं कालमायादिरहितं मम लोकं विंदंति यत्परमं ब्रह्म तत्त्वविदः ३५

भा० ए०
१०६

धातुषु देहेषु नामरूपाणि वर्णाश्रमादीनि कल्पनायां प्रयोजनमाह एतेषां प्राणिनां स्वार्थसिद्धये प्रवृत्तिनियम
मद्वारा धर्मादिपुरुषार्थसिद्धये ६ न केवलं देहेष्वेव अपि तु देशकालादिभावानामपि आदिशब्देनानुपादे
यानां फलनिमित्ताधिकारिणां ग्रहणं वस्तूनामुपादेयानां व्रीह्यादीनामपि मम सा नियमार्थं संकोचार्थमि
त्यर्थः ७ एवं गुणदोषविषयं परिशोधयन्नयोः शुद्ध्यशुद्धि मलत्वात् शुद्ध्यशुद्धी प्रपंचयति अकृष्णसार इत्य

वेदेन नामरूपाणि विषमाणि समेष्वपि धातुषूद्धव कल्प्यंते एतेषां स्वार्थसिद्धये ६ दे
शकालादिभावानां वस्तूनां मम सत्तम गुणदोषौ विधीयेते नियमार्थं हि कर्मणः ७ अकृष्ण
सारो देशा[illegible]नामब्रह्मण्योऽशुचिर्भवेत् कृष्णसारोप्यसौवीरकीकटासंस्कृतेरिणं ८ कर्म
ण्यो गुणवान्कालो द्रव्यतः स्वत एव वा यतो निवर्तते कर्म स दोषोऽकर्मकः स्मृतः ९

ष्टभिः देशानां मध्ये कृष्णसहरिणरहितोऽशुचिः तत्राप्यब्रह्मण्यः ब्राह्मणभक्तिहीनोऽयंतमशुचिः कृष्णसारोपि कृष्णेनमृ
गेण सारः श्रेष्ठोयः सोप्यसौवीरः कीकटः सुवीराः सत्पुरुषाः तद्रहितः सौवीरः कीकटोऽपि अशुचिः तदुक्तं सर्वे पुण्यतमो दे
शः सत्पात्रं यत्र लभ्यते इति तद्विवर्जितोयः कीकटः अंगवंगकलिंगादि असंस्कृतः संमार्जनादिरहितः अशु
न्यो म्लेच्छबहुलो वा इरिणं ऊषरं एकवद्भावः तदशुचिः तदन्यः शुचिरित्यर्थादुक्तं भवति ८ कालस्य शुद्ध्यशु
द्धी दर्शयति कर्मण्य इति द्रव्यतः द्रव्यसंपत्त्या स्वतो वा पृथ्वीक्र्यादिः कर्मण्यः कर्मार्हः स कालस्तस्मिन्कर्म नि

१०६

ननु तैरेव कर्मभिः केचिद्गुणदोषभाजः केचिन्नेति कुतो वैषम्यं नह्यग्निना केचिन्नप्यंते केचिन्नेति संभवतीति त
त्राह स्वे स्व इति अधिकारभेदेन कल्पितौ गुणदोषौ न वस्तुनिष्ठाविति भावः २ तदाह शुद्ध्यशुद्धी इति योग्यत्वायोग्य
त्वे गुणदोषौ तन्निमित्तौ पादेयत्वानुदेयत्वे शुभाशुभौ तन्निमित्तावर्थानर्थौ तत्र शुद्ध्यशुद्धी धर्मार्थं शुद्धेन धर्मः अशुद्धे
नाधर्म इति गुणदोषौ व्यवहारार्थं अशुद्धावपि राजादीनां व्यवहारदर्शनादुपादेयं नान्यदिति शुभाशुभौ यात्रार्थं

स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्त्तितः विपर्य्ययस्तु दोषः स्यादुभयोरेष निश्चयः २ शुद्ध्यशु
द्धी विधीयेते समानेष्वपि वस्तुषु द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ धर्मार्थं व्यव
हारार्थं यात्रार्थमिति चानघ ३ दर्शितोऽयं मयाचारो धर्ममुद्वहतां धुरं ४ भूम्यम्ब्वग्न्यनि
लाकाशा भूतानां पंच धातवः आब्रह्मस्थावरादीनां शारीरा आत्मसंयुताः ५

दोषत्वेप्यापत्सु शरीर निर्वाहमात्रोपादानेन पापं अधिकोपादाने तु पापमिति ३ मया मन्वादिरूपेण ध
र्मरूपां धुरं भारं कर्मजडानामित्यर्थः ४ शुद्ध्यशुद्धी प्रपंचयिष्यन् वेदोक्तत्वेन तदभिनिवेशो माभूदिति समा
नेष्वपि वस्तुष्विति यदुक्तं तत्प्रपंचयति भूमीति त्रिभिः भूतानां प्राणिनां धारयंतीति धातवः कारणानि शारी
राः शरीरारंभकाः देहतः साम्यमुक्तम् जीवतोऽप्याह आत्मसंयुता इति ५ ॥ ऽऽ ॥ ऽऽ ॥

रा१

भा० ए० द्रव्यादिभिः द्रव्यस्यशुद्धिरित्युक्तं तत्रवचनादिशुद्धिरेकैवेव द्रव्यवस्तुशुद्धिवद्रूपेति तांप्रपंचयति धा
१०७ न्येतिशुद्धिः धान्यानांवायुना दारूणांग्रहचमसादीनांतोयाग्निकोष्णोदकैः अस्पृष्टः कालेनतं तत्वांतोये
नरसतैलानांअग्नि नारथ्यादीनांयथायथाकालाभिः दारुलौकिकग्रहचमसादिच अस्थिमज्जेदंतादि
रसास्तैलघृतादयः तैजसाः सुवर्णादयस्तेषां पार्थिवानांचरथ्याकर्दमघटेष्टकाकोष्ठादीनांयथाय थं

धान्यदार्वस्थितंतूनांरसतैलसचर्मणां कालुवाय्वग्निमृत्तोयैः पार्थिवा
नांयुतायुतैः ११ अमेध्यालिप्तयद्येनगंधलेपंव्यपोहति भजतेप्रकृतिं
श्रु१ तस्यतच्छौचंतावदिष्यते १२

कालादिभिःशुद्धिः तदापिकोत्यजाद्युपघाततारतम्यवदेशकालवस्थाद्यनुसारेणाच एतैरन्यैश्चयुतायु
तैर्मिलितैः केवलैश्चकालस्यपुनर्ग्रहणंयुतायुक्ततत्वदर्शनार्थं ११ अस्पृश्यस्पर्शेषुशुद्धिमुक्तोलेपावि
षयेप्याह अमेध्येति यत्पीरपात्रवस्त्रादियेनद्रव्येणजारम्लोदकादिनागंधंचलेपंचव्यपोहतित्यज
ति स्वगतंचमलंत्यक्त्वाप्रकृतिंचस्वमेवरूपंभजते तस्यतत्तत्शौचंशोधकं यावताचतद्रव्येणदिनाव्य
ह१ पोह्यति तावत्प्रमाणंस्वरूपतः आवृत्तितोवातत्तत्कर्तव्यमिष्यते १२ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ १०७

वस्तुशरीरोपात्तानांद्रव्याणांशुद्ध्यशुद्धीदर्शयति द्रव्यस्येतिचतुर्भिः द्रव्येणतोयादिनाशुद्धिः मूत्रादिनात्वशुद्धिः वच
नेनशुद्धमशुद्धंवेतिसंदेहेशुद्धमित्येवंरूपेणब्राह्मणवचनेनशुद्धिः विपरीतेनाऽशुद्धिः संस्कारेणप्रोक्षणादिना
पुष्पादेःशुद्धिः अवघ्राणादिनात्वशुद्धिः कालेनदशाहादिनानवोदकादेःशुद्धिः विपरीतेनाशुद्धिः कालेमेघोद
कंग्राह्यंवर्ज्यंत्वहमेवहि अकालेदशरात्रंस्यात्ततःशुद्धिर्विधीयते पर्युषितान्नादेरशुद्धिः अंत्यजाद्युपहतानां
तडागाद्युदकानांमहत्वाऽल्पत्वाभ्यांशुद्ध्यशुद्धी शक्त्याऽशक्त्यास्त्र्यौपरागादिस्नानकौलादेः शक्तान्नप्रत्यशुद्धिः वुद्धा

द्रव्यस्यशुद्ध्यशुद्धीचद्रव्येणवचनेनच संस्कारेणाथकालेनमहत्वाल्पतयाथवा शक्त्याऽश
क्त्याथवावुद्ध्यासमृद्ध्याचयदात्मने अघंकुर्वंतिहियथादेशावस्थानुसारतः १०

पुत्रजन्मादौदशाहाद्बहिर्ज्ञानेनशुद्धिः अंतर्ज्ञानेनाशुद्धिः समृद्ध्याजीर्णमलवद्वस्त्रादेःसमृद्धंप्रत्यशुद्धिः द
रिद्रंप्रतिशुद्धिः तत्रापिविशेषमाह यदिति एतेचद्रव्यवचनादयोद्रव्याशुद्धिद्वारा आत्मनेयदघंकुर्वंतितद्दे
शावस्थानुसारतएवयथायथावत्कुर्वंति नसर्वतः तथाहि निर्भयएवदेशेकुर्वंति नतुचौराद्याकुले तथारो
गाद्यतिरिक्तयुवाद्यवस्थायामेवअघंकुर्वंति नवाल्यरोगाद्यवस्थायामिति तथाचस्मृतिः देशंकालंत
थात्मानं द्रव्यंप्रयोजनं उपपत्तिंवस्थांचज्ञात्वा शौचंप्रकल्पयेदिति १० ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ

भा० ए० दोषस्य क्वचिद्दोषत्वाभावे गुणत्वे चोदाहरणं दर्शयति समानस्य तस्यैव कर्मणः सुरापानादेराचरणं पति
१०८ तानां पतनहेतुरपि जात्या कर्मणा वा पतितानां न पुनःपातकं अधिकाराभावात् प्रायश्चित्तविधानाभावाच्च न भवंति पूर्वमेव पतितत्वा
अतोऽत्र दोषस्यापि दोषता नास्तीत्यर्थः तथा संगोपि योषिता पतेद्दोषः अपितु गुणः अतो भार्यामुपेयादिति वि
धानात् उभयत्र दृष्टांतः पूर्वमेवाधःशयानो यथा न पततीति १६ अतो गुणदोषनियमविधीनां प्रवृत्तिसं

समानकर्माचरणं पतितानां न पातकं औत्पत्तिको गुणः संगो न शयानः पतत्यधः १६ यतो यतो नि
वर्त्तेत विमुच्येत ततस्ततः एष धर्मो नृणां क्षेमः शोकमोहभयापहः १७ विषयेषु गुणाध्यासा
त्पुंसः संगस्ततो भवेत् संगात्तत्र भवेत्कामः कामादेव कलिर्नृणां १८ कलेर्दुर्विषहः क्रोधस्तमस्त
मनुवर्त्तते तमसा ग्रसते पुंसश्चेतना व्यापिनी द्रुतं १९ तया विरहितः साधो जंतुः शून्याय कल्पते
ततोऽस्य स्वार्थविभ्रंशो मूर्छितस्य मृतस्य च २०

कोच हरा निवृत्तावेव तात्पर्यमित्यभिप्रेत्याह यतो यत इति १७ यथाश्रुतप्रवृत्तिपरतां वेदस्य निराक
र्तुं प्रवृत्तिमार्गस्यानर्थहेतुतां दर्शयति विषयेष्विति चतुर्भिः प्रथमं विषयेषु गुणाध्यासात्ततस्तेषु संगः आस
क्तिः तत्र तेषु विषयेषु येन प्रतिहन्यते कामः तेन सह कामादेव कलिः कलहो विवादः १८ दुर्विषहस्तीव्रः तमस्त
मोहः तत्क्रोधं चेतना कार्याकार्यस्मृतिः द्रुतं शीघ्रं १९ शून्याय कल्पते असत्तुल्यो भवतीत्यर्थः स्वार्थविभ्रंशः पु
१०८

एवंतावद्द्रव्यशुद्धिरुक्ताइदानींकर्तृशुद्धिमाह स्नानेति अवस्था कौमारादिः वीर्यंशक्तिः संस्कारउपनयनादिः
कर्मसंध्योपासनदीत्यादिलक्षणं आत्मनःसाहंकारस्यकर्तुः एतैःस्नानादिभिर्यथायथंतत्कार्यानुसारेणशुद्धिः
अयंचशुद्धिर्नव्यवहाराद्यर्थो किंतुविहितकर्मार्थेत्याह शुद्धइति द्विजइत्युपलक्षणं शूद्रादिरपि १३ मंत्रशुद्धि
माह सद्गुरुमुखाद्यथावत्परिज्ञानंमंत्रस्यशुद्धिः कर्मशुद्धिमाह ईश्वरार्पणंकर्मणःशुद्धिः धर्माद्यर्थेशुद्धिप्रपं

स्नानदानतपोऽवस्थावीर्य्यसंस्कारकर्म्मभिः मत्स्मृत्याचात्मनःशौचंशुद्धःकर्म्माचरेद्द्वि
जः १३ मंत्रस्यचपरिज्ञानंकर्म्मशुद्धिर्मदर्प्पणम् धर्म्मःसंपद्यतेषड्भिरधर्म्मस्तुवि
पर्य्ययः १४ क्वचिद्गुणोऽपिदोषःस्याद्दोषोऽपिविधिनागुणः गुणदोषार्थनियमस्त
द्भिदामेवबाधते १५

चतःप्रदर्श्योपसंहरति धर्मइति देशकालद्रव्यकर्तृमंत्रकर्मभिःषड्भिःशुद्धैःधर्मःसंपद्यते एतेषांयोविपर्य्य
यःसोऽधर्मः तद्धेतुरित्यर्थः १४ अयंचगुणदोषविभागोनवास्तवइत्याह क्वचिदिति आपदिप्रतिग्रहोगु
णोऽप्यनापदिनिषिद्धत्वाद्दोषः परधर्मश्चपरस्यगुणोपिस्वस्यदोषः दोषोपिकुटुंबत्यागादिर्विरक्तादेर्नदो
षः अपितुविधिबलेनगुणः एवंयोऽयंगुणदोषयोरेकस्मिन्नेवार्थेनियमः गुणदोषार्थेवायोनियमःनियमःनियामकशास्त्रंसतयोर्भेदमेवबाधते १५

कथंतर्हिमीमांसकाः फलपरत्वंवदंतितत्राह एवमिति व्यवसितं वेदस्याभिप्रायं कुसुमितां अवांतरफलरोचनया रमणी
यांपरमफलश्रुतिंवदंति कुतस्तेकुबुद्धयस्तदाह हियस्माद्वेदज्ञाः व्यासादयस्तथावदंतीति २५ कुबुद्धित्वंप्रपंचयति कामि
नइत्यष्टभिः कामित्वात्कृपणाः ततोऽलुब्धाः तेनाकुलाः अतःपुष्पेष्ववांतरफलेषु परमफलबुद्धयः अतएवाग्निमुग्धाः
अग्निसाध्यकर्माभिनिवेशेनलुप्तविवेकाः ततश्चधूमतांता धूममार्गोऽतोयेषांते स्वंलोकमात्मतत्त्वं तथाचश्रुतिः कोह्यव
वाअस्माल्लोकात्प्रेत्य आत्मानंवेद अयमहमस्मीति कश्चित्स्वंलोकंनप्रतिजानाति अग्निमुग्धोहैवधूमतांतः २६ को

एवंव्यवसितंकेचिदविज्ञायकुबुद्धयः फलश्रुतिंकुसुमितांनवेदज्ञावदंतिहि २५ कामिनःकृपणालुब्धाःपु
ष्पेषुफलबुद्धयः अग्निमुग्धाधूमतांताः स्वंलोकंनविदंतिते २६ नतेमामंगजानंतिहृदिस्थंयइदंयतः
उक्थशस्त्राह्यसुतृपोयथानिहारचक्षुषः २७

सोऽस्वलोकः नमामंगेति हृदिस्थमात्मानंमांस्वंलोकं नतुहृदिस्थमहंकारास्पदम् नानंत्येवसत्यं परमात्मानंतंन
जानंतीत्याह यतइदं यद्व्यतिरिक्तंजगन्नास्तिकुतः यतइदंजगज्जातम् तंकुतोनजानंति हियस्मात् उक्थकर्मैकवश
स्त्रशंस्यंकथयंतीति पशुहिंसासाधनंवायेषांते अतःकेवलमसुतृपः प्राणतर्पणपराः निहारंतमः तेनवा
प्रानिचक्षूंषियेषांतेयथासंनिहितमपिनजानंति तद्वत् तथाचश्रुतिः नतंविदाथयइमाजजानाऽन्य
द्युष्माकमंतरंबभूव नीहारेणप्रावृताजल्प्याश्चासुतृपः उक्थशासश्चरंतीति २७ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ

यथाभैषज्ये औषधरोचने रुच्युत्पादनं ४

तत्तुल्यत्वं प्रपंचयति विषयेति व्यर्थं वृत्तजीविकयेव यो जीवन् यो वर्त्तेत स मृच्छित तत्तुल्यः अत एव यो भस्त्रेव श्वसन् वर्त्तते स मृ
ततुल्यः अतः स्वार्थनाश इत्यर्थः २१ ननु प्रवृत्तस्य स्वर्गादिफलश्रवणात् कुतः स्वार्थविभ्रंशस्तत्राह इयं फलश्रुतिः न श्रे
यः परमपुरुषार्थपरा न भवतीत्यर्थः किंतु तावद्बहिर्मुखानां नृणां मोक्षविवक्षया अवांतरफलैः कर्मसु रुच्युत्पादनमा
त्रं तथाहि पिब निंबं प्रदास्यामि खलु ते खंडलड्डुकान् पित्रैवमुक्तः पिबति न फलं तावदेव तत् २२ ननु कर्मिको दुं मोक्षस्य

विषयाभिनिवेषेण नात्मानं वेद नापरं वृक्षजीविकया जीवन् व्यर्थं भस्त्रेव यः श्वसन् २१ फलश्रुति
रियं नृणां न श्रेयो रोचनं परं श्रेयोविवक्षया प्रोक्तं यथा भैषज्यरोचनं २२ उत्पत्त्यैव हि कामेषु प्राणे
षु स्वजनेषु च आसक्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु २३ नतानविदुषः स्वार्थं भ्राम्यतो वृ
जिनाध्वनि कथं युञ्ज्यात्पुनस्तेषु तांस्तमो विशतोऽबुधः २४ ॥ ऽऽ ॥ ऽऽ ॥

नामापि न श्रूयते कुत एवं व्याख्यायते यथाश्रुतस्याघटनादित्याह उत्पत्त्येति द्वाभ्यां उत्पत्त्या स्वभावत एव कामेषु पुष्पा
दिषु प्राणेषु आयुरिंद्रियवीर्यादिषु स्वजनेषु पुत्रादिषु अनर्थहेतुषु परिपाकतो दुःखहेतुषु २३ अतस्तान् स्वार्थे प
रमसुखमविदुषः अतो नतान् नम्रीभूतान् वेदो यद्बोधयिष्यति तदेव श्रेय इति विश्वसितानित्यर्थः तानेवंभूतान् वृजि
नाध्वनि कामवर्त्मनि देवादियोनिषु भ्राम्यतः ततः पुनस्तमः वृक्षादियोनिं विशतः पशुकाम इति आयुरिंद्रियादि ५८
काम इति पुत्रकाम इति च कथं पुनस्तेष्वेव कामेषु स्वयं बुधो वेदो युंज्यात् प्रवर्त्तयेत् तथा सत्यताप्रः स्यादिति भावः

भा० ए० हृदिसंकल्पयेत्युक्तंतमेवसंकल्पंदर्शयति उद्दिष्टेति तस्यभोगस्यांतेमहाशालामहाकुलस्थाः ३१ ततःकिमित्यतआह ए
११० वमिति अतोमन्त्रवर्णत्वाभावान्नित्यसंसारिणोभवंतीतिभावः ३२ तदेवंवेदानांप्रवृत्तिपरत्वंनिरस्य प्रकृतंनिवृ
त्तिपरत्वमेवोपसंहरति वेदाइति कर्मब्रह्मदेवताकांडविषयाइमेवेदाः ब्रह्मात्मविषया ब्रह्मैवात्मानसंसारीत्येतत्प

उद्दिष्टदेवतायज्ञैर्गत्वारंस्यामहेदिवि तस्यांतइहभूयास्ममहाशालामहा
कुलाः ३१ एवंपुष्पितयावाचाव्याक्षिप्तमनसांनृणाम् मानिनांचातिस्तब्धा
नांमद्वार्तापिनरोचते ३२ वेदाब्रह्मात्मविषयास्त्रिकांडविषयाइमे परोक्ष
वादाऋषयःपरोक्षंममचप्रियम् ३३

रः तत्परत्वाप्रतीतेश्चफलश्रुतिरियंनृणांनश्रेयोरोचनंपरं श्रेयोविवक्षयाप्रोक्तायथाभैषज्यरोचनमि
त्युक्तमेवकारणमनुस्मारयति परोक्षेति परोक्षवादाः अतींद्रियार्थप्रतिपादनपराः ऋषयोमंत्राःतद्द्र
ष्टारोवा ततःकिमिति यतःपरोक्षमेवममचप्रियं अयंभावः शुद्धांतःकरणैरेवतद्बोधव्यंनान्यैरधिकारिभिः
वृथाकर्मत्यागेन भ्रंशप्रसंगादिति ३३

विदत्तात्यथोक्तज्ञानाच्छाद्यात्मानयजंतीत्याह तेपरोक्षमस्फुटंमेमतमविज्ञायस्वादीनयजंत इत्युत्तरेणान्वयः स्वमतमेवाह हिं
सायांमांसभक्षणार्थं तत्फलार्थं च यदि रागः स्यात्तर्हि यज्ञ एवेत्यभ्यनुज्ञातः द्वारा परिसंख्येयं न त्वोक्षपक्षत्वेन चोदनेत्ये
वरूपं यद्यपि नित्यनैमित्तिकयोः कामविशेषानुबंधो नास्ति तथापि कर्मणा पितृलोक इति श्रुतेः सामान्यतः पितृलोककाम
नास्त्येव अंतःकरणशुद्धिकामना वेतिभावः तदुक्तं नाकामस्य क्रिया काचिद्दृश्यते चेह कर्हिचित् यद्यद्धि कुरुते जंतुस्
तत्तत्कामस्य चेष्टितमिति अज्ञत्वादेव हिंसायां विहारः क्रीडा येषां ते २८ किंच तेऽगतिमंदं सुहृद इत्याह प्रेत्या

तेमेमतमविज्ञायपरोक्षंविषयात्मकाः हिंसायांयदिरागःस्याद्यज्ञ एव न चोदना हिंसाविहारा
ह्यालब्धैः पशुभिः स्वसुखेच्छया यजंते देवतायज्ञैः पितृभूतपतीन्खलाः २८ स्वप्नोपममऽमुंलोक
मसंतंश्रवणप्रियं आशिषो हृदि संकल्प्य त्यजंत्यर्थान्यथावणिक् २९ रजःसत्वतमोनिष्ठार
जःसत्वतमोजुषः उपासत इंद्रमुख्यान्देवादीन्नयथैवमां ३०

पममिति अमुंपरलोकं आशिषश्चास्मिंल्लोके संकल्प्य न तु निश्चित्य विघ्नबाहुल्यात्तत्यजंति कर्मसु विनियोजयंति
यथा कश्चिद्वणिक् दुस्तरसमुद्रादिलंघनेन बहुधानार्जनेच्छया सिद्धं धनं त्यजन् उभयभ्रष्टो भवति तद्वदित्य
र्थः २९ अतो रजःसत्वतमोनिष्ठास्ते रजःसत्वतमोजुषः स्वानुरूपानिंद्रादीनेवोपासते न तु मां यद्यपींद्रादीनामपि
मदंशत्वान्मदुपासनमेव तत् तथापि यथावन्नोपासनं भेददर्शित्वादित्यर्थः ३० ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ

भा० ए०
१११

अविकृतस्यापि नियंतृत्वं घटयति अनंतशक्तिनेति भूतेषु सर्वप्राणिषु घोषरूपेण नादरूपेण लक्ष्यते मनी
षिभिः अंतःसूक्ष्मत्वेन दर्शने दृष्टांतः बिसेषूर्णातंतुरिति ३७ ततो वैखर्याख्याया वाच उत्पत्तिप्रकारं सदृष्टां
तमाह यथेति त्रिभिः हृदयात्सकाशात् मुखद्वारात् उद्वमते बहिः प्रकटयति दार्ष्टांतिके दर्शयति आकाशादिति
आकाशस्तदुपाधिर्हिरण्यगर्भरूपः प्रभुर्भगवान् तेन रूपेण छंदोमयो वेदमूर्तिः स्वतस्त्वमृतमयः घोषवान्
नादोपादानवान् मनसा निमित्तभूतेन निमित्तमात्रेण दर्शयति स्पर्शादिवर्णानुरूपयति संकल्पयतीति स्पर्श

यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा छंदो
मयोऽमृतमयः सहस्रपदवीं प्रभुः ॐकाराद्व्यंजितस्पर्शस्वरोष्मांतःस्थभूषितां विचित्रभाषा
विततां छंदोभिश्चतुरुत्तरैः अनंतपारां बृहतीं सृजत्याक्षिपते स्वयम् ३८

रूपिणेन स्पर्शग्रहणमुपलक्षणं हृदयाकाशाद्बृहतीं सृजतीति तृतीयश्लोकेनान्वयः बृहतीशब्दार्थो व्याख्याना
यविशेषणानि सहस्रपदवीं बहुमार्गां तदेवाह ॐकारात् उरःकंठादिसंयोगेन व्यंजितैः स्पर्शादिभिर्भूषितां ॐ
कारश्चात्र हृदंतःसूक्ष्माभिव्यक्तः न त्वकारादिवर्णरूपः तस्य व्यंजकादित्वात् तत्र स्पर्शाः कादिपंचवर्गाः स्वराः
अकारादयः षोडश ऊष्माणः शषसहाः अंतःस्थाः यरलवाः विचित्राभिर्वैदिकलौकिकभाषाभिर्विततां यथोत्तरं
चत्वारि चत्वार्यक्षराण्युत्तराणि अधिकानि येषां तैश्छंदोभिरुपलक्षितां एवमनंतपारां सृजति स्वयमेवाक्षिपते

ननुवेदस्तावत्ऋषिजैमिन्यादयः किमितितथानवर्णयंति मांविनातत्वतोवेदंतस्तदर्थंचनकोपिवेदेत्याशयेना
ह शब्दब्रह्मेति यावत्समाप्तिस्वरूपतोऽर्थतश्चदुर्विज्ञेयं तच्च सूक्ष्मं स्थूलंचेतिद्विविधं तत्रसूक्ष्मंतावत्स्वरूप
तोपिदुर्विज्ञेयमित्याह प्राणेंद्रियमनोमयं प्रथमंप्राणमयंपरा॰ ततोमनोमयंपश्यंत्याख्यं ततइंद्रियमयंम
ध्यमाख्यं तस्यवाग्व्यंजकत्वेनवागिंद्रियप्रधानत्वात् किंच अनंतपारं समष्टिप्राणादिमयस्यानिर्विशेषस्य
च तस्यकालतोदेशतश्चापरिछेदात् अर्थतोपिदुर्विज्ञेयत्वमाह गंभीरं गहनार्थं अतोदुर्विगाह्यमत्तिप्र
वेशानर्हं तथाचश्रुतिः चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः गुहात्रीणिनिहितानेंगयं

शब्दब्रह्मसुदुर्वोधंप्राणेंद्रियमनोमयं अनंतपारंगंभीरंदुर्विगाह्यंसमुद्रवत् मयोपबृंहि
तंभूम्नाब्रह्मणानंतशक्तिना भूतेषुघोषरूपेणविसेषूर्णेवलक्ष्यते ३४

ति तुरीयोवाचोमनुष्यावदंतीति अयमर्थः वाचःशब्दब्रह्मणः परिमितानिगणितानि पद्यतेज्ञायतेपरंत
त्वमेभिरितिपदानिरूपाणिचत्वारि तानिचत्वार्यपियेमनीषिणोऽंतर्दृष्टयस्तेविदुर्नान्ये यतोगुहायांदेहमध्ये
त्रीणिनिहितानिनेंगयंति स्वरूपेनप्रकाशयंति यतःकेवलंवाचःतुरीयं चतुर्थभागंवैखरीरूपंमनुष्याःप्राणि
नोवदंति तमपिवदंत्येव नतुतत्वतोजानंति तत्रमनीषिभिरेवज्ञेयं सूक्ष्मरूपंदर्शयति मयेति मयाऽंतर्यामि

मयोपबृंहितं अधिष्ठितं अंतःस्थत्वेप्यपरिछेदमाह
भूम्नेति अधिष्ठातृत्वेप्यविकारित्वमाह ब्रह्मणेति

भा० ए० इति श्रीएकादशे एकविंशः ॥२१॥ द्वाविंशे तत्त्वसंख्यानमविरोधविधोच्यते पुंप्रकृत्योर्विवेकश्च जन्ममृत्यु

११२ विधादिच तदेवं वेदानां प्रवृत्तिपरत्वं भिराकृत्य मोक्षपरत्वेन निर्णीतं संति च मोक्षपरत्वेपि तत्त्वांतरवि

वादाः तथाहि केचित्तत्त्वसंख्यासु विवदंते तत्रापि च वाच्यार्थसदसत्त्वे आत्मनत्वे एकत्वनानात्वादिषु त

त्र किं सत्यमिति जिज्ञासया पृच्छति कतीति ऋषिभिरागमेषु बहुधा संख्यातानि तेषु कति युक्तानीत्यर्थः

१ भगवन्मतानुवादपूर्वकं बहुधा संख्यानप्रपंचयति नवेति त्रिभिः त्वं तावदष्टाविंशति तत्त्वान्यात्थ ता

उद्धव उवाच ॥ कति तत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो १ नवैकादश पंच त्रीण्यात्थ त्वमि

ह सुश्रुम केचित् षड्विंशतिं प्राहुरपरे पंचविंशतिं सप्तैके नव षट् केचिच्चत्वार्येकादशापरे

केचित्सप्तदश प्राहुः षोडशैके त्रयोदशः २ एतावत्त्वं हि संख्यानामृषयो यद्विवक्षया गायं

ति पृथगायुष्मन्निदं नो वक्तुमर्हसि ॥ श्रीभगवानुवाच ॥ युक्तं च संति सर्वत्र भाषंते ब्राह्मणा

यथा मायां मदीयामुद्गृह्य वदतां किंनु दुर्घटं ४

नि च वयं सुश्रुम श्रुतवंतः २ एतावती नो भाव एतावत्त्वं ज्ञातमित्यर्थः यद्विपक्षयात्प्रयोजनमभिप्रे

त्य च गायंति आयुष्मन् नित्यमूर्ते ३ विवक्षाभेदेन सर्वं युक्तमेवमायया च किंनाम न युक्तमित्याह युक्तमिति

ति यथा ब्राह्मणा भाषंते तेषु क्तं न वस्तुतः २ यस्मात् संति सर्वत्रांतर्भूतानि सर्वाणि तत्त्वानि किंच मायामिति

श्रीः ११२

वि १

तेषु कति छंदांसि दर्शयति गायत्रीति तत्र चतुर्विंशत्यक्षरा गायत्री ततश्चतुरक्षरोत्तरा उष्णिगादिछंदांसि अत्यष्टिः
अतिजगती अतिविराट् चेत्यर्थः एतैश्छंदोभिरुपलक्षितामिति सर्वैरप्येवान्वयः ३६ अतो हृत्येव साकल्येन स्वत
यतो दुर्ज्ञेयेत्युक्तं अर्थतोऽपि दुर्ज्ञेयत्वमाह किमिति कर्मकांडे विधिवाक्यैः देवताकांडे मंत्रवाक्यैः किमाचष्टे प्रका
शयति ज्ञानकांडे च किमनूद्य विकल्पयेत् निषेधार्थमित्येवमस्या हृदयं तात्पर्यं मत्त मत्तोऽन्यः कश्चिदपि न वेद ३७ न
नु तर्हि त्वं मत्कृपया कथं ओमिति कथयति मामेव यज्ञरूपं विधत्ते मामेव तत्तद्देवतारूपमभिधत्ते न मन्त्रः पृथक् यज्ञा

ध २ गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च त्रिष्टुब्जगत्यतिछंदो ह्यत्यष्ट्यतिजगद्विराट् ३६ किं विध
त्ते किमाचष्टे किमनूद्य विकल्पयेत् इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ३७ मां विधत्तेऽभि
धत्ते मां विकल्प्यापोह्यते ह्यहं ३८ एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदां मायामात्रमनूद्यांते
प्रतिषिध्य प्रसीदति ३९

काशादिप्रपंचजातं तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादि
नातु विकल्प्यापोह्यते तदप्यहमेव न मत्तः पृथगस्ति ३८ कुत इत्यपेक्षायां सर्ववेदार्थं संक्षेपतः कथयति एतावानेव स
र्वेषां वेदानामर्थः तमेवाह शब्दो वेदः मां परमार्थरूपं आश्रित्य भिदां मायामात्रमित्यनूद्य नेह नास्ति किंचनेति प्रति
षिध्य प्रसीदति निवृत्तव्यापारो भवति अयं भावः यथा ह्यंकुरे योऽस्ति स एव तद्विस्तारभूत नानाकांडशाखास्वपि तथै
व प्रणवस्य योऽर्थः परमेश्वरः स एव तद्विस्तारभूतानां सर्ववेदकांडशाखानामपि संगच्छते नान्य इति नित्यमुक्तः स्वत-

भा॰ए॰ अविरोधमुपसंहरति अतोऽमीषांतत्वानांपौर्वापर्य्यंतत्कारणकार्य्यत्वंप्रसंख्यानंचन्यूनाधिकमभीप्सु
११३ तावादिनामुद्धेययथाययाविवक्षयापृथक्त्वेपस्यमुखंप्रवर्त्तते तत्सर्वविविक्तंनिश्चयंवयंगृह्णीमः उक्तंन्याय
नसर्वत्रयुक्तेः संभवात् ९ ननुकार्य्यकारणत्वेनापृथक्त्वापृथक्त्वाविवक्षयाभवतुनामसंख्याभेदः जी
वेश्वरयोस्तुकथंभेदाभेदविवक्षा यथाषड्विंशतिपंचविंशतिपक्षौप्रवृत्तौ अतआह अनादीति स्वतोनसंभव

पौर्वापर्य्यमतोमीषांप्रसंख्यानमभीप्सतां यथाविविक्तंयद्वक्त्रंगृह्णीमोयुक्तिसंभवात् ९
अनाद्यविद्यायुक्तस्यपुरुषस्यात्मवेदनं स्वतोनसंभवादन्यत्तत्त्वज्ञोज्ञानदोभवेत् १०
पुरुषेश्वरयोरत्रनवैलक्षण्यमण्वपि तदन्यकल्पनापार्थाज्ञानंचप्रकृतेर्गुणः ११ ॥

ति अन्यतस्तुसंभवात् स्वतःसर्वज्ञः परमेश्वरोऽन्योभवेत् इतिषड्विंशतिपक्षाभिप्रायइत्यर्थः १० कथंत
र्हिपंचविंशतिपक्षस्तत्राह पुरुषेतिवैलक्षण्यंविसदृशत्वंनास्तिद्वयोरपिचिद्रूपत्वात् अतस्तयोरत्यंतमन्यत्व
कल्पनाअपार्थाव्यर्था एवंपंचविंशतिपक्षप्रवृत्तिरित्यर्थः नन्वेवमपीश्वरप्रसादलभ्यज्ञानस्यपृथक्त्वात
पक्षद्वयमपिनघटेतअतआह ज्ञानंचेति सत्वगुणवृत्तित्वात्तदंतरभूतमित्यर्थः ११ ॥ ऽऽ ॥ ऽऽ ॥

ननुयदिद्वयदिसर्वमपियुक्तंकुतोविवादः यद्विचमायैवालंबनं कुतोहेतुंप्रतिविवादः तत्राहनैतदिति हेतुंप्रतिचवि
वदमानोमदीयादुरतिक्रमाःशक्तयः सत्वाद्योअंतःकरणवृत्तिविशेषरूपेणपरिणताएवहेतुरित्यर्थः ५ तासांवि
विवादहेतुत्वमुपपादयति यासामिति यासांव्यतिकरात् क्षोभाद्वदतांपदंविषयःविकल्पोभेदआसीत् अंतःकरणवृ
त्तिविकल्पोवातन्मूलभूतः एतदेवव्यतिरेकेणद्रढयति शमदमयोर्द्वैक्यं तस्मिन्प्राप्तेविकल्पोप्येति लीयते तं

नैतदेवंयथात्थत्वंयदहंवच्मितत्तथा एवंविवदतांहेतुंशक्तयोमेदुरत्ययाः ५ यासांव्यति
करादासीद्विकल्पोवदतांपदं प्राप्तेशमदमेप्येतिवादस्तमनुशाम्यति ६ परस्परानुप्रवे
शात्तत्वानांपुरुषर्षभ पौर्वापर्यप्रसंख्यानंयथावक्तुर्विवक्षितं ७ एकस्मिन्नपिदृश्यंते
प्रविष्टानीतराणिच पूर्वस्मिन्वापरस्मिन्वातत्वेतत्वानिसर्वशः ८

चविकल्पमनुवादःशाम्यतीति ६ संतिसर्वत्रेतियदुक्तंतत्प्रपंचयति परस्परेतिद्वाभ्यां अन्योन्यस्मिन्ननुप्रवेशा
त्वक्तुर्यथाविवक्षितंतथापूर्वंकारणं अपरंकार्यं कार्यकारणभावेनप्रसंख्यानंभवति यद्वा पूर्वा अल्पसंख्या अ
पराअधिकसंख्यातयोर्भावः पौर्वापर्यंतेनप्रसंख्यानंगणनमिति ७ अनुप्रवेशंदर्शयति एकस्मिन्नपीति पूर्व
स्मिन्कारणभूतेतत्वेकार्यतत्वानिसूक्ष्मरूपेणप्रविष्टानिमृदिघटवत् अपरस्मिन्कार्येसत्वेकारणतत्वान्यनु

^गतत्वेनप्रविष्टानिघटेमृद्वत् ८^

भा० ए० ११४

एकादश दर्शयति श्रोत्रमिति दर्शनं चक्षुः ज्ञानशक्तयो ज्ञानेंद्रियाणि पंच वागादि पाय्वंतानि द्वंद्वैकयेन कानि चत्वारि अंघ्रिश्चेति कर्माणि कर्मेंद्रियाणि पंच उभयं उभयात्मकं मनः अंग हे उद्धव एवमेकादश तत्त्वानि १५ पंच तत्त्वानि दर्शयति शब्द इति शब्दादीनि विषयतया परिणतानि पंच महाभूतानि तन्नु गत्यादिभिः तत्त्वाधिकापत्तावपि स्यान्नेत्याह गतीति गतिरुक्तिरुत्सर्गो च शिल्पं च तानि कर्मायतनानां कर्मे-

श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः वाक्पाण्युपस्थपाय्वंघ्रिः कर्माण्यंग उभयोमनः १५
शब्दः स्पर्शो रसो गंधो रूपं चेत्यर्थजातयः गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः १६
सर्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते १७ ॥

टी० १ न्द्रियाणां सिद्धयः फलानि न तत्त्वांतराणीत्यर्थः १६ तदेवं मतत्रये तत्त्वसंख्याभेदं निरूप्य यद्विवद्यायागायंतीति यत्तु उक्तं तन्मतत्रयं दर्शयति सर्गादाविति कार्याणि षोडश विकाराः कारणानि महदादीनि सप्त तद्रूपिणी सती प्रकृतिरस्य विश्वस्य सर्गादौ गुणैः सत्त्वादिभिः व्यवस्थां धत्ते उपादानकारणरूपत्वात् पुरुषस्त्वव्यक्तः अपरिणामी निमित्तभूतः केवलमीक्षते अतः परिणामिन्याः प्रकृतेः पुरुषो भिन्न इति १७ राम राम राम राम राम

ननु ज्ञानं जीवधर्मः कथं प्रकृतेर्गुणाः स्यात् तत्राह प्रकृतिरिति गुणसाम्यं हि प्रकृतिः अतस्तद्विषमरूपा गुणास्तस्या
एव नत्वात्मनो जीवस्य अकर्तृत्वात्तस्य स्थित्यादिहेतुभूतगुणाश्रयत्वानुपपत्तेः १२ अतः सत्त्वं सत्त्वमयं ज्ञानं प्रकृतेर्गु
ण इति सर्वैरेवान्वयः ननु तत्त्रिवर्त्यं कर्म चाज्ञानं च तत्त्वान्तरं स्यात् न रजःकर्म रजसो वृत्तिः अज्ञानं च तमसः अ
तः कर्माज्ञानयोरजस्तमोद्वारा प्रकृतावेवान्तर्भाव इति भावः तथापि कालस्वभावयोस्तत्त्वान्तरता स्यात् न गुणानां व्यति

प्रकृतिर्गुणसाम्यं वै प्रकृतेर्नात्मनो गुणाः सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः १२ सत्त्वं ज्ञा
नं रजः कर्म तमोऽज्ञानमिहोच्यते गुणव्यतिकरः कालः स्वभावः सूत्रमेव च १३ पुरुषः प्रकृति
र्व्यक्तमहंकारो नभोऽनिलः ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव १४ ॥

करो यस्मात्स ईश्वर एव कालो नाम स्वभावो नाम सूत्रं महत्तत्त्वमेव तस्य सर्वशक्तिमत्त्वात् तदेवं ज्ञानादीनां यथा
यथमन्तर्भावात् न पक्षद्वयेऽपि तत्त्ववृद्धिः एतच्च पक्षान्तरेष्वपि ज्ञेयं स्वमते तु गुणानां मागमापायित्वात् प्र
कृतेर्भेदो विवक्षितः अतो गुणास्त्रीणि तत्त्वानि अपराणि पंचविंशति तत्त्वानि १३ पूर्वोक्तपक्षद्वयानि साधारणा
नि दर्शयति पुरुष इति सार्द्धद्वाभ्यां व्यक्तं महत्तत्त्वं नभआदितन्मात्राणि मे तया १४ ॥ रामरामराम ॥

भा० ए० आत्मैवसंकल्पयन्मनउच्यते त्रयोदशपक्षेभूतानितन्मात्रैरेकीकृतानिपंचैव इंद्रियाणिच तत्रतत्र काशकानि
११५ पंचैव मनश्चैकमिंद्रियाधिष्ठातृ आत्माचद्विविधः एवंत्रयोदशः एकादशपक्षेजीवमनसोरात्मांतर्भा
विनैतान्येवैकादशः नवपक्षे अष्टप्रकृतयः पुरुषश्च विकाराणामंतर्भावः २२ उपसंहरति इतीति इत्य

तद्वत्षोडशसंख्याने आत्मैव मनउच्यते भूतेंद्रियाणिपंचैव मन आत्मात्रयोदशः एकादशत्व
न२ मात्मासौमहाभूतेंद्रियाणिच अष्टप्रकृतयश्चैव पुरुषश्चनवेत्यथ २३ इतिनानाप्रसंख्यानं
तत्वानामृषिभिःकृतं सर्वंन्याय्यंयुक्तिमत्वाद्विदुषांकिमशोभनं ॥ २४ ॥ उद्धव उवाच ॥ प्रकृतिः
पुरुषश्चोभौयद्यप्यात्मविलक्षणौ अन्योन्यापाश्रयात्कृष्ण दृश्यतेनभिदातयोः २५ प्रकृ
तौलक्ष्यतेह्यात्माप्रकृतिश्चतथात्मनि २६ एवंमेपुंडरीकाक्षमहांतंसंशयंहृदि छेत्तुमर्ह
सिसर्वज्ञवचोभिर्नयनैपुणैः २७

भिःप्रकारैःप्रकृतिपुरुषभेदस्थापनीयेत्यर्थः २४ तत्रपृच्छति प्रकृतिरिति आत्मनाजडाजडस्वभावेनविलक्ष
णौ अन्योन्यापाश्रयात् परस्परपरिहारेणाप्रतीतेरित्यर्थः २५ तदेवव्यनक्ति प्रकृताविति कार्येदेहे प्रकृतिश्चा
त्मनि तेनविनातस्याअप्रतीतेः अहमित्यभेदप्रतीतेर्नदेहात्मनोर्भेदोलक्ष्यतइत्यर्थः २६ हृदिवर्तमानंसंश
यंनयेयुक्तौनैपुण्यं प्राविण्यंयेषांतैः २७

तत्त्वैरारब्धकार्य्यस्य तदंतर्भावमभिप्रेत्याह व्यक्तादयं महदादयः प्रकृतेरुत्पन्ना ये धातवस्ते विकुर्वाणाः पुरुषेक्षणा
ल्लब्धवीर्य्याः संहताः संतः अंडं कार्यं सृजंतीत्यन्वयः प्रकृतेर्बलात्तामाश्रित्येत्यर्थः १८ एवं स्वमतमुपसंहृत्य मतांतरे
ष्वपि सामान्यतो निरूपितां घटानां विशेषतः स्वतात्पर्यं दर्शयति सप्तैवेति ज्ञानं जानातीति द्रष्टा जीवः उभयोर्द्रष्टृ
दृश्ययोराधार आत्मा चेति सप्त तत्र प्रकृत्यादीनां कारणत्वेन खादिष्वंतर्भावः उत्तरेषामंतर्भावार्थमाह ततस्तेभ्यः

व्यक्तादयो विकुर्वाणा धातवः पुरुषेक्षया लब्धवीर्य्याः सृजंत्यंडं संहताः प्रकृतेर्बलात् १८ ६२
सप्तैव धातव इति तत्रार्थाः पंच खादयः ज्ञानमात्मोभयाधारस्ततो देहेंद्रियासवः १९ षडित्य
त्रापि भूतानि पंच षष्ठः परः पुमान् तैर्युक्त आत्मसंभूतैः सृष्ट्वेदं समुपाविशत् २० चत्वा
र्य्येवेति तत्रापि तेज आपोऽन्नमात्मनः जातानि तैरिदं जातं जन्मावयविनः खलु २१ संख्याने
सप्तदशके भूतमात्रेंद्रियाणि च पंच पंचैकमनसा आत्मा सप्तदशः स्मृतः ॥२२॥ ३३

सप्तभ्यः देहेंद्रियासवः कार्य्याणि जायंते १९ षडिति मतेऽपि भौतिकस्य भूतांतर्भावं जीवस्य च परमा
तर्भावमाह तैर्युक्त इति २० अन्नं पृथ्वी आत्मनो जातानि आत्मना सह चत्वारि तत्त्वानि अंतर्भावार्थमाह
तैरिति अवयविनः कार्य्यस्य २१ भूतानि च मात्राणि चेंद्रियाणि पंच पंच एकेन मनसा सह आत्मा सप्तद

भा० ए० तानिरूपाणिदर्शयति दृकू अध्यात्मं रूपमधिभूतं अत्ररंध्रे चक्षुर्गोलके प्रविष्टमार्कवपुः अंशोधिदैवमिति
११६ सापेक्षप्रकाशतामाह परस्परमिति चक्षुषारूपं ज्ञायते तदन्यथाऽनुपपत्त्याचेद्दुः तत्र च त्वं यथाऽनुपपत्त्यात
दधिष्ठात्रीदेवता ततश्चक्षुषः प्रवृत्तिस्ततो रूपज्ञानमित्येवमेतत्त्रयं परस्परं सिद्ध्यति अत्ररंध्रइति विशेषणव्या
वृत्त्यमाह दृष्टांताप्रयोगितया यस्तु खे आकाशेऽर्कोवर्त्तते मंडलात्मा स तु स्वतःसिद्ध्यति दृक्चक्षुर्विषयत्वेपि प्रति
योग्यपेक्षाभावमात्रेण स्वतइत्युक्तं इदानीमात्मनो विकारित्वाद्यभावेन भेदमाह यत्तु यस्मादात्मा एषामध्या
त्मादीनामाद्यः कारणं अतएकरूपोभिन्नश्च तस्मादेतेभ्यः परोभिन्नः स्वप्रकाशत्वादपीत्याह स्वयानुभूत्या

दृग्रूपमार्कं वपुरत्र रंध्रे परस्परं सिद्ध्यति यः स्वतः खे आत्मा यदेषामपरोयमाद्यः स्वयानुभूत्या
ऽखिलसिद्धसिद्धिः ३१ एवं त्वगादिश्रवणादिचक्षुर्जिह्वादिनासादिचचित्तयुक्तम् ३२

स्वतःसिद्धप्रकाशेनाखिलानां सिद्धानां परस्परं प्रकाशकानामपि प्रकाशकः सर्वेषामपि सामान्यतश्चित्प्रकाशविषयत्वा
त् अतएव तस्य स्वप्रकाशत्वसिद्धिः ३१ चक्षुषि दर्शितं तत्त्रैविध्यमिंद्रियांतरेष्वतिदिशति एवमिति यथा चक्षुः एवं त्व
गाद्यपीत्यर्थः त्वक् स्पर्शो वायुरिति श्रवणं शब्दो दिश इति जिह्वा रसो वरुण इति नासा गंधो ऽश्विनाविति चित्तयु
क्तमंतःकरणंतरमिति तत्र चित्तं चेतयितव्यं वासुदेव इति मनो मंतव्यं चंद्र इति बुद्धिर्बोद्धव्यं ब्रह्मेति अहंकारो
ऽहंकर्त्तव्यं रुद्र इति एवं त्रिविधमित्यर्थः ३२ ॥ ऽऽ छ ॥ छ ऽऽ रामराम राम रामराम ॥ ऽऽ ॥ ११६

र्हसीत्युक्तं तत्र हेतुमाह हियस्मात् त्वत्प्रसादेव अत्र ज्ञाने प्रमोषः भ्रंशश्च ते शक्तितः मायातः ननु च स्वप्रका-
शस्यात्मनः कथं ज्ञानप्रमोषः ज्ञानदाने तत्प्रमोषे वा मम किं प्रयोजनं तत्राह त्वमेवेति २८ विकाराविकाराभ्यां नाना-
त्वैकत्वाभ्यां सापेक्षनिरपेक्षाभ्यां प्रकाशाप्रकाशाभ्यां चात्यंतभेदं वक्तुमाह प्रकृतिः पुरुषश्चेति विकल्पोऽत्यंतभेद
एव कुतइत्यपेक्षायां प्रकृतिशब्दोक्तदेहादिसंघातस्य विकारित्वं तावद्दर्शयति एषइतिद्वाभ्यां एष सर्गः सृज्य-

त्वत्तोज्ञानं हि जीवानां प्रमोषस्तेत्र शक्तितः त्वमेव ह्यात्ममायाया गतिं वेत्थ
न चापरः ॥२८॥ श्रीभगवानुवाच ॥ प्रकृतिः पुरुषश्चेति विकल्पः पुरुषर्षभ ॥
एष वैकारिकः सर्गो गुणव्यतिकरात्मकः २९ ममांग माया गुणमय्यनेकधा वि-
कल्पबुद्धीश्च गुणैर्विधत्ते वैकारिकस्त्रिविधोध्यात्ममेकस्तथाधिभूतमधिदैवमन्यत् ३०

तइति सर्गो देहादिसंघातः वैकारिकः विकारवान् अत्र हेतुः गुणव्यतिकरात्मकः गुणक्षोभकृतः २९ ना-
नात्वमाह ममेति विकल्पम् भेदम् तद्बुद्धीश्च अनेकधात्वं प्रपंचयति वैकारिकः अनेकविकारवानपि स्थू-
लेन मार्गेण तावत्त्रिविधः त्रैविध्यमेवाह अध्यात्ममिति एकं रूपम् ३० ऽऽ॥ ऽऽ॥ ऽऽ ॥ ऽऽ॥

भा॰ ए॰ तत्रएवेति त्वत्तइति व्यापकस्यात्मनोदेहांतरगमनं अकर्त्तुःकर्मणोनित्यस्यचजन्ममरणादीनिकथमिति
११७ भावः ~~(एवेति त्वत्तइति व्यापकस्यात्मनो)~~ एतद्विद्वांसोनसंति हियस्मान्माययावंचितामोहिताः ३५ लिंगश
रीराध्यासेनसर्वंघटतइत्युत्तरमाहमनइति प्रधानत्वेनपंचभिरितिनिर्देशोऽन्येषामुपलक्षणार्थः देहाद्दे
हांतरंप्रतियाति ततोऽन्यएवात्मातन्मनोनुवर्त्तते ३६ ननुमनसोपिएवंदेहवियोगोदेहांतरयोगश्चके

उद्धवउवाच॥ त्वत्तःपरावृत्तधियःस्वकृतैःकर्मभिःप्रभो उच्चावचान्यथादेहान्गृह्णं
तिविसृजंतिच तन्ममाख्याहिगोविंददुर्विभाव्यमनात्मभिः नह्येतत्प्रायशोलोकेविद्वांसःसं
तिवंचिताः॥३६॥श्रीभगवानुवाच॥मनःकर्ममयंनृणामिंद्रियैःपंचभिर्युतम् लोकाल्लोकंप्र
यात्यन्यआत्मातदनुवर्त्तते ३६ ध्यायन्मनोनुविषयान्दृष्टान्वानुश्रुतानथ उद्यत्सीदत्क
र्मतंत्रंस्मृतिस्तदनुशाम्यति ३७

र्मभवतीतिचेत् स्मृतिवियोगयोगाभ्यामितिवक्तुंतयोःकारणमाह ध्यायदिति कर्मतंत्रत्वात् कर्मोप
स्थापितान् दृष्टान्वानुश्रुतान्वेदोक्तान्वा अनुध्यायन् अथानंतरंध्यायमानेषु उद्यत् आविर्भवत्
एवंविषयेषुचसीदत् लीयमानंभवति तदनंतरंतस्यस्मृतिःपूर्वापरानुसंधानंपश्यति ३७ ॥ ६६ ॥ ११७

ननुचपुनरपिवैलक्षण्यमामेवोक्तं त्रिविधप्रपंचव्यतिरेकात्मप्राप्तिस्तु कुतः स्यात् अहंकारनिवृत्त्यातत्क्ष
त्रिविधविकल्पनिवृत्त्यैवेत्याशयेनाह योऽसौ अहमहंकारः तमेवाह गुणक्षोभकरोतीति तथा ततः परमे
श्वरात्कालाद्वा निमित्तात् प्रधानं मूलमुपादानं यस्य तस्मान्महतः प्रसूतो विकारः स त्रिवृत् त्रिविधः मोहमस्य
विकल्पहेतुः त्रिवृत्तमेवाह वैकारिक इति ३३ स कुतो निवर्त्तेते आत्माज्ञानविलसितत्वात् तज्ज्ञानेनेत्याश

योऽसौ गुणक्षोभकृतो विकारः प्रधानमूलान्महतः प्रसूतिः अहं त्रिवृन्मोहविकल्पहेतुः
वैकारिकस्तामसऐंद्रियश्च ३३ आत्मापरिज्ञानमयो विवादो ह्यस्तीति नास्तीति विवादनिष्ठः
व्यर्थोपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात् ३४

येनाह आत्मापरिज्ञानमय इति ननु कथं मोहमयत्वं विकल्पस्याहंकारस्य वा केषांचित्तन्मयत्वांगीकारात्तत्राह
विवाद इति अयं भिदार्थनिष्ठो विवादोप्यात्मापरिज्ञानमय इत्यन्वयः यद्वा विवादः सर्वो भिदार्थनिष्ठ एव ननु
वस्तुमात्रनिष्ठः अतः परस्परयुक्तिभिरेव भेदस्य निराकृतत्वात् मोहमयत्वं सिद्धत्वमिति ननु यद्यहंकारो वि
कल्पश्च नास्ति अलं तर्हि तन्निवृत्तिप्रयासेन तत्राह व्यर्थोपि अर्थरहितोपि स्वरूपभूतान्मत्तो वहिर्मुखानां
नैवोपरमेत प्रत्युतः तत्कृतैः कर्मभिरुच्चनीचदेहेषु तेसंसरंतीतिभावः ३४ ॥ ऽऽ ॥ ० ॥

भा० ए० ११८ तदेवं लोकप्रसिद्धौ जन्ममृत्यू निरूप्य सूक्ष्मौ च दृष्टान्तावपि तौ वैराग्याय निरूपयति नित्यदा प्रतिक्षणं भूतानि श
रीराणि उत्पद्यन्ते नश्यन्ति च कालस्यातिसूक्ष्मत्वात्तत्कृतं भवं भवनमभवनं चाविवेकिभिर्न लक्ष्यते ४२ सतोर्जन्म
मरणयोरज्ञानेकारणमेतद्भवेत् सत्यमेव तयोः कुतः इत्याशंक्यानुमानेन साधयति अर्चिषां परिणामादि
भिः स्रोतसां गत्यादिभिः फलानां रूपादिभिर्यथावस्थाविशेषाः कृताः कालेनेति पूर्वस्यानुषंगः आदि

नित्यदा ह्यंग भूतानि भवंति न भवंति च कालेनालक्ष्यवेगेन सूक्ष्मत्वात्तन्न दृश्यते ४२
यथार्चिषां स्रोतसां च फलानां वा वनस्पतेः तथैव सर्वभूतानां वयोवस्थादयः कृताः ४३
सोयं दीपोर्चिषां यद्वत्स्रोतसां तदिदं जलं सोऽयं पुमानिति नृणां मृषा गीर्धीर्मृषायुषां ४४

शब्देन तेजोबलकामकौशलादीनामुपादानं विमतं प्रतिक्षणोत्पत्तिविनाशवदवस्थाभेदवत्त्वात् दीप
ज्वालादिवदित्यनुमानम् ४३ कथं तर्हि प्रत्यभिज्ञा तत्राह इदेव सादृश्यावलंबिनीत्याह सोयमिति सादृश्याद्दी
पामेव यथा सोऽयं दीप इति प्रत्यभिज्ञा यथा च स्रोतसां प्रवाहजलानामेव तदिदं जलमिति तथा सोऽयं
पुमानिति धीर्गीश्च मृषा नृणां शरीराणां मृषात्व्यर्थमायुर्येषामविवेकिनां तेषां भवति ४४ ॥ २२ ॥ २२

११८

ततः किमत आह विषयेति कर्मोपस्थापिते देवादिदेहे घन्यं ताभिनिवेशेन आत्मानं पूर्वदेहं पुनस्तेन स्मरेत्
इति यत् तस्यैव या नानादेहाद्यभिनिवेशेन भयशोकादेः देवादिदेहनिवेशेन वा हर्षत्वर्षादिहेतोः पूर्वदेहे अत्यंत
विस्मृतिरहंकारनिवृत्तिस्तदभिमानिनो जंतोर्जीवस्य मृत्युरुच्यते न तु देहवन्नाशः ३८ जन्म तु विषयस्य देहस्य
आत्मतया स्वीकृतिमभिमानं प्राहुः न तु देहवदुत्पत्तिं न च पुत्रादिदेहवत्प्रीत्यतिशयमात्रेण किंतु सर्वभा

विषयाभिनिवेशेन नात्मानं यत्स्मरेत्पुनः जंतोर्वै कस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः ३८ जन्म त्वात्म
तया पुंसः सर्वभावेन भूरिद विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः ३९ स्वप्नं मनोरथं चेत्थं प्राक्त
जैनोस १ नं न स्मरत्यसौ तत्र पूर्वमिवात्मानमपूर्वं चानुपश्यति ४० इंद्रियायनसृष्ट्येदं त्रैविध्यं भाति व
स्तुनि बहिरंतर्भिदाहेतुर्जनोऽसज्जनकृद्यथा ४१ वेनाभेदेनाभेदेनाभिमानमात्रेणोत्पत्तिमरणे दृष्टांतद्व
यं यथा स्वप्नश्च मनोरथश्चेत्यर्थः ३९ दृष्टांतौ विवृणोति स्वप्नमिति तत्र वर्तमाने स्वप्नादौ पूर्वं चेति अपूर्वमि
वेति चान्वयः पूर्वसिद्धमेवात्मा मम पूर्वमेव जातमिव पश्यतीत्यर्थः ४० उपसंहरति इंद्रियाणामयनं मनः त
स्य देहात्मताभिनिवेशेन या सृष्टिरुत्पत्तिः तया वस्तुनि आत्मनि तदभिमानेनेदं त्रैविध्यं उत्तममध्यमनीचत्वं प्र
सदेव भातीत्यन्वयः एवंभूतस्यात्मनो बाह्यांतरभेदे हेतुश्च भवति बाह्यविषयान् सुखादींश्च पश्यतीत्यर्थः यथा अ
नो जीवः स्वप्ने बहून् असतो जनान् देहान् कुर्वन् पश्यन् बहुरूपो भाति तद्वत् यद्वा इदं त्रैविध्यमध्यात्मादिरूपं भाति

ननु तदानीमच्छिन्नत्वेन जन्ममरणवान् देहो न दृश्यते तत्राह आत्मन इति पितृदेहस्योर्ध्वदैहिकं कुर्वतापि यद्द
र्शनात् पुत्रदेहस्य च जातकर्मणि जन्मदर्शनादात्मनः स्वदेहस्यापि भवाप्ययावनुमेयौ एवं च दृश्यत्वे सति भवा
प्ययवतां वस्तूनां देहानामभिज्ञो द्रष्टा द्वयलक्षणः भवाप्ययधर्मको न भवति ४८ एतदेव दृष्टान्तेन स्पष्टयति
तरोरिति तरुशब्देनोद्भिज्जमात्रं लक्ष्यते फलकांतस्य व्रीह्यादेरित्यर्थः यद्वा तरोर्वान्त्यः परिणामो विपाकः बीजा

आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ नभवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः ४८ तरोर्वी
जविपाकाभ्यां यो विद्वान् जन्मसंयमौ तरोर्विलक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक् ४९ प्रकृतेरेवमा
त्मानमविविच्याबुधः पुमान् तत्त्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते ५० सत्त्वसंगादृषीन्देवान्र
जसासुरमानुषान् तमसा भूततिर्य्यक्त्वं भ्रामितो याति कर्मभिः ५१ नृत्यतो गायतः पश्यन् यथैवानु
करोति तान् एवं बुद्धिगुणान् पश्यन्ननीहोऽप्यनुकार्यते ५२

जन्मविपाकात्संयमं नाशं च विद्वान् ४९ अविवेकिनः संसारं प्रपंचयति प्रकृतेरिति पंचभिः तत्त्वेन तत्त्व
तोऽविविच्य अतत्त्वदृष्ट्या स्पर्शेषु विषयेषु संमूढ इति वा ५० गुणभेदेन त्रिविधं तत्रापि तत्तारतम्येनैकैकं त्रि
द्विविधं संसारमाह सत्त्वेति ५१ ननु अकर्तुरात्मनः कुतः कर्मभिर्भ्रमणं तत्राह नृत्यतो गायतो जनान् पश्य
न् अनुकरोति तद्गतस्वरतालादिगतिं शृंगारकरुणादिरसं च मनस्यनुवर्त्तयतीत्यर्थः अनुकार्य्यते गुणैर्वलादि

ननु कथं देहाध्यासचेतः पुंस कर्मजन्ममरणानि संति नान्यस्येति व्यवस्था नहि घटते घटस्य पुरुषभेदेन सत्त्वमसत्त्वं वे
न अज्ञस्यापि वस्तुतस्तदभावादित्याह मास्वस्यनैवात्मनः कर्मणा वीजभूतेन सोऽपि अज्ञोऽपि पुमान्न जायते म्रिय
ते च किंत्वयं भ्रांत्या अजन्मापि जायत इव अमरोऽपि म्रियत इव यथाग्निर्महाभूतं तेजोरूपोऽग्निरनादित्वादनंतत्वाच्च नित्यो
ऽपि दारुसंयोगवियोगाभ्यां जन्मनाशौ प्राप्नोतीति तद्वत् ४५ सिद्धवत्कृत्योक्ता वयोवस्थाः प्रपंचयति निषेकेति निषेको जठरे प्रवे

मास्वस्य कर्मवीजेन न जायते सोप्ययं पुमान् म्रियते वामरो भ्रांत्या यथाग्निर्दारुसंयुतः ४५ नि
षेकगर्भजन्मानि बाल्यकौमारयौवनं वयोमध्यं जरा मृत्युरित्यवस्थास्तनोर्नव ४६ एता म
नोरथमयीर्हान्यस्योच्चावचास्तनूः गुणसंगादुपादत्ते क्वचित्कश्चिज्जहाति च ४७ ॥

शः गर्भस्तन्मध्ये वृद्धिः बाल्यं आपंचाब्दात् कौमारं आषोडशवर्षात् ततो यौवनं आपंचचत्वारिंशतः ततो
वयमध्यमापष्टिवर्षात् ४६ देहसंबंधाज्जन्ममरणादीनीत्युपादितमपादितमर्थमुपसंहरति एता इति
हस्फुटं अन्यदेहस्य तनूरवस्थाः गुणसंगात् प्रकृत्यविवेकात् कश्चित्परमेश्वरानुगृहीतः कथं जहा
ति अवस्थावतो देहस्य द्रष्टा नामवस्थावानिति विवेकज्ञानेन ४७

भा० ए०
१२०

निष्ठितः निष्ठीवनविषयीकृतः मूत्रितः मूत्रेणार्द्रीकृतः प्रकंपितः परमेश्वरनिष्ठातः प्रच्यावितोऽपि कृच्छ्रग
तः कष्टं प्राप्तोऽपि ५७ एवं त्वदुक्तं यथाऽवबध्येयत्तथा नः सर्वान्प्रति वद ॥५८॥ बहुमानिरतान्तेविदुषामपि
असद्भिः कृतमतिक्रमोऽपराधं सुदुःसहं मन्ये इत्यन्वयः प्रकृतिः स्वभावः ॥ निरस्य सर्वसंदेहं मे कीदृक्तत्सुदर्शनं प्र
काशितरहस्यं त्वं भजामि गुरुमीश्वरं ५९ ॥ इति श्री एकादशे द्वाविंशोऽध्यायः ॥२२॥ त्रयोविंशेतितिक्षार सहनोपायई

निष्ठितो मूत्रितो वाऽज्ञैर्बहुधैवं प्रकंपितः श्रेयस्कामः कृच्छ्रगत आत्मनात्मानमुद्धरेत् ॥५७॥ उद्धव
उवाच ॥ यथैवमनुबुध्येयं वद नो वदतां वर ॥ सुदुःसहमिदं मन्य आत्मन्यसदतिक्रमम् ॥५८॥ वि
दुषामपि विश्वात्मन्प्रकृतिर्हि बलीयसी ऋते त्वद्धर्मनिरतान्शान्तांस्ते चरणालयान् ॥५९॥ इति श्री
मद्भागवते महापुराणे एकादशस्कंधे द्वाविंशोऽध्यायः ॥२२॥ श्रीशुक उवाच ॥ स एवमाशंसित उ
टी१ द्धवेन भागवतमुख्येन दाशार्हर्षभेण ॥ सभाजयन्भृत्यवचो मुकुंदस्तमाबभाषे श्रवणीयवीर्यः ॥१॥

ये ते भिक्षुगीताप्रकारेण मनसः संयमो धिया दुर्जनोपद्रवो नूनं दुःसहोऽपि महीयसां अतश्चतुर्भिरध्यायैः
सहनोपायवर्णनं तत्रतावदस्मिन्नध्याये भिक्षुगीतया मनोविजयः उत्तरस्मिन्प्रकृतिपुरुषविवेकः तदुत्त
रस्मिन्गुणवृत्तिविजयः ततः परस्मिन्नैलगीतया विषयसंगत्यागेन सत्संग इति क्रमेणोपाया भागवता
वर्ण्यंते आशंसितः प्रार्थितः भृत्यस्य वचः सत्कुर्वन् तं भृत्यं प्रत्याबभाषे १ ॥ ऽऽ ॥ ऽऽ ॥ १२०

अनेन दृष्टांतेन दृश्यधर्मो द्रष्टरि स्फुरतीति दर्शितं उपाधिधर्माश्चोपहितेऽभवासंतन इत्यत्र दृष्टांतमाह यथां
भसेति तीरस्थास्तरवो धावंतं दृश्यंते जले प्रतिबिंबितावावचलाइवेति विषयग्राहकेण मनसा परिकल्पितास्त्वत्तेष
लावण्यादयो गुणाः न वस्तुतः संति अतो मनोनिबंधन एव संसार इत्यभिप्रेत्य ग्राहकगुणाः ग्राह्येऽभासंत इत्यत्र दृष्टां
तमाह चक्षुषेति ५३ भोगस्यापि मिथ्यात्वे दृष्टांतद्वयमाह यथेति एतान् प्रसिद्धमनोरथधियः स्वप्नदृष्टाश्च

यथांभसा प्रचलता तरवोपि चलाइव चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव भूः ५३ यथा मनो
रथधियो विषयानुभवो मृषा स्वप्नदृष्टाश्च दाशार्ह तथा संसार आत्मनः ५४ अर्थे ह्यविद्यमा
नेपि संसृतिर्न निवर्तते ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ५५ तस्मादुद्धव मा भुंक्ष्व
विषयानसदिंद्रियैः आत्माग्रहणनिर्भातं पश्य वैकल्पिकं भ्रमं ५६ क्षिप्तोवमानितोऽसद्भिः
प्रलब्धोऽसूयितोपि वा ताडितः संनिरुद्धो वा वृत्त्या वा परिहापितः १

धियो यथा मृषा एवमात्मनो विषयानुभवः संसारो मृषा ५४ ननु यदि मृषा तर्हि किं तन्निवृत्तिश्रमेणेत्यत्रा
ह अर्थे हीति अस्यात्मनः ५५ अतो भोगोद्यमो न कर्तव्य इत्याह तस्मादिति ५६ दुःखप्रतीकारोद्यममपि
परित्यज्य परमेश्वरे निष्ठेनैव भाव्यमित्याह क्षिप्त इति द्वाभ्यां क्षिप्तः आक्षिप्तः नुन्न इति वा प्रलब्धः उपहसितः १

भा० ए० तस्यैव ज्ञातयो बांधवाः अतिथयोः ध्वनीनाः अवृत्तेनार्च्चिताः इत्यर्थः शून्यावसथे धर्मकामहीने गृहे देहे वा ६
१२१ ७ यक्षाणां वित्तमेव केवलं रक्षणीयं वित्तं यस्य पंच भागिनः पंच यज्ञदेवताः ८ तेषामवध्यानमनादरः तेन वि
स्रस्तो विशीर्णः पुण्यस्कंधः अर्थलाभमात्रहेतुः शोयस्य तस्य बह्वायासैः कृष्यादिभिः केवलं श्रमो यस्मिन्

ज्ञातयोऽतिथयस्तस्य वाङ्मात्रेणापि नार्च्चिताः शून्यावसथ आत्मापि कामैरनर्च्चितः ६ दुःशी काले१
लस्य कदर्यस्य द्रुह्यंते पुत्रबांधवाः दारा दुहितरो भृत्या विषण्णा नाचरन् प्रियं ७ तस्यैवं यक्ष
च२ वित्तस्य च्युतस्योभयलोकतः धर्मकामविहीनस्य चुक्रुधुः पंचभागिनः ८ तदवध्यानविस्र
स्तपुण्यस्कंधस्य भूरिद अर्थोऽप्यगच्छन्निधनं बह्वायासपरिश्रमः ९ ज्ञातयो जगृहुः किंचि
त्किंचिद्दस्यव उद्धव दैवतः कालतः किंचिद्ब्रह्मबंधोर्नृपार्थिवात् १० स एवं द्रविणे नष्टे ध
र्मकामविवर्जितः उपेक्षितश्च स्वजनैश्चिंतामाप दुरत्ययां ११ तस्यैवं ध्यायतो दीर्घं नष्टराय
स्तपस्विनः खिद्यतो बाष्पकंठस्य निर्वेदः सुमहानभूत् १२

सः ९ दैवतः गृहदाहादिना कालतः निखातधान्यादिनाशेन पार्थिवादीनां च दंडैः कंटकैः तस्मात् १० ११ न
ष्टरायः नष्टा रायोऽर्था यस्य सः तस्य तपस्विनः संतप्तस्य १२ रामरामरामरामरामरामरामरामराम १२१

तत्रता वदंगीकारतस्तद्वचः संपूजयति द्वाभ्यां ॥ हे वार्हस्पत्य ॥ हे बृहस्पतेः शिष्य ॥ अत्र लोके स साधुर्नीतिज्ञो यो दुर्व्व
चोक्तैर्भिन्नं स्वभिन्नं मनः समाधातुमीश्वरः स्यात् ॥ कुत इत्यत आह ॥ नतथेति ॥ यथा मम मे स्या भ मर्मस्वेव नित्यं प्रिय
नः ॥ परुषोक्तिरूपा इषवस्तुदंति व्यथयंति ॥ तथा इतरे वाणा न तुदंति ॥ अन्तस्तेस्तथा न तप्यत इत्यर्थः ॥ तथापि म
यावदत्यमात्मरूपायैः सर्वं सोढुं शक्यमित्यभिप्रायेणेतिहासं प्रस्तौति ॥ महद्यथा भवति तथा शृणुयामितिहासं सम्या

श्री भगवानुवाच ॥ वार्हस्पत्य स वै नात्र साधुर्वै दुर्जनेरितैः ॥ दुरुक्तैर्भिन्नमात्मानं यः समाधातु
मीश्वरः ॥ १ ॥ न तथा तप्यते विद्धः पुमान्बाणैर्हि मर्मगैः ॥ यथा तुदंति मर्मस्था ह्यसतां परुषेषवः ॥ २ ॥
कथयंति महत्पुण्यमितिहासमिहोद्धव ॥ तमहं वर्णयिष्यामि निबोध सुसमाहितः ॥ केनचिद्भिक्षु
णा गीतं परिभूतेन दुर्जनैः ॥ स्मरता धृतियुक्तेन विपाकं निजकर्मणां ॥ ३ ॥ अवंतिषु द्विजः कश्चिदासीदा
[illegible] ढ्यतमः श्रिया ॥ वार्त्तावृत्तिः कदर्यस्तु कामी लुब्धोतिकोपनः ॥ ४ ॥

पां कथयंति ॥ ३ ॥ स तु भिक्षुः पूर्वं धनाढ्यः ॥ कष्टार्जितस्य धनस्य नाशेन संतप्यमानो निर्विण्णः सन् प्रव्रज्य भिक्षा
मटन् दुर्जनैरुपद्रुतः ॥ अवमानितः ॥ प्रस्तुतोपयोगिनीं गाथामगायदिति वक्तुं तस्य चरित्रमाह ॥ अवंतिष्विति
द्विना ॥ अवंतिषु मालवेषु वार्त्ता कृषिवाणिज्यादिरूपा वृत्तिर्यस्य ॥ कदर्यस्तु स्मृता बुक्तः ॥ आत्मानं धर्मकृत्यं च पुत्रदा

रांश्च पीडयन् देवतातिथिभृत्यांश्च स कदर्य इति स्मृतः
इति ॥ ५ ॥

भा० ए०
१२२

संरब्धाः क्षुभिताः स्पृधः स्पर्द्धमानाः १९ इह तावदर्थेनिष्टानामेते ऽनर्थाः परलोकेप्यनर्थ एवते षामित्या-
ह लब्ध्वेति त्रिभिः मानुष्यं जन्म तत्रापि द्विजाग्र्यतां श्रेष्ठत्वं एवं स्वार्थं घ्नंति आत्महितं न कुर्वंयते ते यांति २० अ-
मरप्रार्थ्यतां दर्शयन्नाह स्वर्गेति लोकं देहं अनुसज्जेत आसक्तिं कुर्यात् २१ ऋषयो मनुष्ययज्ञत्वब्रह्मयज्ञ

अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः त्यजंत्याशु स्पृधो घ्नंति सहसोत्सृज्य सौहृदं १९ ल-
ब्ध्वा जन्मामरप्रार्थ्यं मानुष्यं तद्द्विजाग्र्यतां तदनादृत्य ये स्वार्थं घ्नंति यांत्यशुभां गतिम् २० स्वर्गा-
पवर्गयोर्द्वारं प्राप्य लोकमिमं पुमान् द्रविणे कोऽनुसज्जेत मर्त्योऽनर्थस्य धामनि २१ देवर्षिपि-
तृभूतानि ज्ञातीन्बंधूंश्च भागिनः असंविभज्य चात्मानं यक्षवित्तः पतत्यधः २२ व्यर्थयार्थेहया
वित्तं प्रमत्तस्य वयो बलं कुशला येन सिध्यंति जरठः किं नु साधये २३ कस्मात्संक्लिश्यते
विद्वान्व्यर्थयार्थेहयासकृत् कस्यचिन्मायया नूनं लोकोयं सुविमोहितः २४

यो देवताः देवपितृभूतानीति नरः सुत्तान यः सगोत्राः बंधवो विवाहादिनासंबद्धास्तान् अन्यांश्च भागिनो
भागार्हान् आत्मानं च असंविभज्य अन्नादिभिरसंतर्प्य २२ एवं विमृश्यानुतप्यमानः आह व्यर्थयार्थेहयाप्र-
मत्तस्य मम वित्तादिगतः मिति शेषः येन वित्तादिना कुशलाः विवेकिन सिध्यंति मुच्यंते जरठो वृद्धः २३ अन्योप

पिसह शंशृणोवति कस्मादेव मनर्थे विद्वानपि संक्लि-
श्यति कारणं संभावयति कस्यचिदिति २४

१२२

मेमयाआत्मादेहः वृथैवात्मानुतापनंप्रपंचयतिनधर्मायेत्यादिनायस्येदृशोऽर्थायासस्तेनमया १३
नरकायचसत्यर्थेधर्मोननुष्ठानात् १४ श्वित्रंश्वेतकुष्टं १५ सिद्धेप्राप्तेर्थेतस्योत्कर्षेसंवर्द्धने नाशोपभोगयोर्द्वंद्वै
क्यंनाशे उपभोगेवेत्यर्थः साधनोत्कर्षयोरायासः ततस्त्रासश्चिंताच नाशेभ्रमइति किंच अर्थप्राप्त्यर्थाः

सचाहेदमहोकष्टंवृथात्मामेनुतापितः नधर्मायनकामाययस्यार्थायासईदृशः १३ प्रायेणा
र्थाःकदर्याणांनसुखायकदाचन इहचात्मोपतापायमृतस्यनरकायच १४ यशोयशस्विनांशुद्धं
श्लाघ्यायेगुणिनांगुणाः लोभःस्वल्पोपितान्हंतिश्वित्ररूपमिवेप्सितं १५ अर्थस्यसाधनेसिद्धे
उत्कर्षेरक्षणेव्यये नाशोपभोगआयासस्त्रासश्चिंताभ्रमोनृणां स्तेयंहिंसानृतंदंभःकामक्रोधः
स्मयोमदः भेदोवैरमविश्वासःसंस्पर्द्धाव्यसनानिच १६ एतेपंचदशानर्थाह्यर्थमूलामतानृ
णां तस्मादनर्थमर्थाख्यंश्रेयोर्थीदूरतस्त्यजेत् १७ भिद्यंतेभ्रातरोदाराःपितरःसुहृदस्तथा ए
कास्निग्धाःकाकिणिनासद्यःसर्वेरयःकृताः १८

स्तेयादयःषडनर्थाः प्राप्त्यर्थेस्मयादयोव्यसनैःसहनव व्यसनानिस्त्रीद्यूतमद्यविषयाणित्रीणि १६ १७
भेदवैरस्पर्द्धाभ्यांभिद्यंतेस्नेहंत्यजंतीतिकथंभूताः एकास्निग्धाः एकैकप्राणाः तेचते आस्निग्धाः अतिप्रिया
इत्यर्थः कृतःकाकिणिनापुंस्त्वमार्षं विंशतिवराटिकाकाकिणीतया १८

भा० ए० प्रवयसं वृद्धं अवधूतं मलिनं पर्य्यभवन् अवमेनिरे हे भद्र परिभूतिभिस्तिरस्कारैः ३१ परिभवानेव दर्शय
१२३ ति केचिदिति सप्तभिः भो भगवन् गृहाणेति दर्शितानि संति प्रदाय पुनश्चाददुः ३२ अन्नं मूत्रयंति मूर्द्धनि ष्ठी

तं वै प्रवयसं भिक्षुमवधूतमसज्जनाः दृष्ट्वा पर्य्यभवन् भद्र बह्वीभिः परिभूतिभिः ३१ केचित्त्रिवे
णुं जगृहुरेके पात्रं कमंडलुं पीठं चैकेऽक्षसूत्रं च कंथां चीराणि केचन प्रदाय च पुनस्तानि दर्शि
तान्याददुर्मुने ३२ अन्नं च भैक्ष्यसंपन्नं भुंजानस्य सरित्तटे मूत्रयंति च पापिष्ठाः ष्ठीवंत्यस्य च
मूर्द्धनि ३३ यतवाचं वाचयंति ताडयंति न वक्ति चेत् तर्जयंत्यपरे वाग्भिः स्तेनोयमिति वादिनः
वध्नंति रज्ज्वा तं केचिद्बध्यतां बध्यतामिति ३४ क्षिपंत्येकेवजानंत एष धर्मध्वजः शठः क्षी
णवित्त इमां वृत्तिमग्रहीत्स्वजनोज्झितः ३५ अहो एष महासारो धृतिमान् गिरिराडिव मौनेन
साधयत्यर्थं बकवद्दृढनिश्चयः ३६ इत्येके विहसंत्येनमेके दुर्वातयंति च तं ववंधुर्निरुरुधुर्य
था क्रीडनकं द्विजं ३७

वंति थूत्कारैरेभ्यस्तेषामागं प्रक्षिपंति ३३ ३४ क्षिपंति निंदंति निंदामेवाह एष धर्मध्वजः त्रिदंडे लिंगोप
जीवी शठो लोकवंचकः नदेवाद्गः क्षीणवित्त इति ३५ महासारः अतिबली ३६ दुर्वातयंति तदुपर्य्यधोवायुं मुं
चंति ववंधुः शृंखलैः निरुरुधुः कारागृहादिषु द्विजं मुके सारिकादिकं यथा ३७ ॥ १२३

ननु नायं विमोहितः क्लिश्यति किं तु धनादिभिर्भोगादिविधित्सया अत आह किं धनैरिति उत पुनरपि २५
इदानीं संपन्नविवेकः सन् हृष्यन्नाह नूनमिति त्रिभिः येन प्रीतेनात्मनः प्लवरूपो निर्वेदश्च भवति स हरिर्मे नूनं
प्रीत इति २६ अंगं शोषयिष्ये तपसा यद्वा विद्यालयं नेष्यामि यदि स्यात् कालावशेषस्तर्ह्यात्मन्येवासिद्धस्तुष्टः

किं धनैर्धनदैर्वा किं कामैर्वा कामदैरुत मृत्युनाग्रस्यमानस्य कर्मभिर्वोत जन्मदैः २५ नूनं मे
भगवांस्तुष्टः सर्वदेवमयो हरिः येन नीतो दशामेतां निर्वेदश्चात्मनः प्लवः २६ सोऽहं कालावशेषे
ण शोषयिष्येऽङ्गमात्मनः अप्रमत्तोऽखिलस्वार्थे यदि स्यात्सिद्ध आत्मनि २७ तत्र मामनुमोदेर
न्देवास्त्रिभुवनेश्वराः मुहूर्तेन ब्रह्मलोकं खट्वाङ्गः समसाधयत् २८ श्री ग नु च इत्य
भिप्रेत्य मनसा ह्यावन्त्यो द्विजसत्तमः उन्मुच्य हृदयग्रन्थीन् शान्तो भिक्षुरभून्मुनिः २९ स च
चार महीमेतां संयतात्मेन्द्रियानिलः भिक्षार्थं नगरग्रामानसंगोऽलक्षितोऽविशत् ३०

सन् अखिलस्वार्थे धर्मादिसाधनेऽप्रमत्तः सन् २७ अनुमोदेरन् अनुगृह्णन्तु ननु देवैरनुमोदितोऽपि जरठः स्व
ल्पेन कालेन किं साधयिष्यसि तत्राह मुहूर्तेनेति २८ अभिप्रेत्य निश्चित्य आवन्त्योऽवन्तिदेशभवः हृदयग्रन्थीन्
अहंकारममकारान् २९ असंग आसक्तिशून्यं अलक्षितः अध्यमद्योतयन् ३० ॥

तर्हि मनस एव संसारः स्यात् नात्मन इत्याशंक्याह अनीह इति अयमर्थः अविद्यया मनोध्यासेनैव आत्मनः
संसृतिर्न तु स्वतः यतस्तद्रहितस्येश्वरस्य सा नास्ति किंतु तत्त्वतो जीवस्यैवेति तदेतदाह मनसा समीहमा
नेन सह नियंतृत्वेन वर्तमानोपि परमात्मा अनीहः तत्क्रियासंगरहितः यतो हिरण्मयः विद्याशक्तिप्रधानः
कुतो यतो मत्सखः ममजीवस्य सखा नियंता अतः उत्प्रचष्टे विचष्टे अतिरोहितज्ञानेन केवलं पश्यतीत्य
र्थः असौ पुनरहं जीवः स्वलिंगं स्वस्मिन्नात्मनि लिंगयति द्योतयति संसारमिति तथा तन्मनः परिगृह्य

अनीह आत्मा मनसा समीहता हिरण्मयो मत्सख उद्विचष्टे । मनः स्वलिंगं परिगृह्य
कामाञ्जुषन्निबद्धो गुणसंगतोऽसौ ६२ दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्मा
णि च सद्व्रतानि सर्वे मनोनिग्रहलक्षणांताः परो हि योगो मनसः समाधिः ६३

ह ।

आत्मत्वेन स्वीकृत्य तस्य मनसो गुणैः कर्मभिः संगतः संबद्धः गुणसंगाद्वा कामान् जुषन्निबद्ध इति ६२ अ
तो मनोनिग्रहे कृते सर्वं कृतं स्यात् तं विना तु सर्वं व्यर्थमित्याह दानमिति द्वाभ्यां स्वधर्मो नित्यनैमित्तिकः स
द्व्रतान्येकादश्युपवासादीनि अन्यानि च यावंति कर्माणि एते सर्वे उपाया मनोनिग्रहलक्षणाः अंतो निष्ठाफ
लं येषां ते तथा ननु ज्ञानं योगत्वेन तेषां प्रसिद्धं तत्राह मनसः समाधिर्निग्रह एव परो योगः ज्ञानम् ६३ ॥ ऽऽ

भौतिकं दुर्जनादिकृतं दैहिकं शीतोष्मादिप्रभवं दिष्टं दैवप्राप्तं ३८ धर्मोत्पातयद्भिः परिभूतोऽपि सात्त्विकीं धृ
तिमस्थ धृत्या यया धारयते मनःप्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकीति स्मृतेः
३९ तामेवाष्टादशश्लोकीं गाथामाह नायमिति न चात्मा नापि ग्रहादयः मनः परं केवलं सुख

एवं स भौतिकं दुःखं दैहिकं दैविकं च यत् भोक्तव्यमात्मनो दिष्टं प्राप्तं प्राप्तमबुध्यत ३९
परिभूत इमां गाथामगायत नराधमैः पातयद्भिः स्वधर्मस्थो धृतिमास्थाय सात्त्विकीं ३९
द्विज उवाच नायं जनो मे सुखदुःखहेतुर्न देवतात्मा ग्रहकर्मकालाः मनः परं कारण
मामनंति संसारचक्रं परिवर्तयेद्यत् ४० मनो गुणान्वै सृजते बलीयस्ततश्च कर्माणि
विलक्षणानि शुक्लानि कृष्णान्यथ लोहितानि तेभ्यः सवर्णाः सृतयो भवंति ४१

दुःखयोः कारणं वदंति मनसा ह्येव पश्यति मनसा शृणोतीत्यादिश्रुतयः ४० परिवर्तनप्रकारमे
वाह मन इत्यादिना गुणान् गुणवृत्तीः सृजति ततश्च तेभ्यो गुणेभ्यः शुक्लानि सात्त्विकानि कृष्णानि
तामसानि सवर्णास्तत्तत्कर्मानुरूपाः सृतयो देवतिर्यङ्नरादिरूपा गतयः ४१ रामरामरामरामराम

भा॰ ए॰ १२५ ततश्चानेनप्रकारेणसंसारेभ्रमंतीत्याह देहमिति मनोमात्रपरिकल्पितमिदंस्वदेहमिति पुत्रादिदे-
हंममेतिस्वीकृत्यतमसिसंसारे ४७ तदेवंतमसएवसुखदुःखकारित्वमुपपाद्येदानींजनादीनां
मसाम्यकारणत्वंप्रपंचयति जनस्त्विति षड्भिः अत्रचात्रास्मिन्नपिपक्षे आत्मनःकिं नकिंचित्सुखदुःख
कर्तृत्वंतत्कर्तृत्वंचेत्यर्थः कुतइत्यतआह हेनिश्चितं भौमयोर्भूमिविकारयोर्देहयोस्तत् नत्वात्मनः अ-
मूर्तस्याक्रियस्यच हननादिषुकर्मत्वकर्तृत्वानुपपत्तेः तथापिदुःखमात्मपर्यवसाय्येवेतिचेत् एवम

देहोमनोमात्रमिमंगृहीत्वा ममाहमित्यंधधियोमनुष्याः एषोऽहमन्योऽयमितिभ्रमेण
दुरंतपारेतमसिभ्रमंति ४७ जनस्तुहेतुःसुखदुःखयोश्चेत्किमात्मनश्चात्रहभौमयोस्तत् ॥
जिह्वांक्वचित्संदशतिस्वदद्भिस्तद्वेदनायांकतमायकुप्येत् ४८ दुःखस्यहेतुर्यदिदेवतास्तुकिं
मात्मनस्तत्रविकारयोस्तत् यदंगमंगेननिहन्यतेक्वचित्क्रुध्येतकस्मैपुरुषःस्वदेहे ४९

पिपरमात्मनउभयत्राप्येकत्वान्नकोपविषयोऽस्तीति स्वदेहदृष्टांतेनदर्शयति जिह्वामिति ४८ यदिदे-
वताश्चक्षुरादयस्तत्रापिपक्षेआत्मनःकिं सतौविकारयोर्विक्रियमाणयोर्देवतयोस्तत् हस्तेनमुखेऽभिहते नेत्रे
हस्तेहस्तदष्टेतदभिमानिनोर्वह्नीद्रयोरेवतत् नत्वविक्रियस्याऽनहंकारस्यचात्मनः देवतानांचसर्वदे-
हेष्वभेदान्नकोपविषयोऽस्तीति तदेहदृष्टांतमाह यत्तयदंगमंगेदेवताधिष्ठानंहस्तमुखादि अतएवप-

[illegible]

१२५

अतो यस्य मनः समाहितं भवति तस्य किं कृत्यमस्ति वदेति परं प्रत्युपदिशन्निव स्वयमेवाह असंयतं विक्षि
प्तं चेत् यद्वा विनश्यत् आलस्यादिना लीयमानं च यद्भवेत्तर्हि दानादिभिः किमपरं प्रयोजनं स्या
न्न किंचिदित्यर्थः ४४ ननु चेतरेंद्रियजयः प्रयोजनं स्यान्नेत्याह मनोवश इति देवा इंद्रियाणि तदधिष्ठा
तारो वा भीष्मो योगिनामपि भयंकरो मनो लक्षणो हेतुः कुतः सहसः बलादपि बलिनोपि वा सहीयान् ब

समाहितं यस्य मनः प्रशांतं दानादिभिः किं वद तस्य कृत्यं असंयतं यस्य मनो विनश्यद्दाना
दिभिश्चेदपरं किमेभिः ४४ मनोवशेन्ये ह्यभवन्स्म देवा मनश्च नान्यस्य वशं समेति भीष्मो
हि देवः सहसः सहीयान् युंज्याद्वशे तं स हि देवदेवः ४५ तं दुर्ज्जयं शत्रुमसह्यवेगमरुं
तुदं तन्न विजित्य केचित् कुर्वंत्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः ४६ ॥

लीयान् अतस्तं यो वशवर्त्तिनं कुर्यात् स एव देवदेवः सर्वेंद्रियनेता भवति नान्यः तथा च श्रुतिः मन
सो वशे सर्वमिदं बभूव नान्यस्य मनो वशमन्वियाय भीष्मो हि देवः सहसः सहीयानिति ४५ अतः अ
सह्यासाध्यो वेगो यस्य तं अत एवारुंतुदं मर्म अरुः मर्म तत्तुदति व्यथयतीत्यरुंतुदस्तं तन्नेति छेदः
तं न विजित्य अजित्वा तत्र ततः ये केचिन्मर्त्यैः कैश्चिदसद्विग्रहं कुर्वंति तत्र चानुकूलप्रतिकूलादीन्
अन्यान् मित्रादीन् कुर्वंति ते मूढा इत्यर्थः ४६

तत्र कालपक्षेपि आत्मनः किं यतोसौ कालात्मक एव ब्रह्मांशत्वात् स्वांशस्य स्वतः पीडा नास्तीत्यत्र दृष्टांतः ना
निर्हेतोरस्तदंशस्य ज्वालादेस्तापोदाहतो नाशोस्ति तत्रौपाधिभूतकाष्ठांशदाहान्नाशः स्यादिति दृष्टांतांतर
माह हिमस्य तत्तुषारत्वं तदंशस्य तुषारकणस्य नाशकं न स्यादित्यर्थः किंच आत्मतोमंशत्वं वस्तुतः परस्वा
यं न च परस्य द्वंद्वं सुखदुःखादिकमस्तीति ५२ तदेव षड्भेते हेतवः प्रसिद्धा निरस्ताः यदि कश्चिद्वत्तरमु

सू १ कालस्तु हेतुः सुखदुःखयोश्चेत् किमात्मनस्तत्र तदात्मकोसौ नाग्नेर्हि तापो न हिमस्य तत्स्यात् क्रुध्ये
त कस्मै न परस्य द्वंद्वं ५३ न केनचित्क्वापि कथंचनास्य द्वंद्वोपरागः परतः परस्य यथाहमः
संसृतिरूपिणः स्यादेवं प्रबुद्धो न बिभेति भूतैः ५४ एतां स आस्थाय परात्मनिष्ठामध्यासितां पू
र्वतमैर्महर्षिभिः अहं तरिष्यामि दुरंतपारं तमो मुकुंदांघ्रिनिषेवयैव ५५

वयं तदपि वस्तु महिमाऽवेत्तया न संभवतीत्याह न केनचिदिति नन्वपरोक्तः कथमपह्नूयते तत्राह यथेति
संसृतिं विद्यमानामेव रूपयति प्रकाशयतीति तथा तस्य अहमः अहंकारस्य यथा स्यात् न तथा परतः प्रकृतेः
परस्यात्मनो द्वंद्वसंबंधः अहंकारनिमित्तोऽसौ न वास्तव इत्यर्थः एवं प्रबुद्धो यः स भूतैः कृत्वा न बिभेति ५४
अतोऽहमप्येतथैव परमात्मनिष्ठया तरिष्यामीत्याह एतामिति सोहमित्यन्वयः ननु इयं निष्ठैव कथं भवेत्तत्राह

आत्मनः सुखदुःखाद्याकारः परिणामः अतः स एव हेतुर्यदि स्यात् तत्र तस्मिन्नप्यन्यतः किंन किंचि
दन्यतो भवति यस्मै कुप्येदित्यर्थः यतो निज एव स्वभावः सः नन्वात्मनस्तथापरिणामोऽन्यनिमित्तो भवति
अतोऽस्ति कोपविषय इति चेत्तत्राह नहीति आत्मव्यतिरिक्तं नास्त्येव यदि स्यादस्तीति प्रतीयेत तर्हि तन्मृ
षैव अतः कस्माद्धेतोः क्रुध्येत् यतो नास्ति निमित्तं न च सुखं चेत्यर्थः ५० ग्रहपक्षेप्यजस्यात्मनः किं य
तो जन्यत इति जनो देहस्तस्यैव जन्मलग्नापेक्षया ग्रहा द्वादशाष्टमादिराशिस्थास्ते सुखदुःखयोर्निमित्तं भवति किं

आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजस्वभावः न ह्यात्मनोऽन्यद्यदि तन्मृषा स्यात् क्रुध्ये
त कस्मान्न सुखं न दुःखं ५ ग्रहा निमित्तं सुखदुःखयोश्चेत्किमात्मनोऽजस्य जनस्य ते वै ग्रहैर्ग्रह
स्यैव वदंति पीडां क्रुध्येत कस्मै पुरुषस्ततोऽन्यः ५१ कर्मास्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तद्धि
जडाजडत्वे देहस्त्वचित्पुरुषोऽयं सुपर्णः क्रुध्येत कस्मै नहि कर्ममूलं ५२

श्र२ च अतनोस्तस्यैव ग्रहैस्तत्रस्थस्यैव पादार्धादिदृष्ट्यादिभेदैः पीडां वदंति दैवज्ञाः न तु गृहकोणादिषु स्थित
स्य तद्गोचरस्य पुरुषस्य ग्रहगतैव तु पीडा तल्लग्नोऽयं तद्देहे तस्याभिमानो भवति अतः पुरुषः ततो ग्रहात्
देहाच्चान्यः कस्मै क्रुध्येत् ५१ कर्म हेतुश्चेत् अस्त्वित्यभ्युपगमः कर्मैव नास्ति कुतस्तस्य हेतुत्वमिति तदाह
हि यस्मात्कर्म एकस्य जडाजडत्वे सति स्यात् जडत्वाद्धि कारित्वोपपत्तेः अजडत्वाच्च हितानुसंधानतः अत्र तु स

भा० ए०
१२७ चतुर्विंशेतु सांख्येन मनो मोहो निवार्य्यते आत्मनः सर्वभावानामागमापायचिंतया स्वपदद्वंद्वभक्तानां
महद्वंद्वत्वायसंगमं चित्तस्योक्ता पुनः कृत्स्नः सांख्यमत्राह तन्कृते अद्वितीयात्परमात्मनो माययाप्रकृति
पुरुषद्वारा सर्वद्वैतमुदेति पुनस्तत्रैव लीयत इत्यनुसंदधानस्य द्वंद्वभ्रमो निवर्त्तत इति वक्तुं सांख्यप्रस्तौ
ति यथेति पूर्वैः कपिलादिभिः विनिश्चितं वैकल्पिकं भेदनिमित्तं भ्रमं सुखदुःखादिरूपं १ अथाशब्दः

श्री ग उ च अथ ते संप्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितं यद्विज्ञाय पुमान्सद्यो जह्याद्वैक
ल्पिकं भ्रमं १ आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितं यदा विवेकनिपुणा आदौ कृतयुगे
युगे २ तन्मायाफलरूपेण केवलं निर्विकल्पितं वाङ्मनोगोचरं सत्यं द्विधा समभवद्बृहत् ३

कार्त्स्न्ये ज्ञानं द्रष्टा तेन दृश्यः कृत्स्नोऽप्यर्थश्चाविकल्पमशून्यमेकमेव ब्रह्म एवं वलीनमासीदित्यर्थः कदेत्य
पेक्षायामाह आयुगे युगेभ्यः पूर्वं प्रलय इत्यर्थः तथा आदौ यत्कृतयुगं तस्मिंश्च अन्यदापि यदा विवेक
निपुणा जना भवंति तदापि तेषां भेदास्फूर्त्तिः २ तद्बृहद्ब्रह्म वाङ्मनोगोचरं यथा भवति तथा मायादृश्यफ
लं तत्प्रकाशस्तद्रूपेण वा द्विधाऽभवत् ३ श्रीराम श्रीराम श्रीराम गोपाल ॥ रामराम ॥ ऽऽ

प्रस्तावेनसहगाहार्थसंक्षेपतोदर्शयतिद्वाभ्यां निर्विद्येति इत्थंनष्टद्रविणोनिर्विद्यगतक्लमः प्रव्रज्यगांपर्यट
न्नसद्भिर्निराकृतोऽपिस्वधर्मादकंपितःसन्मुनिरमुंगाथामगायतेत्यन्वयः ५६ मित्रोदासीनरिपवःसर्वोपिसंसा
रः तमसोऽज्ञानतः आत्मनोमनसोविभ्रममात्रःकृतःनतात्विकइत्यर्थः ५७ उक्तं द्वंद्वसहनोपायमुपसंहर
तितस्मादिति ५८

श्री ग नु च निर्विद्यनष्टद्रविणोगतक्लमःप्रव्रज्यगांपर्य्यटमानइत्थंनिराकृतोऽसद्भि
रपिस्वधर्मादकंपितोऽमुंमुनिराहगाथां ५६ सुखदुःखप्रदोनान्यःपुरुषस्यात्मविभ्रमः
मित्रोदासीनरिपवःसंसारस्तमसःकृतः ५७ तस्मात्सर्वात्मनातातनिगृहाणमनोधिया ॥
मय्यावेशितयायुक्तएतावानयोगसंग्रहः ५८ यएतांभिक्षुणागीतांब्रह्मनिष्ठांसमाहितः
धारयन्श्रावयन्शृण्वन्द्वंद्वैर्नैवाभिभूयते ५९ इ श्री भा व म पु ए का श धे
श्री ग दु व वा त्र विं ध्या २३

मनोनिग्रहाशक्तोपितच्छ्रवणादिनिष्ठस्तत्फलंप्राप्नोतीत्याह यइति द्वंद्वैः सुखदुःखादिभिः ५९ भि
क्षुगीतंमिषंकृत्वाभक्तचित्तगतंहरिः मोहंनिघ्नतिहाभातिपरमानंदरूपतः ॥ इ श्री का शे यो श २३

भा० ए० तस्मात्त्रिविधात्त्रिविधप्रपंचोत्पत्तिंदर्शयति अर्थइति तन्मात्रिकात्शब्दादितन्मात्रकारणात्तामसात्तद्वाराऽर्थोमहाभूत
१२८ रूपेणजज्ञेतेषांभूतानामावरणस्वभावत्वात् इंद्रियाणिदशतैजसाद्राजसात् तेषांप्रवृत्तिस्वभावत्वात् वैकृता
त्सात्विकाद्देवताः दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाः चंद्रश्चेत्येकादश शब्दात्मनश्च तेषांप्रकाशस्व
भावत्वात् ८ ममवैराजोत्पत्त्याभिमानः ९ सलिलसंस्थितिर्यस्यतत्सलिलसंस्थितितस्मिन्सलिलसंस्थितावंडे

अर्थस्तन्मात्रिकाज्जज्ञेतामसादिंद्रियाणिच तैजसाद्देवताआसन्नेकादशचवैकृतात् ८ मयासं
चोदिताभावाःसर्वेसंहत्यकारिणः अंडमुत्पादयामासुर्ममायतनमुत्तमं ९ तस्मिन्नहंसमभवमं
डेसलिलसंस्थितौ ममनाभ्यामभूत्पद्मंविश्वाख्यंतत्रचात्मभूः १० सोऽसृजत्तपसायुक्तोरजसा
मदनुग्रहात् लोकान्सपालान्विश्वात्माभूर्भुवःस्वरितित्रिधा ११ देवानामोकआसीत्स्वर्भूतानांच
भुवःपदं मर्त्यादीनांचभूर्लोकःसिद्धानांत्रितयात्परं १२ अधोऽसुराणांनागानांभूमेरोकोऽसृजत्प्रभुः १३

श्रीनारायणरूपोलीलाविग्रहेणसमभवं स्थितइत्यर्थः विश्वाख्यंलोककारणभूतं तत्रचात्मभूःस्वतुराननरू
पभोगविग्रहेणपुनर्वैराजरूपवतस्मिन्नाविर्भूतइत्यर्थः १० रजसायुक्तोमदनुग्रहात्तपसाऽसृजत् भूःअत
लादिसहिता भुवःअंतरिक्षलोकः स्वःस्वर्गः महर्लोकादेरप्युपलक्षणं ११ लोकसृष्टिप्रयोजनमाह देवानामि
तिसार्द्धेन ओकोनिवासःपदंस्थानं त्रितयात्परं महर्लोकादि १२ भूमेरधःअतलादि १३ ॥ ऽऽ ॥ ऽऽ ॥ १२८

तयोर्द्विधाभूतयोरंशयोर्मध्येउभयात्मिकाकार्यकारणरूपिणी ४ अभवन् अभिव्यक्ताबभूवुः मयापरमेश्वरेणजी
वादृष्टप्रयुक्तत्वात्स्पष्टः पुरुषानुमतत्वं यद्वा स्वस्यैव प्रकृतित्वेईक्षणरूपायापुरुषावस्थायास्तदनुमतेनेतद्द्वारेणेत्यर्थः ५
सत्वंक्रियाशक्तिमान्प्रथमोविकारः ततोमहान्ज्ञानशक्तिः नन्वयंमहान्नैवप्रथमोविकारःप्रसिद्धस्तत्राह सचज्ञानक्रि
याशालित्वात्सूत्रेणसंयुतोनपृथक् एकमेवतत्त्वंक्रियाज्ञानशक्तिभ्यांद्विधोच्यतइत्यर्थः विमोहनोजीवस्याध्यासहेतुःसज्जातः ६
यस्तन्मात्रादीनांकारणं मनःशब्देनदेवानामप्युपलक्षणंचिद्वृचिन्मयः चिदाभासव्याप्तत्वादुभयग्रंथिरूपइतिजीवोपाधि

तयोरेकतरोह्यर्थःप्रकृतिःसोभयात्मिका ज्ञानंत्वन्यतमोभावःपुरुषःसोभिधीयते ४ तमोरजःसत्वमिति
प्रकृतेरभवन्गुणाः मयाप्रक्षोभमाणायाःपुरुषानुमतेनच ५ तेभ्यःसमभवत्सूत्रंमहान्सूत्रेणसंयुतः ततोवि
कुर्वतोजातोयोहंकारविमोहनः ६ वैकारिकस्तैजसश्चतामसश्चेत्यहंत्रिवृत् तन्मात्रेंद्रियमनसांकारणंचि
दचिन्मयः ७

त्वंदर्शितं यद्यपितस्माद्वाएतस्मादात्मनःआकाशःसंभूतइत्यादिश्रुतेरन्नमयंहिसौम्यमनइत्यादिश्रुतेश्चप्रथमं
भूतानिजायंते तेभ्यश्चापंचीकृतेभ्यःप्राणादिक्रमेणसमष्ट्यात्मकलिंगशरीरंपंचीकृतेभ्यश्चब्रह्मांडंतस्मिन्वैराजःतदंत
र्यामीलीलाविग्रहःक्षीरोदशायीश्रीनारायणः तन्नाभिपद्मेचवैराजस्यभोगविग्रहश्चतुराननः ततोयथावसरमन्ये
षांजीवानामाविर्भावइतिप्रक्रिया तथापिचित्ताभिव्यक्तिपूर्वकोऽहंकारस्ततोभूतेंद्रियादिव्यवहारइत्येतावतामहदादि
क्रमेणसृष्टिरुच्यते तथाचोक्तं मृल्लोहविस्फुलिंगाद्यैःसृष्टिर्याचोदितान्यथा उपायःसोवतारायनास्तिभेदःकथंचनेति ॥ ९ ॥

नन्वेवंतर्हिस्वकार्य्यंप्रतिमहदादीनामप्याद्यंतरूपत्वात्सत्वंस्यात्तत्राह यदिति यद्रूपमुपादानंयदुपादान
कारणंतदुपादायस्वीकृत्यपूर्वः कारणरूपोमहदादिर्भावः परमहंकारादिभावंविकुरुतेसृजति यथापिंडोमृदमुपा
दायस्वयंनिमित्तभूतोघटंसृजतितद्वत् सएवसन्निति एवंस्यादनुषंगः कथंतर्हिमृत्तिकेत्येवसत्यमित्यादि
श्रुतेः तत्राह आदिरिति यदुपादायस्यादिरंतश्चविवक्ष्यतेतदातत्सत्यमित्यभिधीयतेश्रुत्या परस्यकारणस्या
त्मनःसत्यत्वंविवक्षितमित्यर्थः १८ ननुतथापिप्रकृतिपुरुषकालानामकार्य्यभूतानांभिन्नत्वात्कथमद्वितीयतात

यदुपादायपूर्वस्तुभावोविकुरुतेपरं आदिरंतोयदायस्यतत्सत्यमभिधीयते १८ प्रकृति
र्ह्यस्योपादानमाधारःपुरुषःपरः सतोभिव्यंजकःकालोब्रह्मतत्त्रितयंत्वहम् १९ सर्गःप्र
वर्त्ततेतावत्पौर्वापर्येणनित्यशः महान्गुणविसर्गार्थःस्थित्यंतोयावदीक्षणं २०

त्राह प्रकृतिरिति अस्यसतःकार्य्यस्यउपादानं याप्रकृतिःप्रसिद्धा यश्चतस्याआधारोधिष्ठातारःपुरुषः य
श्चगुणक्षोभेणाभिव्यंजकःकालः तत्त्रितयंब्रह्मरूपोहमेव ननुपृथक्प्रकृतेःशक्तित्वात् पुरुषकाल
योरवस्थारूपत्वात् १९ एवंतावत्कालत्रयेप्यव्यभिचारित्वाद्ब्रह्मैवसत्यमितिवक्तुंतस्यसृष्टिकारणत्वेना
दौसत्वमुक्तोमध्येपितस्यैवसत्त्वमुपपादयितुंप्रवाहित्वेनसत्त्वंदर्शयिष्यन्सर्गप्रवाहरूपायाःस्थितेरव
धित्वमाह सर्गइतिमहानवद्गुलः पौर्वापर्येणपितृपुत्रादिरूपेणनित्यशःअविच्छेदेनकिमर्थंप्रवर्त्तते त
दाह गुणेषुदेहेषुविविधतयासृज्यतइतिगुणविसर्गोजीवः तदर्थंतत्कृतभोगप्रयोजनः किंपर्यंतंप्रवर्त्तते या

एवंव्यवस्थायांकारणमाह सार्द्धेन त्रिलोक्यांप्राप्तानांदिसहितायांयोगादितारतम्येनयथोत्तरंमहर्लोकाद
यःमद्गतिर्वैकुंठलोकः १४ तत्रतुमद्गतिव्यतिरेकेणनरागतयश्चचलाइत्याह वैराग्यार्थं मयाकालेशक्तिना
धात्रापरमेश्वरेणकर्मफलप्रदेनहेतुभूतेनगुणप्रवाहेसंसारेउन्मज्जति आसत्यलोकमुन्नमागतीःप्राप्नो
ति पुनर्निमज्जति आस्थावरंनीचागतीःप्राप्नोति १५ सृष्टिनिरूपणस्याद्वितीयात्मप्रतिपत्यर्थत्वात्तत्प्रवृत्तिपाद्

त्रिलोक्यांगतयःसर्वाःकर्मणांत्रिगुणात्मनां योगस्यतपसश्चैवन्यासस्यगतयोमलाः महर्जे
नस्तपःसत्यंभक्तियोगस्यमद्गतिः १४ मयाकालात्मनाधात्राकर्मयुक्तमिदंजगत् गुण
प्रवाहएतस्मिन्नुन्मज्जतिनिमज्जति १५ अणुर्बृहत्कृशःस्थूलोयोयोभावःप्रसिध्यति सर्वो
प्युभयसंयुक्तःप्रकृत्यापुरुषेणच १६ यस्तुयस्यादिरंतश्चसवैमध्यंचतस्यसन् विकारोव्यव
हारार्थोयथातैजसपार्थिवाः १७

नायकारणेनकार्यस्यव्याप्तिमाह अणुरिति उभयेनसंयुक्तोव्याप्तः तदेवाहप्रकृत्येति १६ इदानींकार्यस्यकारण
मात्रतांदर्शयति यस्यकार्यस्यादिःकारणं अंतःलयस्थानंचतस्यमध्यं मध्यमावस्थापिसएव वैप्रसिद्धं मन्तव
लोदिषु अतएवाव्यभिचारित्वात्सएवसन्नेतरः अलंतर्हिमिथ्याभूतेन [illegible] कार्यसृष्ट्या तत्राह विकारइति
तैजसाःकटककुंडलादयः पार्थिवाघटशरावादयश्चयथेति १७ ॥ रामराम ॥ ऽऽ ॥ राम ॥ ऽऽ

भा० ए०
१३०

वायुश्च कालप्रेरितेनांबरेण ग्रस्तः स्पर्शमात्रः सन् तस्मिन् अंबरं च भूतादिना अहंकारेण ग्रस्यमानं शब्दतन्मात्रे तद्दे
वं तामसाहंकारकार्य्यस्य शब्दपर्य्यंतं लयमुक्त्वा राजसाहंकारकार्य्यस्याप्याह इंद्रियाणि स्वयंतिष्ठंति स्वप्रवर्त्तके
देवतासु तेषां प्रवर्त्तिस्वभावत्वात् प्रवृत्तेश्च देवताधीनत्वात् तास्तु लय इति वाच्यो युक्तिः वस्तुतस्तु स्वकारणे राजसा
ऽहंकार एव लयोऽभिप्रेतः २४ योनिरित्युद्देश्यगतत्वादेकत्वमविवक्षितं योनयो देवतास्तु मनसि कुतः ईश्वरे निय
तरि मनो वशेऽन्ये ह्यभवन्नस्मदेवा इत्युक्तत्वादिंद्रिययोनय एवाप्यभिप्रायः मनश्च देवताभिः सह वैकारिकेऽहं

रूपं वायौ स च स्पर्शो लीयते सोऽपि चांबरे अंबरं शब्दतन्मात्र इंद्रियाणि स्वयोनिषु २४ योनि
वैकारिके सौम्य लीयते मनसीश्वरे शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः २५ स ली
यते महान् स्वेषु गुणेषु गुणवत्तमः तेऽव्यक्ते संप्रलीयंते तत्काले लीयतेऽव्यये २६ ॥ ५

कारे इत्यर्थः तामसाहंकारकार्य्यावशेषितस्य शब्दस्य लयमाह शब्दो भूतादिं तामसाहंकारमप्येति तस्मिंल्लीयत
इत्यर्थः भूतादिरित्युपलक्षणं त्रिविधोप्यहंकारो महति जडांशं विहाय ज्ञानक्रियाशक्तिमात्ररूपो भवति क
थंभूतः प्रभुः समर्थः सर्वजगन्मोहकत्वात् २५ स च महान् स्वकारणेषु गुणेषु ज्ञानक्रियाशक्तिमत्वाद्गुणवत्त
मः तादृग्भावं विहाय गुणमात्ररूपो भवति ते गुणा अव्यक्ते प्रकृतौ साम्यावस्थां गच्छंतीत्यर्थः तदव्यक्तं काले
कालाधीनत्वात्तेनैकीभूयावतिष्ठते अव्ययेऽपरतंत्रत्वात् २६

प्रलयंनिरूपयति विराटब्रह्मांडमयाकालात्मनाव्याप्यमानः लोकानामहरहः कल्याःसृष्टिप्रलयाःविविधाः
कल्पंतेयस्मिन्नतान्वास्वेस्मिन्विकल्पयतीतितथा सतथाभूतोपिपंचत्वरूपायविशेषायविभागायकल्पतेयो
ग्योभवति पंचानांभूतानामैक्यरूपस्तेषांपृथग्भावापत्त्यानश्यतीत्यर्थः २१ तत्रतस्माद्वाएतस्मादात्मनःआ
काशःसंभूतः आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यःपृथिवीपृथिव्याऔषधयः औषधिभ्योऽन्नमन्नात्पुरुष

विराण्मयाव्याप्यमानोलोककल्पविकल्पकः पंचत्वायविशेषायकल्पतेभुवनैःसह २१
अन्नेप्रलीयतेमर्त्यमन्नंधानासुलीयते धानाभूमौप्रलीयंतेभूमिर्गंधेप्रलीयते २२ अप्सु
प्रलीयतेगंधआपश्वस्वगुणेरसे लीयतेज्योतिषिरसोज्योतीरूपेप्रलीयते २३ ॥ ऽऽ॥

इतिश्रुत्युक्तसृष्टिक्रमप्रातिलोम्येनप्रलयमाह अन्नइति मर्त्यंशरीरंयेनोपचितंतस्मिन्नन्नेशतवर्षीयामनावृ
ष्ट्यांक्षीणेसतितदन्नेवलीयत इत्यर्थः अन्नंधानासुबीजमात्रावशेषंभवतीत्यर्थः धान्यभूमौउप्तानप्ररोहंतीत्य
र्थः भूमिर्गंधेसंवर्तकादित्यप्रशोषितासंकर्षणमुखाग्निनादग्धाचसतीभूतत्सूक्ष्मरूपगंधमात्रावशेषाभवति २२
अप्सुगंधःशतवर्षधाराभ्यासाप्लाव्यमानोऽप्सुलीयते एवमेवापश्वज्योतिषाशोष्यमाणारसमात्रावशेषाभवंति ततो
रसोऽपितस्मिंल्लीयते ज्योतिश्ववायुनाभिभूयमानंरूपमात्रंतस्मिंल्लीयते २३ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ॥

भा० ए० पंचविंशे स्वनैर्गुणप्रतिपत्त्यै निरूप्यते चित्रप्रभवसत्त्वादिगुणवृत्तिरनेकधा प्रकृतिपुरुषविवेकज्ञानवतोऽपि
१३१ यावत्प्रयत्नविशेषेण गुणत्रयवृत्तिजयो न स्यान्न तावद्दुःखोपरमः अतस्तज्जयोपायकथनाय गुणवृत्तिनिरूपणा
र्थमाह गुणानामिति सह मिश्रीभूय वर्त्तमानाः समिश्राः न समिश्राः असमिश्राः तेषां विभक्तानां गुणानां मध्ये
येन गुणेन यथा यादृशो भवेत्तदिदं कथयतो मत्तो निबोध इत्यर्थः १ तत्र सत्त्ववृत्तीराह शमइति ईक्षा विवे

श्री ग उ च गुणानामसमिश्राणां पुमान्येन यथा भवेत् तन्मे पुरुषवर्येदमुपधारय शं
सतः १ शमो दमस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनि सवा 2
र्वृतिः २ कामईहा मदस्तृष्णा स्तंभ आशीर्भिदा सुखं मदोत्साहो यशःप्रीतिर्हास्यं वीर्यं ब
लोद्यमः ३

कः तपः स्वधर्मवर्त्तित्वं स्मृतिः पूर्वापरानुसंधानं तुष्टिर्यथालाभसंतोषः त्यागो व्ययशी
लत्वं अस्पृहा वैराग्यं श्रद्धा आस्तिक्यं ह्रीः अनुचिते कर्मणि लज्जा दयादानं दया दानमिति च्छेदः स्मृतिस्म
रणात् आदिशब्देनार्जवविनयादि स्वनिर्वृतिः आत्मरतिः २ रजसो वृत्तीराह कामोऽभिलाषः ईहा व्यापारः
मदो दर्पः तस्मा लाभे सत्यपि असंतोषः स्तंभो गर्वः आशीः धनाद्यभिलाषेण देवतादिप्रार्थनं भिदा अहं
मन्यइति भेदबुद्धिः सुखं विषयभोगः मदोत्साहो मदोत्साहो मदेन युद्धाद्यभिनिवेशः यशःप्रीतिः स्तुतिः
प्रियता हास्यमुपहासः वीर्यं प्रभावाविष्कारः बलेनोद्यमः न्यायेनोद्यमः सात्त्विक एव ३ ॥ ऽऽ ॥ १३१

मायामये मायाप्रवर्त्तके ज्ञानमये वा अतएव जीवयतीति जीवस्तस्मिन्महापुरुषे अयंभावः विश्वसृष्टुर्महा
पुरुषस्योपकरणरूपः कालो वृत्यंशेन सज्ज्यश्च अतस्तदात्मनावतिष्ठत इतितदुक्तं सप्तमे कालंचरंतंसृजतीश
आश्रयंप्रधानपुंभ्यांनरदेवसत्यमिदिति दशमेच योयंकालस्तस्य तेव्यक्तबंधोचेष्टामाहुश्चेष्टतेयेनविश्वं नि
मेषादिर्वत्सरांतोमहीयांस्तं त्वेशानंक्षेमधामप्रपद्ये इति जीव आत्मनि प्रकृतेर्लीनत्वेन प्रतियोग्यभावात् परिपू

व१ कालो मायामये जीवे जीवआत्मनि सम्मतः आत्माकेवल आत्मस्थो विकल्पापायलक्षणः २७
एवमन्वीक्षमाणस्य कथंवैकल्पिकोभ्रमः मनसोहृदितिष्ठेत व्योम्नीवार्कोदयेतमः २८ ए
षस्तोरव्य विधिः प्रोक्तः संशयग्रंथिभेदनः प्रतिलोमानुलोमाभ्यां परावरदृशा मया २९ इ
श्रीम ग ते हा ए ए व स्कंधे ग द्व व वा सो यो अ विं ति मो यः २४

रूपसद्रूपेणावतिष्ठते आत्मात्वात्मस्थ एव नान्यत्रलीयते यतःकेवलोनिरुपाधिः अत्रहेतुः विकल्पापायाभ्यां
विश्वोत्पत्तिलयाभ्यांलक्ष्यते अधिष्ठानावधित्वेन चेतितथासः २७ अस्यकथनस्यप्रस्तुतोपयोगमाह एवमि
ति मनसः कथंभेदनिमित्तोभ्रमःस्यात् जातोवा कथंहृदितिष्ठेदिति २८ उपसंहरति एषइति २९ प्रत्यक्ष
मिवयेनेदंदर्शितं तत्वमात्मनः सांख्यप्रख्यानतस्तस्मैहरयेगुरवेनमः इ श्री का शे द्व शः २४

भा० ए० धर्मनिष्ठायामेव सन्निपातं दर्शयति प्रवृत्तिलक्षणे का स्वधर्मे यदा पुंसो निष्ठा भवति तथा पुमान् यदा गृहाश्रम
१३२ एवासक्तस्तिष्ठेत अनुपश्चात्स्वधर्मे च नित्यनैमित्तिके तिष्ठेत्सापि समितिः सन्निपातः हि यस्मात्कामस्य धर्मो गृहाश्र
मि स्वधर्मो रजस्तमः सत्वमयाः इत्यर्थः ५ तदेवमिश्राभिर्गुणवृत्तीः प्रदर्श्य तैर्पुमानयं तया भवेदिति युक्तम्
तद्दर्शयति पुरुषमिति त्रिभिः ६ ७ हिंसाशत्रुमरणादिकामाशास्य यो भजेत्तं तामसं विद्यात् एतैर्गुणैर्बंधो भवति

प्रवृत्तिलक्षणे निष्ठा पुमान्यर्हि गृहाश्रमे स्वधर्मे चानुतिष्ठेत गुणानां समितिर्हि सा ५ पुरुषं
सत्वसंयुक्तमनुमेयाच्छमादिभिः कामादिभी रजोयुक्तं क्रोधाद्यैस्तमसायुतं ६ यदा भजति मां
भक्त्या निरपेक्षः स्वकर्मभिः तं सत्वप्रकृतिं विद्यात्पुरुषं स्त्रियमेव च ७ यदा आशिष आशा
स्य मां भजेत स्वकर्मभिः तं रजःप्रकृतिं विद्याद्धिंसामाशास्य तामसं ८ सत्वं रजस्तम इति गु
यै १ णा जीवस्य नैव मे चित्तजा यैस्तु भूतानां सज्जमानो निबध्यते ९

इति तात्पर्यार्थः ८ ननु तवापि गुणवशेन कर्तृत्वाविशेषात्केन विशेषेण त्वं सेव्यो जीवस्त्वं सेवक इति नियमः
यतो मां भजेतेति वारंवारमुच्यते तत्राह सत्वमिति जीवस्यैव न मे कुतः यतश्चित्तजाः जीवोपाधौ चित्ते तैर्निबध्यं
ते अतो यैः स एव बध्यते कीदृशः भूतानां देहरूपाणामन्येषां च मध्ये सज्जमानः अहंत्वेन सज्जमानः गुणानि
यंतृत्वेन सृष्ट्यादिकर्तापि नित्यमुक्तः अतो महान् विशेष इति भावः यद्वा भूतानामपंचीकृतानां यत्कार्यं भू
तं चित्तं अन्नमयं हि सौम्य मन इति श्रुतेः तत्प्रभावः अतो भूतैः प्राहितस्य जीवस्यैवेति अन्यत्समानम् ९ ५ १३२

तमसोदृ ग्नीराह क्रोधइति लोभोव्ययःपराङ्मुखता अनृतंशास्त्रीयप्रमाणं हिंसादिद्रोहं याञ्चाप्रार्थ
दंभोधर्मध्वजित्वं क्लमःश्रमः कलिःकलहः शोकमोहौ अनुशोचनंभ्रमश्च विषादोदैन्यदुःखदैन्यं च निद्रा
आशाइदंमेभविष्यतीत्यपेक्षाःभीःभयं अतुष्टमोज्ञाद्यं ३ अनुपूर्वेशः क्रमेणैताः श्लोकत्रयोक्ताः वृत्तिः
प्रायाअन्याअप्यूह्याइतिभावः २ विभक्तानांगुणानांच त्रयोवर्णिताः मिश्राणामाह सन्निपातइतित्रिभिः अ

क्रोधोलोभोऽनृतंहिंसायाञ्चादंभःक्लमःकलिः शोकमोहौविषादार्तीनिद्राशाभिरनुत्तमः ३ सत्व
स्यरजसश्चैतास्तमसश्चानुपूर्वशः वृत्तयोवर्णितप्रायाःसन्निपातमथोशृणु २ सन्निपातस्त्वह
मितिममेत्युद्धवयामतिः व्यवहारःसन्निपातोमनोमात्रेंद्रियासुभिः ३ धर्मेचार्थेचकामेच
यदासौपरिनिष्ठितः गुणानांसंनिकर्षोयंश्रद्धारतिधनावहः ४ ॥

हंममेतिचमताबुक्तसर्ववृत्तिसामानाधिकरण्यदर्शनात्सन्निपातजत्वं अहंशांतःकामीक्रोधीत्यादितथाममशां
तिरस्तिकामःक्रोधइत्यादिद्रष्टव्यं तत्पूर्वकःसर्वोव्यवहारश्चसन्निपातकार्यमित्याह व्यवहारइति अत्रहेतुःमन
आमात्राणिच असवश्चतैःमनआदीनांसात्विकत्तामसराजसत्वात्तैर्व्यवहारःसन्निपातजइतिभावः ३ असौपुरु
षोयदाधर्मादिषुपरिनिष्ठितोभवति तदाऽयंत्रिषुनिष्ठारूपःसन्निकर्षःसन्निपातकार्यं धर्मादीनांसत्व
तमोरजःकार्यत्वात् विषयतःसन्निपातजत्वमुक्तं फलतश्चतथात्वमाह श्रद्धेति धनानिसत्वरजस्त

 यदा पुनः क्रियया विकुर्वन् विकारं प्राप्नुवन् अधीर्भवति असमंताद्विहिता धीर्यस्य सः चेतसां बुद्धीन्द्रियाणा
 मनिवृत्तिः गात्राणि कर्मेन्द्रियाणि तेषामस्वास्थ्यं विकाराधिक्यं मनो भ्रांतं चंचलं रजउत्कटं निशामय जानीहि १४
यदा सीदत् तिरोभवत् चेतसो ग्रहणे चिदाकारपरिणामे अक्षमं सच्चित्तं विलीयेत मनोपि संकल्पात्मकं नष्टं ली
नं ततो ऽज्ञानं ग्लानिर्विषादश्च भवति तत्तदा तमउत्कटमुपधारय विद्धि १५ किंच एधमान इति इंद्रियाण्येव नि

विकुर्वन्क्रियया चाधीरनिवृत्तिश्च चेतसां गात्रास्वास्थ्यं मनोभ्रांतं रजएतैर्निशामय १४ सी
दच्चित्तं विलीयेत चेतसो ग्रहणेक्षमं मनोनष्टं तमो ग्लानिस्तमस्तदुपधारय १५ एधमाने
गुणे सत्वे देवानां बलमेधते असुराणां च रजसि तमस्युद्धव रक्षसां १६ सत्वाज्जागरणं विद्या
द्रजसा स्वप्नमादिशेत् प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततं १७ उपर्युपरि गच्छंति सत्वेन
ब्रह्मणा जनाः तमसाधोध आमुख्याद्रजसांतरचारिणः ॥१८॥

इति प्रवृत्तिमोहस्वभावानि देवासुर
रक्षांसि यद्वा प्रसंगाद्वादिदैविकानां गुणानामुत्कर्षो कार्याण्युक्तानीति ज्ञेयं १६ गुणोत्कर्षतो ऽवस्थाभेदं दर्श
यति सत्वादिति प्रसंगान्निर्गुणावस्थामाह तुरीयं चतुर्थमवस्थांतरं नाम त्रिषु जागरणादिषु संततं एकरूपमात्म
तत्वमेवेत्यर्थः १७ गुणोत्कर्षद्वारेण तत्तत्कर्मफलनिष्ठां दर्शयति उपर्युपरीति ब्रह्मणा वेदार्थानुष्ठानाभियुक्ताः आ
ब्रह्मण इति पाठे ब्रह्मलोकमभिव्याप्येत्यर्थः आमुख्यात् स्थावरानभिव्याप्य अंतरचारिणः मनुष्या भवंति १८

तदेव मिश्रा मिश्रगुणकार्याणि प्रदर्श्येदानीमेकैकगुणोद्रेककार्याणि दर्शयति सप्तदशभिः यदेतरौ गुणौ जयेदभि
भवेत् भास्वरं प्रकाशकं विशदं स्वच्छं शिवं शांतं शिवत्वविशदत्वभास्वरत्वानां यथाक्रमं पुरुत्वधर्मज्ञानहेतुत्वात्
तैर्युज्येत आदिशब्दाच्छमदमादिभिश्च १० तमःसत्वं कर्माभिभूतं रजः कर्त्तृसंगसंगहेतुः भिदा भेदहेतुः चलं
प्रवृत्तिस्वभावं अतः संगहेतुत्वाद्यशसा श्रियाच युज्येत तत्तत्कामः पुमान्भवतीत्यर्थः भिदाहेतुत्वा दुःखेन युज्ये

यदेतरौ जयेत्सत्त्वं भास्वरं विशदं शिवं तदा सुखेन युज्येत धर्मज्ञानादिभिः पुमान् १० यदा
जयेत्तमः सत्वं रजः संगं भिदा चलं तदा दुःखेन युज्येत कर्मणा यशसा श्रिया ११ यदा ज
येद्रजः सत्वं तमो मूढं लयं जडं युज्येत शोकमोहाभ्यां निद्रया हिंसयाऽऽशया १२ यदा चि
त्तं प्रसीदेत इंद्रियाणां च निर्वृतिः देहाभयं मनोसंगं तत्सत्त्वं विद्धि मत्पदं १३

त द्वितीयाद्वै भयं भवतीति श्रुतेः प्रचलत्वात्कर्मणा च युज्येत (तत्तत्कामः पुमान्भवे) ११ यदा रजः सत्वं च कर्म
भूतं तमः कर्त्तृ जयेत मूढं विवेकभ्रंशकं लयं आवरणात्मकं जडमबुद्धमात्मकं अतो मूढत्वाच्छोकमोहौ हिं
साभिलयत्वान्निद्रया जडत्वाद्दुष्टमाभावेन केवलमाशया युज्येतेति द्रष्टव्यं मनइति पाविन्नयात्मकत्वमेव
निद्राशयोर्हेतुः १२ किंच यदा चित्तं प्रसीदेत स्वच्छं भवेत् निर्वृत्तिरुपरतिः तत्तदा मत्पदं मदुपलब्धिस्थानं स

अधर्मेऽधर्मे इतिया श्रद्धा २४ पथ्यं हितं पूतं शुद्धं अनायस्तं अनायासेन प्राप्तं आहार्यं भक्ष्यभोज्यादि
भा० ए० इन्द्रियाणां प्रेष्ठं कट्वम्ललवणादि आर्तिदाऽशुचि दैन्यकरमशुद्धं च चशब्दान्निवेदितं निर्गुणमित्य
१३४ भिप्रेतं २५ आत्मो[illegible]त्थं सुखं मदपाश्रयं मन्निष्ठमपि त्वेतत्परार्थविषयेन ज्ञानवदेव द्रष्टव्यं २६ उक्तं
संसारहेतुभूतं त्रैगुण्यमुपसंहरति द्वाभ्यां द्रव्यं पथ्यपूतादि देशो वनग्रामादिः फलं सात्त्विकं सुख

सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गु
णा २४ पथ्यं पूतमनायस्तमाहार्यं सात्त्विकं स्मृतं राजसं चेन्द्रियप्रेष्ठं तामसं चार्तिदाऽशु
चि २५ सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसं तामसं मोहदैन्योत्थं निर्गुणं मदपाश्र
यं २६ द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः श्रद्धाऽवस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि

मित्यादि कालः यदा भजेत मां भक्त्या यदेतरो जयेत्तत्सत्त्वमित्यादिना [illegible] योऽथादुष्टं
ज्ञानं कैवल्यं सात्त्विकं ज्ञानमित्यादि कर्म मदर्पणमित्यादि कारकः सात्त्विकः कारकोऽसंगीत्यादिः श्र
द्धा सात्त्विक्याध्यात्मिकीत्यादिः अवस्था सत्त्वाज्जागरणं विद्यादित्यादिः आकृतिः उपर्युपरि गच्छन्ति इ
त्यादिना [illegible] देवतादिरूपा निष्ठा सत्त्वे प्रलीनाः स्वर्यान्तीत्यादिनोक्तः स्वर्गादिः एवं स[illegible]विपर्ययं भावः

देहाद्युत्क्रांतिकालिकगुणोत्कर्षफलमाह सत्वे इति प्रलीनाः मृताः रजोलयाः रजसि प्रवृद्धे सति लयो येषां ते एवं तमोलया इति अपि निर्गुणा इत्यत्र तुल्ययशा श्रवणादानाज्जीवतोपि निर्गुणाः मामेव यांतीत्यर्थः १९ इदानीं गुणोत्कर्षहेतूनेव तत्तत्फलसाधनकर्मत्रैविध्यमाह मदर्पणं मत्प्रीत्युद्देशेन कृतं निष्फलं दास्यभावेनैव कृतं यन्निजं कर्मेत्यादि तत्सात्विकं फलं संकल्प्यते यस्मिन् तत् हिंसाप्रायं हिंसोद्देशेन कृतं हिंसाबहुलं

सत्वे प्रलीनाः स्वर्यांति नरलोकं रजोलयाः तमोलयास्तु निरयं यांति मामेव निर्गुणाः १९ मदर्पणं निष्फलं वा सात्विकं निजकर्म तत् राजसं फलसंकल्पं हिंसाप्रायादि तामसं २० कैवल्यं सात्विकं ज्ञानं रजो वैकल्पिकं तु यत् प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतं २१ वनं तु सात्विको वासो ग्रामो राजस उच्यते तामसं द्यूतसदनं मन्निकेतं तु निर्गुणं २२ सात्विकः कारकोऽसंगी रागांधो राजसः स्मृतः तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः २३

आदिशब्दाद्दंभमात्सर्यादिकृतं २० इदानीं सगुणनिर्गुणभेदेन ज्ञानादीनां चातुर्विध्यमाह कैवल्यं देहादिव्यतिरिक्तात्मविषयं वैकल्पिकं देहादिविषयं यत्तत् रजः राजसं प्राकृतं बालमूकादिज्ञानतुल्यं मन्निष्ठं परमेश्वरविषयं २१ वने विविक्तत्वात्सात्विको वासः भगवन्निकेतनं तु साक्षात्तदाविर्भावान्निर्गुणं स्यात् २२ कारकः कर्ता असंगी अनासक्तः रागांधः अत्यभिनिवेशवान् स्मृतिविभ्रष्टोऽनुसंधानशून्यः मदपाश्रयो मदेकशरणः सद्भिनिर

भा० ए० एवं च सति मां प्राप्नोतीत्याह संपद्यत इति जीवं जीवत्वकारणं लिंगशरीरं ३२ मां प्राप्तस्य न पुनः संसार इत्याह
१३५ जीव इ नैव बहिः विषयभोगेन नांतरः तत्स्मरणेन गुणकृतो न तु संसरणव्यथामजितपुण्यकथनादिभिः पु
नुत्तमभक्तिरसेन विवेकिनो न हि पुनः सत्तु भजेज्जहुरीदृश ३४ इ श्री को शे च शः २५ पृष्ठंशे योगति
ष्ठायाविघातो दुष्टसंगत साधुसंगेन तन्निष्ठापराकाष्ठेति वर्ण्यते योगिनो योगविभ्रंशः सगतः संभवेदि

संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय मां ३२ जीवो जीवेन निर्मुक्तो गुणैश्चाशयसंभवैः म
यैव ब्रह्मणा पूर्णो न वहिर्नांतरश्चरेत् ३६ ॥ इति श्रीमद्भागवते महापुराणे एकादशस्कंधे श्री
भगवदुद्धवसंवादे गुणवर्णनं पंचविंशोध्यायः ॥ २५ ॥ श्रीभगवानुवाच ॥ मल्लक्षणमि
मं कायं लब्ध्वा मद्धर्म आस्थितः आनंदं परमात्मानमात्मस्थं समुपैति मां ॥ १ ॥

मं० १ ति सर्वध्यातन्निरतात्पर्थमैलगीतं वितन्यते निःसंगो मां भजेद्विद्वान् प्रमत्तो जितेंद्रिय इत्युक्तं तत्र विपक्षेऽ
नर्थकथपि घान्जीवन्मुक्तस्यापि तर्हि संगोद्वीर इत्यनर्थः स्यादित्याशंक्योक्तानुवाद एवं केपरिह
रतिसाद्भ्यां मल्लक्षणमस्य रूपं लक्ष्यते येन तमिमं नरदेहं लब्ध्वा मद्धर्मे भक्तिलक्षणे आस्थितः सन्
आत्मस्थं आत्मन्येव निर्बाहरत्वेन स्थितं परमानंदरूपमात्मानं मां समुपैति सम्यक् प्राप्नोति १ ॥ ऽऽ १३५

नकेवलमेषएवकिंतुयावंतः पुरुषाव्यक्तयोधिष्ठिता अधिष्ठिताः तेसर्वेभावागुणमयाएव तत्रप्रपंचः दृष्ट
मिति २८ इदानींमुक्तंत्रैगुण्यस्यसंसारहेतुत्वमनुवदंस्तज्जयान्मोक्षइत्याह एताइतिसार्द्धेनयेननिर्जि
तःसपश्चाद्विक्षेपेणभक्तियोगेनमन्निष्ठःसन्मद्भावायमोक्षायप्रपद्यते योग्योभवति २८ तस्माद्विवेकि

सर्वेगुणमयाभावाःपुरुषाव्यक्तधिष्ठिताः दृष्टंश्रुतमनुध्यातंबुद्ध्यावापुरुषर्षभ २८ एताः
संसृतयःपुंसोगुणकर्मनिबंधनाः येनेमेनिर्जिताःसौम्यगुणाजीवेनचित्तजाः भक्तियोगे
नमन्निष्ठोमद्भावायप्रपद्यते २९ तस्माद्देहमिमंलब्ध्वाज्ञानविज्ञानसंभवं गुणसंगंवि
निर्धूयमांभजंतुविचक्षणाः ३० निःसंगोमांभजेद्विद्वानप्रमत्तोजितेंद्रियः ३१ रजस्तम
श्चाभिजयेत्सत्वसंसेवयामुनिः सत्वंचाभिजयेद्युक्तोनैरपेक्ष्येणशांतधीः ३२

नामिदमेवयुक्तमित्याह तस्मादिति ज्ञानविज्ञानयोःसंभवोयस्मिन् तमिमंनरदेहं ३० भजनप्रकार
माह निःसंगइतिसार्द्धेन ३१ सत्वसंसेवयासात्विकान्येवसेवेतपुमान् सत्वेविवृद्धेइतिप्रागु
क्तयानैरपेक्ष्येण उपशमात्मकेनसत्वेनेव ३२ रामराम ॥ राम

भा० ए० तस्य प्राक्तनीं मोहावस्थामाह त्यक्त्वेति आत्मानं राजं त्यक्त्वा अथवा स्वयाया आत्मानं त्यक्त्वा व्रजंतीमन्वगात्
१३६ घोरे तिष्ठेति अये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवामहै नु न नौ मंत्रा अनुदितास एते मयस्करं परतरे
चनाह इत्येवं मंत्रैर्विलपन् ५ वैक्लव्यकारणमाह कामानिति वर्षाणां यामिनीः रात्रीः यांतीः अपयांतीः
हे आयामिनीः आकृष्टा चेतना यस्य सः ६ तस्य गंधर्वलोकं प्राप्तस्य बहुकालमुर्वशीसंभोगानंतरं निर्विण्णस्य

त्यक्त्वात्मानं व्रजंतीं तां नग्न उन्मत्तवन्नृपः विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः ५
कामानतृप्तोऽनुजुषन् क्षुल्लकान् वर्षयामिनीः न वेद यांतीर्नायांतीरुर्वश्याकृष्टचेतनः ६
ऐल उवाच॥ अहो मे मोहविस्तारः कामकश्मलचेतसः देव्या गृहीतकंठस्य नायुःखंडा इमे स्मृताः ७ नाहं वेदाभिनिर्मुक्तः सूर्यो वाभ्युदितोऽमुया मूषितो वर्षपूगानां बताहानि गतान्युत ८
अहो मे आत्मसंमोहो येनात्मा योषितां कृतः क्रीडामृगश्चक्रवर्ती नरदेवशिखामणिः ९ श्री १

गाथामाह अष्टादशभिः तत्राष्टभिरनुतापः प्रपंच्यते अहो इति यतो मया इमे अहोरात्ररूपा आयुःखंडा न स्मृताः
७ तदेवाह नाहमिति अभिनिर्मुक्तः मयि रममाणायामस्तंगतः अभ्युदितो वा सूर्य इति अमुया उर्वश्या वंचितः बत
खेदे ८ उत अपि वर्षपूगानामपि गतान्यहानि न वेदेति च येन संमोहेन आत्मा देहः क्रीडामृगोऽधीनः ९ ॥ ऽ १३६

नचैवंभूतस्यविषयसंगोनामास्तीत्याह गुणमय्येति गुणमयीयाजीवयोनिर्जीवोपाधिस्तयाविमुक्तः गुणेषु
वर्त्तमानोपितैर्नयुज्यते संगंनप्राप्नोति अत्रहेतुः नन्ववस्तुभिरप्यन्येयुज्यमानादृश्यंतेतत्राह अवस्तुत्वेन
नदृश्यमानेषु २ तथापिसंगंवर्ज्जयेदित्याह संगमिति असतांलक्षणमाह शिश्नोदरंतर्प्पयंतीतिशिश्नो
दरतृपस्तेषां क्वचिन्नुकदाचिदपि आस्तांतावद्दृढोनुसंगः किंतुतस्यैकस्याप्यनुगः अनुवर्त्ती अंधमनुग

गुणमय्याजीवयोन्याविमुक्तोज्ञाननिष्ठया गुणेषुमायामात्रेषुदृश्यमानेष्ववस्तुतः वर्त्त
मानोपिनपुमान्युज्यतेऽवस्तुभिर्गुणैः २ संगंनकुर्यादसतांशिश्नोदरतृपांक्वचित् तस्यानु
गस्तमस्यंधेपतत्यंधानुगांधवत् ३ ऐलःसम्राडिमांगाथामगायतबृहच्छ्रवाः उर्वशी
विरहान्मुह्यन्निर्विण्णःशोकसंयमे ४

च्छतियोऽन्यस्तद्वत् ३ अत्रेतिहासमाह ऐलःपुरूरवाः
सम्राट् चक्रवर्त्ती बृहच्छ्रवोयशोयस्यसः उर्वशीविरहात्प्रथमंमुह्यन् पश्चात्कुरुक्षेत्रेतांसमा
गम्यगंधर्वदत्तेनाग्निनादेवानिष्ट्वापुनरुर्वशीलोकंप्राप्य शोकसंयमेशोकापगमेसतितोनिर्वि
ण्णःसन्निमांगाथामगायतेतिनवमस्कंधानुसारेणद्रष्टव्यम् ४ ॥ रामरामरामरामराम ॥

भा० ए० एवमष्टभिर्निर्वेदोनिरूपितः इदानींतस्यविवेकमाह दशभिः पुंश्चल्येति अयंभावः कर्मभिर्दैवातिष्ठाद्दुः
१३७ खमेवप्राप्नोस्मि अतःपरमेश्वरमेवभजेयमिति १५ परमेश्वरप्रसादंविनादेव्युपदिष्टादपिविवेकान्मो
होननिवर्त्ततइत्याह बोधितस्यापीति देव्याउर्वश्यासूक्तवाक्येनयथार्थवचनेन पुरूरवोमामृथामाप्रतप्था
मात्वावृकामोऽसिवासस्तुत्तेन नवैस्त्रैणानिसख्यानिसंतिशालावृकाणांहृदयान्येताइत्यनेन १६ एवंपुं

पुंश्चल्यापहृतंचित्तंकोन्वन्योमोचितुंप्रभुः आत्मारामेश्वरमृतेभगवंतमधोक्षजं १५ बो
धितस्यापिदेव्यामेसूक्तवाक्येनदुर्मतेः मनोगतोमहामोहोनापयात्यजितात्मनः १६ कि
मेतयानोपकृतंरज्ज्वावासर्पचेतसः रज्जुस्वरूपाविदुषोयोहंयदजितेंद्रियः १७ क्वायं
मलिमसःकायोदौर्गंध्याद्यात्मकोऽशुचिः क्वगुणाःसौमनस्याद्याह्यध्यासोऽविद्ययाकृतः

श्चल्यापहृतंचित्तमित्यादिनातस्यापकारोनुस्मृतः इदानींममैवायमपराधइत्याह किमेतयेति १८
नोऽस्माकंकामिनांएतयाकिमपकृतं नकिंचिदपि यथारज्जुस्वरूपाविदुषोरज्जुद्रष्टुःपुंसस्तस्यासर्पकल्पन
याविद्यमानस्यापिरज्ज्वाकिमपिनापकृतंतद्वत् यद्यस्माद्योऽहमेवंभूतःसएवाजितेंद्रियत्वादपराधीत्यर्थः
१७ ननुतथापिसेवसौगंध्यप्रेमादिगुणैःसंमोहकत्वमित्याशंक्यतेपिस्वपरिकल्पिताएवेत्याह चतुर्भिः क्वा
यमिति मलीमसः अतिमलिनः सुमनसांकुसुमानामिवसौकुमार्यादि सौमनस्यं सौमनमनोभावोवा १८ ॥ १३७

ननु प्रणयकुपितायाश्चानुनयार्थमधीनतापुक्तैव सत्यं नत्वत्र तदस्तीत्याह सपरिच्छदं शय्यादिसहित
मीश्वरं चक्रवर्तिनं तृणमिव त्यक्त्वा यांती अन्वगमं अनुगतोऽस्मि १० किंच मम प्रभावो ह्यभिमानो वृथैवेत्या
ह कुतस्तस्य मे तेजो बलं खरी यथा पादताडितोपि खरीमनुगच्छति तद्वत् ११ एवंभूतस्य सर्वसाधनं व्यर्थ

सपरिच्छदमात्मानं हित्वा तृणमिवेश्वरं यांतीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन् १० कु
तस्तस्यानुभावः स्यात्तेज ईशत्वमेव वा योऽन्वगच्छं स्त्रियं यांतीं खरवत्पादताडितः ११
किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतं १२
स्वार्थस्याकोविदं धिङ्मां मूर्खं पंडितमानिनं योऽहमीश्वरतां प्राप्य स्त्रीभिर्गोखरवज्जितः
१३ सेवतो वर्षपूगान्मे उर्वश्या अधरासवं न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा १४

मित्याह किमिति त्यागेन सन्यासेन विविक्तेन एकांतसेवया मौनेन वाङ्नियमेन १२ अनुतप्तः स
न्नात्मानं निंदति द्वाभ्याम् स्वार्थस्येति अकोविदमज्ञातारं गोखरवत् गौरिव खर इवेति १३॥
अधरामृतं सेवमानस्य आत्मभूः पुनर्वृद्धवत् १४ ॥

भा० ए० ननु क्वचिन्निमीलितनयनादेरपि मनःक्षोभो दृश्यते सत्यं सोऽपि पूर्वदर्शनादिकं विना न भवतीत्याह अदृ
१३८ ष्टादिति भावात्पदार्थाद्भावो मनःक्षोभः अतः प्राणान् इंद्रियाणि असंयुतः नियच्छतः स्तिमितं निश्च
लसत् २३ इंद्रियैः कृत्वा अविस्रब्धोऽविश्वसनीयः मादृशामविवेकिनां २४ फलितमाह द्वाभ्यां एवमिति

अदृष्टादश्रुताद्भावान्न भाव उपजायते असंप्रयुंजतः प्राणान् शाम्यति स्तिमितं मनः २२ तस्मा
त्संगो न कर्तव्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः विदुषा चाप्यविस्रब्धः षड्वर्गः किमु मादृशां २४ श्रीभगवानु
वाच एवं प्रगायन्नृपदेवदेवः स उर्वशीलोकमथो विहाय आत्मानमात्मन्यवगम्य मां वै उ
पारमज्ज्ञानविधूतमोहः २५ ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान् संत एतस्य छिंदंति
मनोव्यासंगमुक्तिभिः २६ संतोऽनपेक्षा मच्चित्ताः प्रशांताः समदर्शिनः निर्ममा निरहंकारा नि
र्द्वंद्वा निष्परिग्रहाः २७ तेषु नित्यं महाभाग महाभागेषु मत्कथाः संभवंति ता हि नृणां जुषतां प्रपु
नंत्यघं २८

नपेषु देवेषु च दीव्यतीति तथा २५ उक्तिभिर्हितोपदेशैरिति तीर्थदेवतादिसंगादपि सत्सं
गः श्रेयानिति द्योतयति २६ सतां लक्षणमाह संत इति विशेषणाष्टकस्य यथेष्टं हेतुहेतुमद्भावः २७ न च तेषू
पदेशापेक्षापि केवलं तत्संनिधिरेव तारयतीत्याह तेष्विति सप्तभिः २८ रामराम रामराम रामराम

ममत्वमपितस्मिन्परिकल्पितमेवेत्याह पित्रोः किंस्वं कायःजनकत्वात् नुवितर्के भार्य्यायावा भोगप्रदत्वात् अत्रानुप
युक्तमप्येतन्न्यायतुल्यत्वादुक्तं स्वामिनोवा अधीनत्वात् अग्नेर्वाअन्तेघ्रात दाहकृतित्वात् स्वगृध्रयोर्वा भक्ष्यत्वा
त् किंवात्मनः तत्कृतशुभाशुभभागित्वात् सुहृदांवा उपकारित्वात् एवंयोननिश्चीयते १९ तुच्छाकृमिविड्भस्म
ल्तत्रयणनिष्ठा अन्तोयस्य तस्मिन्कलेवरे काये प्रियत्वेनगृहीत्वविषंगमेवाह अहोइति सुनसंशोभननासिकं

पित्रोः किंस्वंनुभार्य्यायाः स्वामिनोग्नेः श्वगृध्रयोः किमात्मनः किंसुहृदामितियोनाऽवसीय
ते. १९ तस्मिन्कलेवरेमेध्येतुच्छनिष्ठेविसज्जते अहोसुभद्रंसुनसंसुस्मितंचमुखंस्त्रियाः २० त्व म२
ङ्मांसरुधिरस्नायुमेदोमज्जास्तिसंहतौ विण्मूत्रपूयेरमतांकृमीणांकियदंतरं २१ अथापि
नोपसज्जेतस्त्रीषुस्त्रैणेषुचार्थवित् विषयेंद्रियसंयोगान्मनःक्षुभ्यतिनान्यदा २२

अतोगुणारोपेणरमणमाहश्लाः कृमिसमाइत्याह त्वगादिसंहतौतत्संघाते देहेविण्मूत्रादिसंहतौरम
तांकृमीणांचकियदंतरमिति २१ यद्यप्येवं वीभत्सिता एवस्त्रियः अथापिनोपसज्जेत अवेत्लोक
नादिनापिसंगंनकुर्य्यात् अर्थवित् विवेकी अत्रहेतुः विषयेति २२ रामराम ॥ राम ॥ ६६ ॥

 अध्यायार्थमुपसंहरति वैतसेन इति सुद्युम्नभावे नेमावनप्रविष्टस्य वीतासेनास्त्रीभावंप्राप्तासेनायस्यतस्यस्त्रीभा
 वंप्राप्तस्यपुत्रोवैतसेनः पुरूरवा एवमुक्तप्रकारेणोर्वश्यालोकात् स्थानात् अवलोकनाद्वा निःस्पृहः ततोपिसत्संगादपि
हेतोर्मुक्तसंगः सन्नात्मारामोभूत्वायथेष्टंचचारेति ३५ इत्येकादशेषड्विंशः २६ सप्तविंशेक्रियायोगः सद्यश्चित्त-
प्रसादकः सर्वकामाप्तिहेतुश्चसांगः प्रोक्तः समासतः रागाद्याकुलचित्तानां कुतोसंगादिसंभवः इतिहकृष्णार्च्च

वैतसेनस्ततोप्येवमुर्वश्यालोकनिस्पृहः मुक्तसंगोमहीमेतामात्मारामश्चचार ह ॥ ३५ ॥ इ
ति श्रीमद्भागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्धवसंवादे ऐलोपगीतंषड्विंशोध्यायः ॥ २६
उद्धव उवाच क्रियायोगंसमाचक्ष्व भवदाराधनंप्रभो यस्मात्त्वांयेयथार्चंतिसात्वताःसा
त्वतर्षभ ॥ १ एतद्वदंतिमुनयोमुहुर्निःश्रेयसंनृणां नारदोभगवान्व्यास आचार्योंऽगि-
रसःसुतः २

नंभद्रमनुस्मृत्यानुपृच्छति क्रियायोगइति भवदाराधनरूपं यस्मादितिकारणा
धिष्ठानादिप्रश्नः सर्वकारणानांनिमित्तत्वस्याविशिष्टत्वात् यथेति कस्मिन्नधिष्ठानादौ केनप्रकारेणेतिप्रश्नः
येऽधिकारिणः सात्वताभक्ताः १ यस्यपुनर्विशेषतः प्रश्ने कारणमाह चतुर्भिः एतत्त्वदर्चनं निःश्रेय
ऽऽ ॥ सकरंवदंवदंति अंगिरसःसुतोबृहस्पतिः २ ॥ ऽऽ ॥ ऽऽ

श्रवणादिभिरेव मत्पराः श्रद्दधानाश्च संतोभक्तिं विंदंति २९ ३० विभावसुमग्निंसेवमानस्य श्रपेत्तिनश्यति तथा
कर्मादिनाजाड्यं श्रागामि संसारभयं तन्मूलमज्ञानं च नश्यतीत्यर्थः ३१ निमज्योन्मज्जतां उच्चावचयोनीर्गच्छतां प
रमायनं परमाश्रयः ३२ किंच यथान्नमेव प्राणाज्जीवनं श्रहमेव यथाशरणं धर्म एव यथा प्रेत्य परलोके वित्तं तथा सं

ता ये शृण्वंति गायंति ह्यनुमोदंति चादृताः मत्पराः श्रद्दधानाश्च भक्तिं विंदति ते मयि २९ भ
क्तिं लब्धवतः साधोः किमन्यदवशिष्यते मय्यनंतगुणे ब्रह्मण्यानंदानुभवात्मनि ३० यथो
पश्रयमाणस्य भगवंतं विभावसुं शीतं भयं तमोप्येति साधून्संसेवतस्तथा ३१ निमज्योन्मज्ज
तां घोरे भवाब्धौ परमायनं संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जतां ३२ अन्नं हि प्राणिनां
प्राण श्रार्तानां शरणं त्वहं धर्मो वित्तं नृणां प्रेत्य संतोर्वाग्बिभ्यतोऽरणं संतो दिशंति चक्षूं
षि वहिरर्कः समुत्थितः देवता बांधवाः संतः संत श्रात्माहमेव च ३४

त एवार्वाक् संसारपातान्बिभ्यतः पुंसोऽरणं शरणम् ३३ किंच संतश्चक्षूंषि सगुणनिर्गुणज्ञानानि श्रर्कः पु
नः सम्यगुत्थितोपि वहिस्तदप्येकमेव चक्षुरित्यर्थः ३४ ॥ रामरामरामराम ॥ ss रामरामराम ॥

भा० पु०
१५०

स्नाने विशेषमाह उभयैर्वैदिकैस्तांत्रिकैश्च मंत्रैः १० किंच संध्योपासनादीनि कर्माणि आचोदितानि
साकल्येन विहितानि यस्य यानि तैः सह मे पूजां कुर्यात् न तु तानि परित्यजेदित्यर्थः सम्यक् परमेश्वर विष
य एव संकल्पो यस्य तथाभूतः सन् कर्मपावनी कर्मनिर्हारिणी ११ अर्चाभेदानाह सार्द्धेन शैली शिलामयी लो

पूर्वं स्नानं प्रकुर्वीत धौतदंतोंऽगशुद्धये उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणादिना १० संध्योपा
स्त्यादिकर्माणि वेदेनाचोदितानि मे पूजां तैः कल्पयेत्सम्यक्संकल्पः कर्मपावनी ११ शै
ली दारुमयी लौही लेप्या लेख्या च सैकती मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता १२
चलाचलेति द्विविधा प्रतिष्ठा जीवमंदिरं १३ उद्वासावाहने न स्तः स्थिरायामुद्धवार्च्चने
अस्थिरायां विकल्पः स्यात्स्थंडिले तु भवेद्द्वयं १४ स्नपनं त्वविलेप्यायामन्यत्र परिमार्ज्जनं १५

हीसुवर्णादिमयी लेप्या मृच्चंदनादिमयी हृदि पूजायां मनोमयी १२ प्रकर्षेण तिष्ठत्यस्यामिति प्रतिष्ठा प्रति
मैव जीवस्य भगवतो मंदिरं यद्वा प्रतिष्ठया कलान्यासेन भगवन्मंदिरं भवतीति १३ प्रतिमाभेदेन विषमाह
सार्द्धेन उद्वासो विसर्ज्जनं अस्थिरायामर्च्चने विकल्पः सालग्रामे न कुर्यात् सैकत्यां कुर्यात् अन्यत्र कुर्या
द्वा न वेति १४ अविलेप्यायां मृन्मय्यालेख्यव्यतिरिक्तायां अन्यत्र विलेप्यायां लेख्यायां च परिमार्ज्जनमेव १५

निःसृतं त्वयोपदिष्टमित्यर्थः देव्यै पार्वत्यै ३ सर्ववर्णानां त्रैवर्णिकानां ४ विश्वेश्वराये तेषामीश्वर ५ कर्मकां
डस्य पूजाविधानस्य नास्त्यंतो ग्रंथतः पारं चानुष्ठानतो यस्य तस्य ६ वैदिक एव मंत्रो वैदिकान्येवांगानि च यस्मि
न् पुरुषसूक्तादौ स वैदिकः एवं तांत्रिकोपि मिश्रोऽष्टाक्षरादिर्मखः पूजा ७ यदा त्रैवर्णिको यजेत तदा वि

निःसृतं ते मुखांभोजाद्यदाह भगवानजः पुत्रेभ्यो भृगुमुख्येभ्यो देव्यै च भगवान्भवः ३
एतद्वै सर्ववर्णानामाश्रमाणां च संमतं श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद ४
एतत्कमलपत्राक्ष कर्मबंधविमोचनं भक्ताय चानुरक्ताय ब्रूहि विश्वेश्वरेश्वर ५ श्री
भगवानुवाच न ह्यंतोऽनंतपारस्य कर्मकांडस्य चोद्धव संक्षिप्तं वर्णयिष्यामि यथाव
दनुपूर्वशः ६ वैदिकस्तांत्रिको मिश्र इति मे त्रिविधो मखः त्रयाणामीप्सितेनैव विधिना
मां समर्चयेत् ७ यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः यथा यजेत मां भक्त्या श्रद्धया तन्नि
बोध मे ८ अर्चायां स्थंडिलेऽग्नौ वा सूर्ये वाप्सु हृदि द्विजे द्रव्येण भक्तियुक्तोऽर्चेत्स्वगुरुं माममा
यया ९

शेषमाह यदा गर्भाष्टमे एकादशे द्वादशादिकाले स्वनिगमे स्वाधिकारप्रवृत्तेन वेदेनोक्तं द्विजत्वमुपनय
ने ८ अर्चायां प्रतिमादौ ९ रामराम रामराम ॥

भा० ए० अनंतरंगुर्वादिनमस्कारपूर्वकंयथोपदेशे स्वस्मिन्कृतन्यासः कृतोमूलमंत्रेणन्यासोयस्यांतामममार्ष्टीमामृजेत् निर्माल्याद्य
१६१ पकर्षणादिनाशोधयेत् कलसंपूर्णंकुंभं प्रोक्षणीयंप्रोक्षणार्थोदकपात्रं उपसाधयेत् चंदनपुष्पादिभिःसंस्कुर्यात् २१
तदद्भिःप्रोक्षणीयाद्भिः देवयजनं देवपूजास्थानं पाद्यार्घ्यंत्रीणिपात्राणिकलशोदकैःपूरितानितैस्तैर्द्रव्यैःसाधये
त् तत्रपाद्यादिद्रव्याणि पाद्यंश्यामाकदूर्वाब्जविष्णुक्रांतादिरिष्यते गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः दूर्वाचेतिक्रमा

कृतन्यासंकृतन्यासांममर्ष्टींप्राणिनामृजेत् कलशंप्रोक्षणींपंचयथावदुपसाधयेत् २१ तद
द्भिर्देवयजनंद्रव्याण्यात्मानमेवच प्रोक्षपात्राणित्रीण्यद्भिस्तैस्तैर्द्रव्यैश्चसाधयेत् २२ पाद्यार्घा
चमनीयार्थंत्रीणिपात्राणिदेशिकः हृच्छीर्षशिखयागायत्र्याचाभिमंत्रयेत् २३ पिंडेवा
य्वग्निसंशुद्धेहृत्पद्मस्थांपरांमम आत्मबीजोवकलांध्यायेन्नादांतेसिद्धभाविताम् २४

दर्घद्रव्याष्टकमुदीरितं जातिलवंगकक्कोलैर्मतमाचमनीयकमिति तानिचत्रीणिपात्राणियथाक्रमंहृदयादिमंत्रै
र्गायत्र्याचसर्वाण्यभिमंत्रयेत् २३ तदनंतरंपिंडेदेहेवाय्वग्निसंशुद्धइति कोष्ठगतेनवायुनाशोषितेमूलाधारगतेना
निलेदग्धेपुनर्ललाटस्थचंद्रमंडलामृतप्लावनेनामृतमयेजातेतस्मिन्हृत्पद्मस्थांपरांश्रेष्ठांजीवकलांश्रीनारायण
मूर्तिंध्यायेत् कथंभूतां नादांतेसिद्धभाविता प्रणवस्याकारोकारबिंदुनादाःपंचांशाः तत्रनादांतेसिद्धेध्येयोतां तथाचश्रु
तिः योवेदादौस्वरःप्रोक्तोवेदांतेचप्रतिष्ठितः तस्यप्रकृतिलीनस्ययःपरःसमहेश्वरइति २४ १६१

इदानींसकामनिष्कामभेदेनविशेषमाह द्रव्यैरिति प्रकर्षेणसिद्धैः सुशोभनैः अमायिनोनिष्कामस्यभक्तस्यतुयथालब्धैः यत्रचंदनादिसर्वद्रव्याणिनलभ्यन्ते तत्रहृदिभावेनभावनया यद्वा हृदिचेन्मद्यागः तदाभावेन मनोमयैर्द्रव्यैरित्यर्थः १६ अधिष्ठानभेदेप्रधानोपचारमाह सार्द्धेन स्नानेति तत्त्वविन्यासः यथास्थानंमंत्रप्रधानदेवतानांतत्तन्मंत्रैःस्थापनं १७ अभ्यर्हणमुपस्थानादि सलिलादिभिस्तर्पणादिनायजनं १८ सर्वत्रसाधारण

द्रव्यैःप्रसिद्धैर्मद्यागःप्रतिमादिष्वमायिनः भक्तस्यचयथालब्धैर्हृदिभावेनचैवहि १६
स्नानालंकरणंप्रेष्ठमर्चायामेवतूद्धव स्थंडिलेतत्त्वविन्यासोवह्नावाज्यप्लुतंहविः १७
सूर्येचाभ्यर्हणंप्रेष्ठंसलिलेसलिलादिभिः १८ श्रद्धयोपहृतंप्रेष्ठंभक्तेनममवार्य्यपि
गंधोधूपःसुमनसोदीपोऽन्नाद्यंचकिंपुनः भूर्य्यप्यभक्तोपहृतंनमेतोषायकल्पते १९
शुचिःसंभृतसंभारःप्राग्दर्भैःकल्पितासनः आसीनःप्रागुदग्वार्चेदर्चायांत्वथसंमुखः २०

माह श्रद्धयेति १९ एवमधिकारादिव्यवस्थामुक्त्वेदानींपूजाकारणमाह शुचिरिति संभृताःसंभाराःपूजासाधनानियेनसः प्रागग्रैर्दर्भैः यद्वा प्रागेवसंभृतसंभारः सन्नासीनः नत्वासीनःसन् पश्चात्तत्तत्संभारार्थंवारंवारमुत्तिष्ठेदित्यर्थः प्राङ्मुखः उदङ्मुखोवा आसीनः अर्चायांतुस्थिरायां संमुखःउपविष्टःसन् २० ॥ ऽऽ ॥ ऽऽ

भा०ए० नन्दादीन्पार्षदानष्टदिक्षु गरुडं पुरतः दुर्गादीनि कोणेषु गुरून्वामतः सुरानिन्द्रादिदेवान्लोकपालान्पू
१४२ र्वादिदिक्षु एवमेतान्देवस्याभिमुखान्प्रोक्षणादिभिरर्घ्यादिभिः पूजयेदित्यर्थः २८ पाद्यादीनुपचारा
न्प्रकल्पयेदित्युक्तं तानेव गुणविधिभिः प्रपंचयति चंदनेति षड्भिः २९ मंत्रानाह स्वर्णघर्मानुवाकः सुव
र्णंघर्मपरिवेदनंइत्यादि महापुरुषविद्यया जितंतेपुंडरीकाक्षनमस्ते विश्वभावन सुब्रह्मण्यनमस्ते

नंदंसुनंदंगरुडंप्रचंडंचंडमेवच महाबलंबलंचैवकुमुदंकुमुदेक्षणं दुर्गांवि
नो२ नायकंव्यासंविष्वक्सेनंगुरून्सुरान् स्वेस्वेस्थानेत्वभिमुखान्पूजयेत्प्रोक्षणा
दिभिः २८ चंदनोशीरकर्पूरकुंकुमागुरुवासितैः सलिलैःस्नापयेन्मंत्रैर्नित्यदा
विभवेसति २९ स्वर्णघर्मानुवाकेनमहापुरुषविद्यया पौरुषेणापिसूक्तेनसाम
भीराजनादिभिः ३० वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः अलंकुर्वीतसप्रेममद्भक्तोमांयथो
चितम् ३१

महापुरुषर्वजेति पौरुषंसूक्तं सहस्रशीर्षेत्यादि राजनादीनिसामानि इंद्रंनरोनेम
धिताहवंतइत्यस्यामृषिगीतानि आदिशब्देनरोहिण्यादीनि ३० वस्त्राद्युपचारैरलंकारलक्षणंगुणंवि
धत्ते वस्त्रेति पत्राणिकपोलवक्षःस्थलादिषुलिखितपत्रभंगयः मद्भक्तश्चेत्स्वप्नेनयथाभवतितथा यथोचि १४२
तमलंकुर्वीतेति ३१

तयात्मभूतयास्वेनैकभावेन चिंतितया अमृतमये पिंडे दीपेन प्रभया गृह इव व्याप्ते सति तस्मिन्नेवादौ मानसैरुपचा
रैः संपूज्य तन्मयः सन्नर्चादिष्वावाह्य स्थापनमुद्रया स्थापयित्वा २५ कथं प्रपूजयेत्तदाह पाद्येति द्वाभ्यां धर्मादिभिर्मे
मासनं तत्र पद्मं च कल्पयित्वोभाभ्यां वेदतंत्राभ्यामुभयसिद्धये वेदतंत्रोक्तभुक्तिमुक्तिप्राप्तये अयमर्थः धर्मज्ञानवै
राग्यैश्वर्याण्यासनपर्यंकस्याग्नेयादिचतुष्कोणेषु पादाः अधर्मादीनि पूर्वादिदिक्षु गात्राणि त्रयो गुणाः पट्टिकाः

मू॰ तयात्मभूतया पिंडे व्याप्ते संपूज्य तन्मयः आवाह्यार्चादिषु स्थाप्य न्यस्तांगं मां प्रपूजये
त् २५ पाद्योपस्पर्शगृहणादीनुपचारांश्च कल्पयेत् धर्मादिभिश्च नवभिः कल्पयित्वासनं म
म पद्ममष्टदलं तत्र कर्णिकाकेशरोज्ज्वलं उभाभ्यां वेदतंत्राभ्यां मह्यं तूभयसिद्धये २६
सुदर्शनं पांचजन्यं गदासीषुधनुर्हलान् मूसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् २७

दि॰ १ तत्र पूर्वादिदिक्क्रमेण मध्ये च विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वी सत्या ईशानानुग्रहेति नव शक्तयः एवं य
थोपदेशं धर्मादिभिर्नवभिश्च शक्तिभिरासनं कल्पयित्वेति कर्णिकायाः केशरैस्तत्रस्थसूर्यादिमंडलै
श्चोज्ज्वलमित्यर्थः २६ आयुधादिपूजामाह सुदर्शनमिति त्रिभिः तत्र न्यस्तांगमित्यंगावरणपूजा सू
चिता आसनेनैव शक्त्यावरणमप्युक्तं ततः सुदर्शनादिमूसलांतान्यायुधान्यष्टदिक्षु कौस्तुभमालाश्रीव
त्सानुरसि २७

भा० ए०
१४३

दर्भैः परिस्तीर्य परितः प्रोक्षयेत् अन्वाधाय अन्वाधानसंज्ञकं व्याहृतिभिः समित्प्रक्षेपादिरूपं कर्म कृत्वा प्र
णेन उत्तरतो द्रव्याणि होमयोग्यान्यासाद्य निधाय प्रोक्षण्या प्रोक्षणीपात्रोदकेन प्रोक्ष्याग्नौ मां ध्यायेत् ३६ शं
खादिभिर्लसं शोभमानाश्चत्वारो भुजा यस्य तं ३७ स्फुरन्ति किरीटादीनि यस्य तं ३८ हविषा घृतेन अभिघृ
तानि संसिक्तानि दारूणि सुक्ष्मसमिधः प्रास्य प्रक्षिप्य आघारौ दत्वा तत्संज्ञकौ यागौ एवमाज्यभागौ च दत्वा

परिस्तीर्याथ पर्युक्षेदन्वाधाय यथाविधि प्रोक्षण्यासाद्य द्रव्याणि प्रोक्ष्याग्नौ भावये
तमां ३६ तप्तजाम्बूनदप्रख्यं शंखचक्रगदाम्बुजैः लसच्चतुर्भुजं शान्तं पद्मकिंजल्क
वाससं ३७ स्फुरत्किरीटकटककटिसूत्रवरांगदं श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमा
लिनं ३८ ध्यायन्नभ्यर्च्य दारूणि हविषाभिघृतानि च प्रास्याज्यभागावाघारौ द
त्वा चाज्यप्लुतं हविः ३९ जुहुयान्मूलमन्त्रेण षोडशर्चावदानतः ४०

तदर्थो आहुतीर्दत्वेत्यर्थः तत्राघारौ प्रजापतये स्वाहा इंद्राय स्वाहेति चोत्तरदक्षिणपरिधिमारभ्याग्नि
मध्याद्यापरिवध्यं घृतक्षरणरूपौ आज्यभागौ अग्नये स्वाहा सोमाय स्वाहेत्येवं होमरूपौ ३९ मूलमंत्रे
णाष्टाक्षरेण तथा षोडशऋचो यस्मिन् तेन पुरुषसूक्तेन च अवदानतः प्रतिऋचमाहुतिग्रहणेनेत्यर्थः
पुरुषसूक्तेनाराधनपक्षे स एव मूलमंत्रः तेनैव प्रतिऋचमवदानतो होम इति ४० ॥

उक्तार्थं सर्वसाधारणं अच्छालक्षणं गुणं विधत्ते पाद्यमिति ३२ नैवेद्यवैभवलक्षणं गुणं विधत्ते गुडपायसेति
शष्कुल्यः तैलपक्वविशेषाः आपूपाः अपूपानां मंडकादीनां समूहाः सूपाद्व्यंजनानि सति विभववृत्तिशेषः
३३ कालभेदेन गुणं विधत्ते अभ्यंगेति अभिषेचनं पंचामृतादि स्नापनं अन्नाद्येति अन्नं भोज्यं आद्यं भ

पाद्यमाचमनीयं च गंधसुमनसौ ततान् धूपदीपौ महार्घ्याणि दद्यान्नेमं ह्युपार्चकः १
३२ गुडपायससर्पींषि शष्कुल्यापूपमोदकान् संयावदधिसूपांश्च नैवेद्यं सति कल्प
येत् ३३ अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनं अन्नाद्यगीतनृत्यानि पर्वणि स्युरुतान्व
हं ३४ विधिना विहिते कुंडे मेखलागर्तवेदिभिः अग्निमाधाय परितः समूहेत्पाणिनोदितं ३५

त्यं पर्वण्येकादश्यादौ अन्वहं प्रत्यहम् वा विभवे सतीति ३४ फलभूयस्त्वार्थिनोऽग्नावपि पूजाप्रका
रमाह विधिना स्वगृह्योक्तप्रकारेण मेखलादिभिर्लक्षिते विहिते निर्मिते तदुक्तं विस्तारोच्छ्रायतस्ति
स्रो मेखलाश्चतुरोंऽगुलाः हस्तमात्रो भवेद्गर्तः सयोनिर्वेदिका तथेत्यादि उदितं प्रज्वलितमग्निं परि
तः समूहेत एकत्र मेलयेत् ३५

भा० ए०
१४४

ततः शेषाग्रहणपूर्वकं वैकल्पिकमुद्वासनप्रकारमाह इतीति अनयैव प्रार्थनया शेषां निर्माल्यं मया दत्तां ध्या-
त्वा शिरस्याधाय धृत्वा यद्युद्वासयेत्तर्हि प्रतिमायां यन्त्र स्तज्ज्योतिस्तत्पुनरपि हृत्पद्मस्थज्योतिषि ध्यात्वोद्वासनी-
यं ४२ एतेष्वधिष्ठानेषु किं मुख्यमित्यपेक्षायामाह अर्चादिष्विति यदा यत्र श्रद्धा तदा तत्र न त्वधिष्ठाने

इति शेषां मया दत्तां शिरस्याधाय सत्कृतं उद्वासयेच्चेदुद्वास्यं ज्योतिर्ज्योतिषि तत्पुनः ४३ अर्चा-
दिषु यदा यत्र श्रद्धा मां तत्र चार्चयेत् सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ४४ एवं क्रि-
यायोगपथैः पुमान्वैदिकतान्त्रिकैः अर्चन्नुभयतः सिद्धिं मत्तो विन्दत्यभीप्सितां ४५ मदर्चां सं-
प्रतिष्ठाप्य मंदिरं कारयेद्दृढं पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितान् ४६ पूजादी-
नां प्रवाहार्थं महापर्वस्वथान्वहं क्षेत्रापणपुरग्रामान्दत्त्वा मत्सार्ष्टितामियात् ४७

मुख्यामुख्यत्वं कुतः यतः सर्वभूतः सर्वभूतेष्विति ४४ उभयतः इहामुत्र च ४५ समर्थ्य प्र-
त्याह मदर्चामिति त्रिभिः पुष्पोद्यानानि च कारयेत् पूजायात्रोत्सवाश्रितान् पूजा प्रत्यहं यात्रा
विशिष्टपर्वणि बहुजनसमागमः उत्सवो वसन्तादिमहोत्सवः तदाश्रितान् क्षेत्रादीन् दत्त्वा ४६ ॥
पूजायात्रोत्सवाश्रितानित्यस्य विवरणं पूजादीनामिति प्रवाहार्थं संततत्वान्वहं त्वर्थे मत्सार्ष्टितां मत्समा-

१४४

मंत्रैः स्वाहांतैर्नाममंत्रैर्यथान्यायं पूजाक्रमेणैव अग्नये स्विष्टकृते स्वाहेत्येवं स्विष्टकृतं च कृत्वा ततो वह्निस्थं
भगवंतमभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो नंदादिभ्योऽष्टसु दिक्षु बलिं हरेत् ३८ ततः पूजास्थानमागत्य
देवस्याग्रे समुपविश्य यथाशक्ति मूलमंत्रेण जपेत् ततश्च भगवतो भोजनसमाप्तिं ध्यात्वा आचमनं
दत्वा उच्छेषं विष्वक्सेनाय कल्पयित्वा तदनुज्ञया पश्चात्स्वयं भुंजीत ततः सुरभिमन्तु गंधवंतो पूलाद्यं मुखवा

धर्मादिभ्यो यथान्याय्यं मंत्रैः स्विष्टकृतं बुधः अभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो बलिं हरेत्
३८ मूलमंत्रं जपेद्ब्रह्म स्मरन्नारायणात्मकं दत्वाचमनमुच्छेषं विष्वक्सेनाय कल्पयेत् मु
मुखवासं सुरभिमत्तांबूलाद्यमथार्हयेत् ३९ उपगायन्गृणन्नृत्यन्कर्माण्यभिनयन्मम
मत्कथाः श्रावयन्शृण्वन्मुहूर्तं क्षणिको भवेत् ४० स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृ
तैरपि स्तुत्वा प्रसीद भगवन्निति वंदेत दंडवत् ४१ शिरो मत्पादयोः कृत्वा बाहुभ्यां च परस्प
रं प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ४२

सं दत्वाऽथ पुनरपि अर्हयेत् पुष्पांजलिना पूजयेत् ३९ अभिनयन्स्वस्मिन्नाविष्कुर्वन् क्षणिकः वैयग्र्यं परित्य
ज्य लब्धावसरो भवेत् ४० स्तवस्तोत्राणां भेदं दर्शयति पौराणैः प्राकृतैरिति ४१ कथं प्रणमेदित्यपेक्षायामा
ह शिर इति बाहुभ्यां दक्षिणोत्तराभ्यां परस्परं मत्पादक्षिणोत्तरौ पादौ गृहीत्वा यद्वा पृष्ठतः परस्परं निबद्धा

भा०११
१४५

अष्टाविंशे तु यः पूर्वं विस्तरेणोपवर्णितः ज्ञानयोगः पुनश्चासौ समाहृत्य निरूप्यते इदानीमतिविस्तरेणो
क्तं ज्ञानयोगं संक्षेपेण वक्तुमाह परेषां स्वभावान् घोरत्वादीन् कर्माणि च तत्र हेतुं विश्वमिति १ विपक्षे दो
षमाह परेति स्वार्थात् ज्ञाननिष्ठालक्षणात् असति मिथ्याभूते द्वैतेऽभिनिवेशात् २ भ्रंशमेव दृष्टांते
न दर्शयति तैजसे राजसाहंकारकार्ये इंद्रियगणे निद्रयाऽऽपन्ने अभिभूते सति पिंडस्थो जीवः केवलं

श्रीभगवानुवाच॥ परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् विश्वमेकात्मकं पश्यन् प्रकृ
त्या पुरुषेण च १ परस्वभावकर्माणि यः प्रशंसति निंदति स आशु भ्रश्यते स्वार्थादसत्यभि
निवेशतः २ तैजसे निद्रयापन्ने पिंडस्थो नष्टचेतनः मायां प्राप्नोति मृत्युं वा तद्वन्नाना
र्थदृक् पुमान् ३ किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत् वाचोदितं तदनृतं मनसा
ध्यातमेव च ४

मनोमात्रे एव मायां स्वरूपां प्राप्नोति ततो मनसि लीने सति नष्टचेतनः सन् मृत्युं वा मृत्युतुल्यां सुषुप्तिं वा प्राप्नो
ति यथा तद्वदेव नानार्थदृक् द्वैताभिनिवेशी विक्षेपं लयं च प्राप्नोतीति ३ द्वैतासत्यतया स्तुतिनिंदयोर्नि
र्विषयत्वं प्रपंचयति सार्धैः षड्भिः किं भद्रमिति अवस्तुनो द्वैतस्य मध्ये किं भद्रं किं वाऽभद्रं कियद्वा किं
यद्वाऽभद्रमित्यर्थः अवस्तुत्वमेवाह वाचेति यद्वाचेंद्रियोपलक्षणं वाचा उदितं त्वक् च चक्षुरादिभिश्च

१४५

प्रतिष्ठादीनां व्यस्तसमस्तानां फलमाह प्रतिष्ठयेति मत्साम्यतां मया साम्यमित्यर्थः ४८ सकामं प्रत्युक्तं अहै-
तुकं भक्तं प्रत्याह मामेवेति अहैतुकमेव भक्तियोगः कथं भवति तत्राह भक्तियोगमिति ४९ दातुः फलमुक्तं
अपहर्त्तारं निंदति य इति विड्भुक् विष्ठाभोजी कृमिः ५० कर्तुर्यत्फलं तदेवान्येषामप्याह कर्तुरिति सा-

प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयं पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ४८
मामेव नैरपेक्ष्येण भक्तियोगेन विंदति भक्तियोगं स लभते एवं यः पूजयेत मां ४९ यः
स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः वृत्तिं स जायते विड्भुग्वर्षाणामयुतायुतं ५० कर्तु-
श्च सारथेर्हेतोरनुमोदितुरेव च कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलं ५१ ॥ इति श्री-
पा १ मद्भागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्धवसंवादे पूजनविधिः सप्तविंशोध्यायः २७ ॥

रथेः सहकारिणः हेतोः प्रयोजकस्यानुमोदितुश्च प्रेत्य तत्फलमित्यन्वयः कुतः यतः कर्मणामे-
ते भागिनः भागार्हाः तत्रापि विशेषमाह भूयसि कर्मणि सारथ्यादेश्च भूयोऽधिकं फलमिति ५१ पयः
पत्रादिमात्रेणापि पूजितो यः परं पदं प्रापयति प्रीतस्तस्मै कृष्णः शरणं मम ॥ इति श्रीएकादशे सप्तविं-

भा० ए० ननु यद्यात्मसंविदा सर्वं दृश्यमसदित्युच्यते तर्ह्यात्मा स्वप्रकाशो देहादि द्वैतं च जडमित्युक्तं स्यात् तथा च संस
१४६ रप्रतिभासो न घटतेतेति चोदयति नैवेति अनात्मस्वदृशोर्जडाजडयोः अत्र हेतुः द्रष्टृदृश्ययोः मा भूद् द्वयोरपि
तत्राह उपलभ्यत इति आत्मेति अव्ययादिपंचविशेषणैर्नाशादिरागादिपुण्यापुण्याज्ञानपरिच्छेदानाम
संभवं दर्शयति हेतुहेतुमत्त्वं तु यथेष्टं अचिज्जडः अयं भावः यथैवाग्निर्दारुणोऽभेदेनानुपलंभेपि

श्रीउद्धव उवाच ॥ नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः अनात्मस्वदृशोरीश कस्य स्यादु
पलभ्यते १० आत्माऽव्ययोऽगुणः शुद्धः स्वयंज्योतिरनावृतः अग्निवद्दारुवदचिद्देहः क
स्येह संसृतिः ११ श्रीभगवानुवाच ॥ यावद्देहेन्द्रियप्राणैरात्मनः संनिकर्षणं संसारः फ
लवांस्तावदपार्थोऽप्यविवेकिनः १२ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्त्तते ध्यायतो वि
षयानस्य स्वप्नेऽनर्थागमो यथा १३

दारुप्रकाश्यमेवाग्निश्च प्रकाशकः तथा देहात्मनोर
पीति न संसृतिस्तयोरन्यतरस्यापि घटत इति ११ सत्यं तथाप्युभयोरविवेक एव संसारालंबनमि
त्याह पंचभिः यावदिति संनिकर्षेण संबंधः नन्वसंगस्य कुतः संबंधस्तत्राह अविवेकिनः अज्ञानक ऊ
त इत्यर्थः ननु स्वप्रकाशस्य कथमज्ञानतः संसारस्तत्राह अपार्थोपि केवलं फलवान् फलस्फूर्त्तिर्न तु गं
तत्त्वतोऽस्तीत्यर्थः १२ नन्वसतो देहादेः कुतः संसारस्फूर्त्तिहेतुत्वमपि तत्राह अर्थे हीति अस्यात्म

१४६

नन्वेवं सति देहादिभावानामप्यसत्वात्कथं भयहेतुत्वमत्र सदृष्टांतमाह छायाप्रतिबिंबं प्रत्ययः प्रतिध्वनिः
आभासः शुक्तिरजतादिः एते यथाऽसंतोप्यर्थकारिणो भवंति आमृत्युतः मृत्युमभिव्याप्य यद्वा मृत्युलयः
यावन्नैव लीयंते तावत्पर्यंतमित्यर्थः ५ ननु स्रष्ट्रादिश्रुतिभिरेव द्वैतं निरूपितं कथमसत्यं स्यात्तत्राह आत्मै
वेति द्वाभ्यां त्रायते पाल्यते त्राति पालयति ६ अन्यस्मात्स्रष्ट्रादिव्यतिरिक्तात् त्रिविधा आध्यात्मिकादिरूपा

छायाप्रत्याह्वयाभासा ह्यसंतोप्यर्थकारिणः एवं देहादयो भावा यच्छंत्यामृत्युतो भयं ५ आ
त्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ६ तस्मान्नह्या
त्मनोन्यस्मादन्यो भावो निरूपितः निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि ७ इदं गुणम
यं विद्धि त्रिविधं मायया कृतं एतद्विद्वान्मदुदितं ज्ञानविज्ञाननैपुणं न निंदति न च स्तौति लोके
चरति सूर्यवत् ८ प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा आद्यंतवदसज्ज्ञात्वा निःसंगो वि
चरेदिह ९

भातिः प्रतीतिः ७ ननु कथं निर्मूलं प्रतीयते तत्राह इदमिति ज्ञानविज्ञानयोर्नैपुणं
निष्ठां सूर्यवत्समो भूत्वा ८ एतन्निष्ठाप्राप्त्युपायमाह प्रत्यक्षेणेति यदाद्यंतवद्द्वैतं तदसदिति ज्ञात्वा निः
संगो विचरेत् आद्यंतवत्वे प्रमाणानि प्रत्यक्षेण घटाद्यनुमानेन सावयवत्वेन दृश्यत्वे पृथिव्यादि निगमेनाऽप्र
त्यक्षमाकाशादि आत्मसंविदा स्वानुभावेन सर्वं दृश्यजातं आद्यंतवदसच्चेति ज्ञात्वेति ९ रामराम रामराम

भा० ए० तदेवज्ञानंस्वरूपसाधनफलैर्निरूपयति ज्ञानमिति विवेकोज्ञानं साधनान्याह निगमोवेदः तपः स्वधर्मः
१५७ प्रत्यक्षंस्वानुभवः ऐतिह्यमुपदेशः अनुमानंतर्कः फलमाह आद्यंतयोर्यद्यस्यजगतः मध्येपितदेवकेवलं
नतुजगदिति किंतत्कालःकलयतिप्रकाशयतितथा हेतुःकारणंचयत्ततदेव एतदुक्तंभवति यदस्यवि
श्वस्यकारणंप्रकाशकंचब्रह्मतदात्मकमेवैतत् नततःपृथगित्येवं निश्चयफलोनिगमादिसाधनोज्ञा

ज्ञानंविवेकोनिगमस्तपश्चप्रत्यक्षमैतिह्यमथानुमानं आद्यंतयोरस्यय
देवकेवलंकालश्चहेतुश्चतदेवमध्ये १८ यथाहिरण्यंसुकृतंपुरस्तात्पश्चा
च्चसर्वस्यहिरण्मयस्य तदेवमध्येव्यवहार्यमाणंनानापदेशैरहमस्यतद्वत् १९

यत्तेयोविवेकस्तज्ज्ञानमिति १८ तत्रनानाभेदव्यवहारालंबनस्यापिविश्वस्यकारणमात्रात्मकत्वेसदृष्टां
तमाह यथेति सुकृतंसुष्ठुकुंडलादिरूपेणविरचितंयद्धिरण्यं कीदृशं हिरण्मयस्यकुंडलादेःकृत्स्नस्यपु
रस्तात्तथासाच्च पश्चादस्तिकटककुंडलमित्यादिनाव्यपदेशैर्व्यवहारंप्राप्यमाणमपि तदेवयथात
द्वदस्यविश्वस्यकारणभूतोऽहमेवनानाव्यवहारालंबनंनतुमत्तःपृथग्विश्वमिति १९ ॥ ऽऽ ॥ १५७

ननु कथं विद्यायतो विषयस्फूर्त्तिर्जीवन्मुक्तस्यापि दुर्वारेत्यनिर्मोक्षप्रसंगः स्यात्तत्राह यथाह्येति प्रस्वापः स्वप्नः बहु
नर्थान्बिभर्त्ति पुष्णातीति तथा १४ अहंकारलक्षणो देहादिसंनिकर्षः एव संसारालंबनमित्यन्वयव्यतिरेकौ
भ्यां दर्शयन्ति शोकेति सुषुप्त्यादौ तेषामदर्शनात् अहं सुखीति वद्वेत्तन्यं सुखीति प्रतीत्यभावाच्च दृश्यत्वाच्च सुखादी
नां कृशत्वादिवद्धर्मत्वानुपपत्तेरिति भावः १५ ननु यद्यहंकारस्य संसारस्तर्हि मुक्तिरपि तस्यैवेति मुक्तावहंकाराविशे

यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् स एव प्रतिबुद्धस्य न वै मोहाय कल्पते १४ शोकहर्षभयक्रोध
लोभमोहस्पृहादयः अहंकारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः १५ देहेंद्रियप्राणमनोभिमानो जी
वोऽन्तरात्मा गुणकर्ममूर्त्तिः सूत्रं महानित्युरुधेव गीतः संसार आधावति कालतंत्रः १६ अमूल
एवं [illegible] [illegible]रूपितं मनोवचःप्राणशरीरकर्म ज्ञानासिनोपासनया शितेन छित्वा मुनि
र्गां विचरत्यतृष्णः ११

षः प्रसज्जेत तत्राह देहेति देहादिष्वभिमानो यस्य सः आत्मैव तेषामन्तः स्थितो जीवः अत एव गुणकर्म
मयी मूर्त्तिर्यस्य सः एवं च स एव सूक्ष्मोपाधिभिर्विदुधेव सूत्रादिशब्दैर्गीतः संसारे परमेश्वराधीनः सर्वतो धा २
वति अतो नायं दोष इति भावः १६ तमेव महंकारकृतं बंधमुपपाद्येदानीं ज्ञानेन तन्निवृत्तौ मुक्तिरित्याह
अमूलमिति वस्तुतो मूलशून्यं अज्ञानतस्तु बहुधा रूपैरूपितं प्रकाशितं ऐंद्रजालिकतुल्यमिति वा किं तत् त
दाह मन इति मन आदीनां द्वंद्वः यद्वा मन आदिषु क्रियत इति कर्म अहंकरणं गुरूपासनया निशितेन ज्ञान

भा० ए० एवंसामान्यतःकार्य्यप्रकाश्ययोःकारणप्रकाशकाभ्यामभेदमुक्त्वाद्य प्रस्तुतेतद्भयविवेकपूर्वकंप्र
१५८ पंचस्यब्रह्मभेदमाह अविद्यमानइति योऽयंवैकारिकःविकारसमूहः स एवप्रागविद्यमानोराजससर्गः
रजोद्वारेणब्रह्मकार्य्यभूतइत्यर्थः अवभातेपि ब्रह्मप्रकाश्यस्त्वेत्यर्थः ब्रह्मतुस्वयंस्वतःसिद्धंनतुका
र्य्यमित्यर्थः ज्योतिश्चप्रकाशकइत्यर्थः अतःकारणादिंद्रियाणिचअर्थास्तन्मात्राणिच आत्मामन

अविद्यमानोप्यवभासतेयोवैकारिकोराजससर्गएषः ब्रह्मस्वयंज्योतिरतोविभातिब्रह्में
द्रियार्थात्मविकारचित्रं २२ एवंस्फुटंब्रह्मविवेकहेतुभिःपरापवादेनविशारदेन। छित्वा
त्मसंदेहमुपारमेतस्वानंदतुष्टोऽखिलकामुकेभ्यः २३

श्चदेवानामप्युपलक्षणं विकाराःपंचमहाभूतानिच एवंचित्रंब्रह्मैवभातीति २२ उपसंहरति एवंनि
गमतमःप्रत्यक्षैतिह्यानुमानैःस्फुटंयथाभवतितथाब्रह्मविवेकहेतुभिः तथापरस्यदेहादेरप
वादेनात्मत्वनिरासेनच कीदृशेन विशारदेननिपुणेनगुरुणानिमित्तभूतेनेतिवा आत्मविषयं
संदेहंछित्वास्वानंदतुष्टःसन्नखिलकेभ्यः इंद्रियादिभ्यःउपारमेत निःसंगोभवेत् २३ ॥ ६६ ॥ १५८

तदेवं कार्यस्य कारणमात्रात्मकत्वमुक्त्वा प्रकाश्यस्य प्रकाशात्मकतामाह विज्ञानमिति त्रियवस्थमिति य
कारस्य पृथक्पाठश्छंदोनुरोधेन जाग्रदादित्र्यवस्थं यद्विज्ञानं मनः तदवस्थाकारणभूतं च यद्गुणत्रयं य
च्चकार्यकारणकर्तृ कारणमध्यात्मं कार्यमधिभूतं कर्ताधिदैवमेवं गुणत्रयकार्यभूतं त्रिविधं ज
गदेतद्येन तुर्येण सामान्यज्ञानमात्रेण समन्वयेन भवति येनानुगतं प्रकाशत इत्यर्थः तमेव भान्तमनुभाति
सर्वं तस्य भासा सर्वमिदं विभातीति तथा चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो यो मनो विदुरित्यादिश्रुतेः न

विज्ञानमेतत्त्रियवस्थमंगगुणत्रयं कारणकार्यकर्तृ समन्वयेन व्यतिरेकतश्च येनैव तुर्येण
तदेव सत्यं २० नयत्पुरस्तादुत यन्न पश्चान्मध्ये च तन्न व्यपदेशमात्रं भूतं प्रसिद्धं च परेण यद्यत्
तदेव तत्स्यादिति मे मनीषा २१

तु विशेषविज्ञानव्यतिरेकेण न तुर्यं नामोपलभामहे तत्राह व्यतिरेकतश्च समाध्यादौ यदस्ति तदेव सत्यमि
ति २० एवं कालत्रयेप्यव्यभिचारिणः सत्यत्वमुक्तं व्यभिचारिणस्त्वसत्यतामाह न यदिति मध्ये यत्तत्पृथ
ङ्नास्ति किन्तु व्यपदेशमात्रं नाममात्रं कुतः यतो यद्यत्परेण अन्येन भूतं जातं प्रसिद्धं प्रकाशितं च तदेव का
रणप्रकाशकतावन्मात्रं स्यान्न पृथगिति मे मनीषा बुद्धिः वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव
सत्यं सर्वं खल्विदं ब्रह्मेत्यादिश्रुतेः कारणप्रकाशकव्यतिरेकेण च कार्यस्य चानुपपत्तेरिति भावः २१

भा० ११ १६९ मुक्तवदसम्यग्ज्ञानी नयथेष्टमाचरेदित्याह द्वाभ्यां तथापीति गुणेषु विषयेषु रजः रागः मनसः कसाय इ
ति दुर्निरासतामाह २७ एतदेव दृष्टांतेनोपपादयति यथेति नृणां आमयो रोगः असाधु असम्य
ग्यथा भवति तथाऽपक्वकषायकर्म्म अदग्धाः कषायाः रागादयः तन्मूलानि च कर्माणि च यस्मिंस्त

तथापि संगः परिवर्ज्जनीयो गुणेषु मायारचितेषु तावत् मद्भक्तियोगेन दृढेन याव
द्रजो निरस्येत मनःकषायः २७ यथामयोऽसाधुचिकित्सितो नृणां पुनः पुनः संतुदति
प्ररोहन् एवं मनोऽपक्वकषायकर्म कुयोगिनं विध्यति सर्वसंगं २८ कुयोगिनो ये वि
हितांतरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः ते प्राक्तनाभ्यासबलेन भूयो युंजंति योगं
न तु कर्मतंत्रं २९

त् अत एव सर्वगं सर्वेषु पुत्रादिषु सज्जमानं मनः कुयोगिनं विध्यति क्लेशयति २८ ननु कथंचि
द्विषयसंगे यदि योगभ्रंशः स्यात् अलं तर्हि सोपायेन योगमार्गेण तत्राह कुयोगिन इति मनुष्यभू
तैर्बंधुशिष्यादिरूपैः त्रिदशैरुपसृष्टैः प्रेरितैः तथा च श्रुतिः यस्मात्तदेषां न प्रियं यदेतन्मनुष्या वि
दुरिति भूयो जन्मांतरे न तु कर्मतंत्रं कर्मविस्तारम् २९ ॥ऽऽ॥ऽऽ॥ऽऽ॥ऽऽ॥ऽऽ॥ऽऽ १६९

परएवादंप्रपंचयति वपुरात्मानभवति पार्थिवत्वात् घटवत् तथाइंद्रियाणितदधिष्ठातारोदेवा अ्रसुराः प्राणो
मनःधिषणाबुद्धिः सत्वंचित्तमहंकृतिरित्येते आनभवंति कुतः अन्नमात्रं अन्नोपष्टभ्यत्वाच्छरीरवत् वा
युर्जलं हुताशस्तेजः खंक्षितिरितिपंचभूतानि अर्थाःशब्दादयःसाम्यंप्रकृतिश्च आनजडत्वात् घट
वदिति यद्वा हिशब्देनानुमानांतराणिसूचितानि तद्यथा इंद्रियाणि आत्मानभवंति करणत्वात्
मनोवत् प्राणश्चवायुत्वाद्वाह्यवायुवदित्यादि २६ एवंविवेकज्ञानवत्तोमुक्तस्यनेंद्रियकृतगुणदोष

नात्मावपुःपार्थिवमिंद्रियाणिदेवाह्यसुर्वायुर्जलंहुताशः मनोऽन्नमात्रंधिषणाचसत्वमहंकृतिः
खंक्षितिरर्थसाम्यं २७ समाहितैःकःकरणैर्गुणात्मभिर्गुणोभवेन्मत्सुविविक्तधाम्नः विक्षि
प्यमाणैरुत किंनुदूषणं घनैरुपेतैर्विगतैरवेःकिं २८ यथानभोवाय्वनलांबुभूगुणैर्गता
गतैर्वर्तुगुणैर्नसज्जते तथाहमत्तःसत्वरजस्तमोमलैरहंमतेःसंसृतिहेतुभिःपर २९

संबंधइत्याह समाहितैरिति मत्सुविविक्तधाम्नःभमसुष्ठुविविक्तधामस्वरूपंयेनतस्य २५ प्रकाशक
स्यगुणदोषानभवंतीतिरविदृष्टान्तेनोक्तं असंगब्रह्मत्वेनावस्थितस्यनकेपिगुणदोषाइत्याकाशदृष्टांते
नाह यथेति यथानभःवाय्वादीनांशोषणादह्नक्लेदनरजोध्वसरत्वादिभिर्गतागतैरागमापायिभिः ऋतुगु
णैः शीतोष्मादिभिर्वा अहंमतेः अहंकारात्परमत्वात् संसृतिहेतुभिर्नयुज्यते यद्वा अहंकारस्यसंसृति

तदेवमात्मानविक्रियत इत्युक्तं नन्विदमनुपपन्नं बद्धावस्थयात्यज्यमानत्वात् मुक्तावस्थायां च गृह्यमाण
त्वात् नहि व्रीहयोऽवघातेन व्रीहिभावत्यागस्तंडुलीभावेन गृह्यमाणा न विक्रियंते तत्राह सर्वमिति
बद्धावस्थायां गुणैः कर्मभिश्च चित्रमज्ञानकार्यं देहेंद्रियादिलक्षणं आत्मन्यध्यासेनापि विविक्तं गृ
हीतमासीत् तदेव पुनर्ज्ञानेन निवर्तते आत्मा तु न केनापि रूपेण गृह्यते नापि त्यज्यते अयं भावः क्रिया

पूर्वं गृहीतं गुणकर्मचित्रमज्ञानमात्मन्यविविक्तमंग । निवर्तते तत्पुनरीक्षयैव न गृह्यते
नापि विसृज्य आत्मा ३३ यथा हि भानोरुदयो नृचक्षुषां तमो निहन्यान्न तु सद्विधत्ते एवं स
मीक्षा निपुणा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धेः ३४ एष स्वयंज्योतिरजोऽप्रमेयो महानुभू
तिः सकलानुभूतिः एकोऽद्वितीयो वचसां विरामे येनेषिता वागसवश्चरंति ३५

फलत्वेतावदात्मनो विकारः तस्यास्त्वारोपिताज्ञानमात्रनिवृत्तिरूपत्वान्नात्मसंस्पर्शित्वं बंधमोक्षयोः अतो न वि
कार इति ३३ एतदेव दृष्टांतेन स्पष्टयति यथेति न तु पूर्वमसत् घटादिपुनर्विधत्ते करोति ई मे समीक्षात्मा
त्मविद्या ३४ आत्मनोऽविकारत्वं प्रपंचयति एष इत्यनेनापरोक्षतया नित्यप्राप्तस्यात्मनः प्राप्तिं वारयति स्व
यंज्योतिरित्यज्ञानमलापाकरणलक्षणं विकृतिं अज इत्युत्पत्तिं वारयति अप्रमेय इति ज्ञानलक्षणाति
शयाधानेन संस्कारं महानुभूतिरिति देशकालपरिच्छेदाभावेनास्तित्व वृद्धिविपरिणामापक्षयनाशा

[illegible]
[illegible] ॥ ५५

नन्वविदुषामपिसर्वथाकर्मदुष्परिहरमितिपुनःसंसारःस्यादतआह करोतीति विदुषोऽन्योऽसौजंतुर्दे
हभोजनादिकर्मकरोति क्रियतेविक्रियतेच तेनकर्मणापुष्ट्याद्यपिप्राप्नोतीत्यर्थः केनापिसंस्का
रादिनाचोदितःसन् आनिपातात्मरणपर्य्यंतंकर्मकरोतीति विद्वांस्तुप्रकृतौदेहेस्थितोपितत्रकर्म
णानविक्रियते निरहंकारत्वात् हर्षविषादादिभिःसंसारंनप्राप्नोतीत्यर्थः ३० किंच आस्तांतावद्देहि

करोतिकर्मक्रियतेचजंतुःकेनाप्यसौचोदितआनिपातात् नतत्रविद्वान्प्रकृतौस्थितोपि
निवृत्ततृष्णःस्वसुखानुभूत्या ३० तिष्ठंतमासीनमुतव्रजंतंशयानमुक्षंतमदंतमन्नं ॥
स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्नवेद ३१ यदिस्मपश्यत्यसदिंद्रि
यार्थंनानानुमानेनविरुद्धमन्यत् नमन्यतेवस्तुतयामनीषीस्वाप्नंयथोत्थायतिरोदधा
नम् ३२

किंकर्मभिर्विकारशंकायतोदेहमप्यसौनपश्यतीत्याह तिष्ठंतमिति उक्षंतंमूत्रयंतं
स्वभावप्राप्तमन्यदपिदर्शनादीहमानंदेहं ३१ नन्विंद्रियवतःसर्वथाकथमदर्शनंसंभवतितत्राह य
दिस्मेति यद्यपिअसत्तांवहिर्मुखानांइंद्रियाणांअर्थंपश्यति तथापिनानात्वात्मिथ्यात्वप्रवदित्यनुमा
नेनविरुद्धंबाधितंसत् अन्यदात्मव्यतिरिक्तंमनीषीवस्तुतयानमन्यते स्वापादुत्थायप्रवुद्धःसंस्कारमा

केचित्तु पुनः प्रत्यक्षादिप्रतीतप्रपंचस्य बाधायोगात् वेदांतार्थानां च क्रत्वर्थकर्तृप्रतिपादनपरत्वेनार्थवाद
त्वात् द्वैतं सत्यमिति पंडितमानिनो अत्र वयमेव पंडिता इत्यभिमानवंतो मन्यंते तन्मतमनूद्य दूषयति
यदिति नामाकृतिभिर्नामरूपोपलक्षितं पंचभूतात्मकं द्वयं द्वैतं यत्तदबाधितमिति पंडितमानिनं
अत्र वयमेव पंडिता इत्यभिमानवंतो वेदांतेषु यमर्थवाद इति प्रतीतिः न तत्त्वविदः यतः व्यर्थेनापि
विनाप्यर्थेन सा प्रतीतिः तथाहि न तावद्विध्येकवाक्यत्वं तेषामस्ति यतोऽर्थवादत्वं स्यात् न चाक

यन्नामाकृतिभिर्ग्राह्यं पंचवर्णमबाधितं व्यर्थेनाप्यर्थवादोऽयं द्वयं पंडितमानिनां २७
योयोगिनोऽपक्वयोगस्य युंजतः काय उत्थितैः उपसर्गैर्विहन्येत तत्रायं विहितो वि
धिः २८ योगधारणया कांश्चिदासनैर्धारणान्वितैः तपोमंत्रौषधैः कांश्चिदुपसर्गान्विनिर्दे
हेत २९

र्थे भोक्तृपरमानंदरूपात्मप्रतिपादनं कर्मविधिप्रोषतां भजते न चाबाधितत्वं
द्वैतस्य नामरूपात्मत्वात् ग्राह्यत्वात् पंचवर्णात्मकत्वात् स्वप्नवदित्याद्यनुमानैर्वाचारंभणादिश्रु
तिभिश्च बाधितत्वादिति २७ तदेवं ज्ञानयोगं सपरिकरं निरूप्येदानीं तन्निष्ठस्य विघ्नप्रतीकारमाह
योगिन इति त्रिभिः योगं युंजतः कायोत्पद्यंते रैर्वोत्पन्नैरुपसर्गै रोगाद्युपद्रवैरभिभूये विधिप्रतीका

धिः २८ योगधारणया सोमसूर्याग्निधारणया संतापशै
त्यादीन् आसनैर्वायुधारणान्वितैर्वातादिरोगान्
तपोमंत्रौषधैः पापग्रहसर्पादिकृतान् २९

नकोपिविकारइतिदर्शयति ननुश्रुतिविषयस्य कथंस्वयंज्योतिष्ट्वादिकंतत्राह वचसांविरामे अगोचरत्वे
ननिवृत्तोसत्यां तथाचश्रुतिः यतोवाचोनिवर्त्तंते अप्राप्यमनसासहेति तत्रहेतुः येनेषितापेषितः त
थाचश्रुतिः केनेषितंपतति प्रेषितंमनः केनप्राणःप्रथमःप्रैतियुक्तः केनेषितांवाचमिमांवदंति चक्षुःश्रो
त्रस्यश्रोत्रंमनसोमनो यद्वाचोहवाक् प्राणस्यप्राणश्चक्षुषश्चक्षुरिति ३५ अद्वितीयत्वमुपपादयितुंभे

एतावानात्मसंमोहोयद्विकल्पस्तुकेवले आ
त्मन्नृतेस्वमात्मानमवलंबोनयस्यहि ३६ ।

दस्यावास्तवत्वमाह एतावानिति केवले अभिन्ने आत्मन् आत्मनिविकल्पइतियत् एतावान्
सर्वोप्यात्मनोमनसः संमोहभ्रमः यतःस्वमात्मानमृते विना यस्यविकल्पस्यावलंबः आश्रयो
नास्ति रजतभ्रमस्येव शुक्तिंविना नेहनानास्तिकिंचन इंद्रोमायाभिःपुरुरूपईयते युक्ता
ह्यस्यहरयःशतादशेत्यादिश्रुतेरित्यर्थः ३६ ॥ ॥

पं

भा० ए०
१५२

इति श्री एकादशे अष्टाविंशः ॥ २८ ॥ ऊनत्रिंशे तु यः पूर्वं विस्तरेण निरूपितः भक्तियोगस्तमेवाह स्वभक्तायम
तः अतिक्लेशाभिवाल्लभ्ययोगेभ्यस्तंगेकसंपदि सुखोपायं पुनः क्रमं मुद्धवः परिपृच्छति अनात्मनः अवशीकृ
तमनसः अंजसा अप्रयासेनैव यथा सिद्ध्येत तत्तथांजसा स्वबोधं यथा तथा मे तद्ब्रूहि १ सुदुष्करतां प्रपंच
यति प्रायश इति मनो युंजंतः निरुद्धतः विषीदंति क्लिश्यंति कुतः असमाधानात्ते अनिग्रहात् कथंचिच्चे
मनसो निग्रहे च कर्शितः श्रांताः संतः २ यस्माद्देवं केचन विषीदंति अथातः अत एव वयं हंसाः सारासारवि

इति श्रीमद्भागवते महापुराणे एकादशस्कंधे ज्ञानविज्ञानयोगोऽष्टाविंशोध्यायः ॥ २८ ॥ उद्धव उवाच ॥ सुदु
ष्करामिमां मन्ये योगचर्यामनात्मनः यथांजसा पुमान् सिद्ध्येत् तन्मे ब्रूह्यंजसाच्युत ॥ १ ॥ प्राय
शः पुंडरीकाक्ष युंजंतो योगिनो मनः विषीदंत्यसमाधानान्मनोनिग्रहकर्शिताः ॥ २ ॥ अ
थात आनंददुघं पदांबुजं हंसाः श्रयेरन्नरविंदलोचन सुखं नु विश्वेश्वर योगकर्मभिस्त्वन्माय
यामी विहता न मानिनः ३

विकचक्षुषः ते तु आनंददुघं समस्तानंददुघं समस्तानंदपरिपूरं केवलं तव पदांबुजमेव सुखं यथा भवति तथा नु
निश्चितं श्रयेरन्नेवं ते अमीत त्वन्मायया विहताः के ये योगकर्मभिर्मानिनः संतो न श्रयंते यद्वा अमी च
रुक्ताः त्वन्मायया न विहताः अत एव योगकर्मभिः कृत्वा मानिनो न भवंति अन्ये तु त्वन्मायया मोहि
ताः संतो वयं योगाभ्यासाः वयं कर्मकुशला इति केवलं गर्विता भवंति न तु मुंचंत इत्यर्थः ३ राम राम १५२

ममानुध्यानादिभिः कामादीन् योगश्वरानुवृत्त्या दंभमदीन् हन्यात् ४० अन्ये तु देहसिद्ध्यर्थमेवैतत्सर्वं कु
र्वंति तद्दूषयति केचित्पुनरेतेऽन्यैश्चोपायैर्देहमेव सुकल्पं जरारोगादिरहितं वयसि तारुण्ये स्थिरं च
कृत्वा अहंकृद् परकायप्रवेशादिसिद्ध्येत तद्द्वारेणारूपं योगं युंजंति न तु ज्ञाननिष्ठारूपं ४१ कुत्सैः प्रा
ज्ञैरादरणीयं न भवति न श्रेयं ति व द्रात्मवस्यायीशरीरं तु फलवन्नश्वरमित्यर्थः ४२ ननु क्व चित्समा

-कांश्चिन्ममानुध्यानेन नामसंकीर्तनादिभिः योगेश्वरानुवृत्त्या वा हन्यादशुभदान् छनैः ४०
केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरं विधाय विविधोपायैरथ युंजंति सिद्धये ४१ नहि तत्कु
शलादृत्यं तदायासो ह्यपार्थकः अंतवत्त्वाच्छरीरस्य फलस्येव वनस्पतेः ४२ योगं निषेवतो नित्यं
कायश्चेत्कल्पतामियात् तच्छ्रद्दध्यान्न मतिमान् योगमुत्सृज्य मत्परः ४३ योगचर्यामिमां यो
गी विचरन्मदपाश्रयः नांतराये विहन्येत निस्पृहः स्वसुखानुभूः ४४

र्यं गतेनापि प्राणायामादियोगे क्रियमाणे जरारोगाद्यभावो हि दृश्यते सत्यं तथापि समाधिमुत्सृज्य न तत्र स.
ज्जेतेत्याह योगमिति ततस्तां देहसिद्धिं न श्रद्दध्यात् न विश्वसेत् ४३ तदेवं विघ्नप्रतिकारैर्योगं कुर्याद्दि
त्युक्तमत्र च शरणस्य तु न विघ्नशंकापीत्याह योगचर्यामिति विचरन् आचरन् स्वसुखेत्र न भूः अनुभूति
र्यस्य सः स्पृहामूला हि विघ्नाः सा च मदपाश्रयस्य निवर्तते अतोऽंतरायैर्विहतः स्खानं दुष्प्रणोभवतीति समा

हत्यस्त्वयोगंनुसमस्तोपनिषद्रसं सख्येमुख्यतमांभ
क्तिंमुक्तौपुनःकृपादिशत् ४५

भा० ए०
१५३

दिफलं कथं स्यात्तत्राह किंचेति तृष्यकं यावै साधनसंपत्ति पुरुषार्थचतुष्टये तया विना तदाप्नोति नरो नारायणा
श्रय इति ५ आस्तामन्यभजनवार्त्ता त्वत्कृतोपकारस्य त्वय्यात्मनिवेदनेनैव निष्कृतिर्नान्यथेत्याह नैवेति अ
पचितिं प्रत्युपकारं अनृण्यमिति यावत् कवयो ब्रह्मविदोपि नैव प्राप्नुवंति यतस्त्वत्कृतमुपकारं स्मरंतः ऋ
द्धमुदः उपचितपरमानंदाः उपकारमेवाह योभवेवान् बहिराचार्यवपुषा गुरुरूपेण अंतश्च चैत्यवपुषा
अंतर्यामिरूपेण अशुभं विषयवासनां विधुन्वन् निरस्यन् स्वगतिं निजं रूपं प्रकटयति तत्ते स्यतव ६ इत्थ

नैवोपयंत्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरंतः योऽंतर्बहिस्तनुभृ
तामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ति ॥६॥ श्रीशुक उवाच ॥ इत्युद्धवेनात्य
नुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः गृहीतमूर्त्तित्रय ईश्वरेश्वरो जगाद स
प्रेममनोहरस्मितः ॥७॥ श्रीभगवानुवाच ॥ हंत ते कथयिष्यामि मम धर्मान्सुमंगलान् यान्
श्रद्धयाचरन्मर्त्यो मृत्युं जयति दुर्ज्जयम् ८

रत्वे हेतुः जगत्क्रीडनकं क्रीडोपकरणं यस्य सः ननु जगत्स्रष्ट्रादिना ब्रह्मेशादयः क्रीडंति तत्राह स्व
शक्तिभिः सत्वादिभिर्गृहीतं मूर्त्तित्रयं येन सः सप्रेमम् प्रेमसहितं मनोहरं स्मितं यस्य सः सप्रेमं
यथा तथा जगादेति वा ७ हंतेति सहर्षं संबोधनं सुमंगलान् सुखरूपान् मृत्युं संसारं दुर्जयं मन्येहस्पार्थः ॥७॥

तद्भक्तास्तु त्वत्प्रसादेन कृतार्था भवंतीति नातिचित्रमित्याह किमिति अनन्यशरणेषु दासेषु तव आत्मसात्त्वं तद
धीनत्वं यत् यथा नंदगोपीवल्लिप्रभृतिषु एतत्किं चित्रं नाश्चर्य्यमित्यर्थः यतो यो भवान् श्रीरामरूपेण मृ
गैर्वानरैः सह साहित्यं सख्यमिति यावत् अरोचयत् प्रीत्याकृतवान् कथंभूतः ईश्वराणां ब्रह्मादीनां
यानि श्रीमंति किरीटानि तेषां तटान्यग्राणि तैः पीडितं विलुंठितं पादपीठं यस्य स्वयं तथाभूतोपि सन्
अतस्त्वां परित्यज्य को नाम अन्यत् संश्रयेदित्याह तं त्वेति तमेवंभूतं त्वां को नु विसृजेत् न भजेत् कथंभूतः स्व

किं चित्रमच्युत तवैतदशेषबंधो दासेष्वनन्यशरणेषु यदात्मसात्त्वं योरोचयत्सह मृगैः स्व
यमीश्वराणां श्रीमत्किरीटतटपीडितपादपीठः तं त्वाखिलात्मदयितेश्वरमाश्रितानां स
र्वार्थदं स्वकृतविद्विसृजेत को नु कोवाभजेत्किमपि विस्मृतये नु भूत्यै किं वा भवेन्न तव पाद
रजोजुषां नः ५

स्वकृतवित् तेषु वलिप्रह्लादादिषु त्वया कृतमनुग्रहं जानन् यद्वा स्वस्मि
न्नेवांतर्यामितया कृतमुपकारं विद्वान् तदेवाह अखिलात्मदयितेश्वरं अखिलस्य जगतः आत्मानं चेत
यितारं आत्मत्वाद्दयितं प्रेष्ठं सुसेव्यं ईश्वरत्वादवश्यभजनीयं किंच आश्रितानां सर्वार्थदं तर्हि किंफ
लोहं शोभाहं सेवा: नहि नहि किमपि अनिरुक्तं त्वद्व्यतिरिक्तं स्वर्गादि त्वया दत्तमपि को वा भजेत सेवेत कथंभूतं
यत्के चलं भूत्यै इंद्रियभोगाय अनु अनंतरमेव तद्विस्मृतये भवति यद्वा त्वद्व्यतिरिक्तं किमपि देवतांतरं धर्मज्ञा

नादिसाधनं वा भूत्यै ऐश्वर्य्याय संसारस्य विस्मृतये मो
क्षाय वा को भजेत् न कोपि न तु तत्साधनं विना भोगमोक्षौ

ननूत्तमाधमेष्वेकरूपेण सभाजनमपांडित्यमेव स्यात् पूज्यपूज्यादिव्यतिक्रमादित्याशंक्य तामेव सम
दृष्टिं प्रपंचयति ब्राह्मण इति विषमेष्वपि समं दृक् समं मामेव पश्यन् वैषम्यमेव च तु ह्री दृश्य
ति ब्राह्मणपुक्कस इति जातितो वैषम्यं पुक्कसोऽन्त्यजजातिविशेषः स्तेनब्रह्मस्वहारिणि ब्रह्मण्ये
ब्राह्मणेभ्यो दातरीति कर्मतः अर्केति विस्फुलिंगे इति गुणतः अक्रूरे शांते क्रूरे चेति स्वभावतः १४

ब्रह्मणे पुक्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिंगके अक्रूरे क्रूरके चैव समदृक् पंडितो मतः
१४ नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात् स्पर्द्धासूयातिरस्काराः साहंकारा वियंति हि
१५ विसृज्य स्मयमानान्स्वान्दृशं व्रीडां च दैहिकीं प्रणमेद्दंडवद्भूमावाश्वचांडालगो
खरं १६ यावत्सर्वेषु भूतेषु मद्भावो नोपजायते तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः १७

नरेष्वीश्वरदृष्टिं कुर्वतः सद्यःफलविशेषमाह नरेष्विति समोत्तमहीनेषु स्पर्द्धादयः स्वस्मिन्नहंका
रश्च हि निश्चितं वियंति नश्यंति १५ अतोऽन्तर्यामीश्वरदृष्ट्या सर्वान्प्रणमेदित्याह विसृज्येति स्मय
मानान् हसतः स्वान्स्वकीयान् तथा दैहिकीं दृशं अहमुत्तमः स तु नीच इति दृष्टिं तया दृशा या व्रीडा
लज्जा तां च विसृज्य चंडालादीनभिव्याप्य प्रणमेत् १६ एवं पंचभिः श्लोकैरुक्ताया समदृष्टेरवधिमा

धर्मानं कुर्य्यादितित्रयो दशभिः मांस्मरन् शनकैः असंरंभतः कुर्य्यात् तदाह मयीति अर्पिते मनश्चित्ते संक
ल्पविकल्पानुसंधानात्मकेयेन अतएवा मद्धर्मे घेवात्म मनसोरतिर्यस्य सः ९ पुण्यादेशाल्लक्षणं मद्भक्तैरि
ति देवादिषुयेमद्भक्तास्तेषामाचरितानिकर्म्माणिचाश्रयेत् १० सत्रेणसंभूयवा ११ अंतरंगांभक्तिमाह सा

कुर्य्यात्सर्वाणिकर्माणिमदर्थंशनकैःस्मरन् मय्यर्पितमनश्चित्तोमद्धर्मात्ममनोरतिः ९
देशान्पुण्यानाश्रयेत मद्भक्तैःसाधुभिःश्रितान् देवासुरमनुष्येषु मद्भक्ताचरितानिच १० पृ
थक्सत्रेणवामह्यंपर्वयात्रामहोत्सवान् कारयेन्नृत्यगीताद्यैर्महाराजविभूतिभिः ११ मा
मेवसर्वभूतेषुवहिरंतरपावृतं ईक्षेतात्मनिचात्मानं यथाखममलाशयः १२ इति
सर्वाणिभूतानिमद्भावेनमहाद्युते सभाजयन्मन्यमानोज्ञानंकेवलमाश्रितः १३

मितित्रिभिः सर्वभूतेष्वात्मनिचात्मानमीश्वरंस्थितंमामेवेक्षेत कथमेकस्यसर्वेषुवृत्तिस्तत्राह
वहिरंतंपूर्णमित्यर्थः तत्कुतः अपावृतम् अनावरणं तदपिकुतः यथाखं असंगत्वादित्यर्थः
१२ हेमहाद्युते अतिप्राज्ञइत्यनेनप्रकारेण केवलंज्ञानंज्ञानरूपांदृष्टिमाश्रितःसन् सर्वाणि
भूतानिमद्भावेनमन्यमानःसभाजयन् पंडितमतइत्युत्तरेणान्वयः १३ ॥ ऽऽ ॥ ऽऽ

भा० ए० अतीमङ्गलमेव बुद्धेर्विवेकस्य मनीषायाश्चातुर्य्यस्य च फलमित्याह एषेति तामेव दर्शयति सत्यमनृ
१५५ तं च मामं अनृतेनाऽसत्येन मर्त्येन विनाशिना मनुष्यदेहेनेह अस्मिन्नेव जन्मनि प्राप्नोतीति यत्सैव
बुद्धिर्मनीषा चेति बुद्धिर्विवेकः मनीषा चातुर्य्यं २२ महाप्रकरणार्थमुपसंहरति द्वाभ्यां एष इति २३॥

एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणां यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतं २२ एष
तेऽभिहितः कृत्स्नो ब्रह्मवादस्य संग्रहः समासव्यासविधिना देवानामपि दुर्गमः २३ अ
भीक्ष्णशस्ते गदितं ज्ञानं विस्पष्टयुक्तिमत् एतद्विज्ञाय मुच्येत पुरुषो नष्टसंशयः २४
सुविविक्तं तव प्रश्नं मयैतदपि धारयेत् सनातनं ब्रह्मगुह्यं परं ब्रह्माधिगच्छति २५ य
एतन्मम भक्तेषु संप्रदद्यात्सुपुष्कलं तस्याहं ब्रह्मदायस्य ददाम्यात्मानमात्मना २६

२४ किंच आस्तां तावज्ज्ञानं एतदनुसंधानपठनश्रवणपराणामेतदेव फलं भवतीत्याह चतु
र्भिः सुविविक्तमिति मया सुविविक्तं दत्तोत्तरं एतदाख्यानमपि यो धारयेत् अनुसंधात् ब्रह्मगुह्यं
वेदेपि रहस्यं २५ सुपुष्कलं यथा भवति तथा ब्रह्मदायस्य ब्रह्मदस्येतीति तथा तस्य ज्ञानोपदेष्टुः १५५

तस्यैवंकुर्वतःपुंसःसर्वंब्रह्मात्मकमेवभवति कुतः आत्ममनीषयासर्वत्रेश्वरदृष्ट्यायाविद्यातया अतःपरितोब्रह्मै
वपश्यन्सर्वत्रक्रियामात्रादुपरमेत् १८ किमयमेवोपायः अस्तिचान्योपीत्यपेक्षायांसंतिवहवः समीचीनस्त्व
यमेवेत्याह अयंहीति १९ भगवद्धर्मलक्षणोपायस्यसमीचीनत्वमेवोपपादयति द्वाभ्यां नहीति अंगहेउद्ध
वनाशिषोनिष्कर्मस्य मद्धर्मस्योपक्रमेसति अण्वपि ईषदपिवैगुण्यादिनाशोनास्त्येव यतोमयैवनिर्गुणत्वा

सर्वंब्रह्मात्मकंतस्यविद्ययात्ममनीषया परिपश्यन्नुपरमेत्सर्वतोमुक्तसंशयः १८ अयंहिसर्व
कल्पानांसध्रीचीनोमतोमम मद्भावःसर्वभूतेषुमनोवाक्कायवृत्तिभिः १९ नह्यंगोपक्रमे
ध्वंसोमद्धर्मस्योद्धवाण्वपि मयाव्यवसितःसम्यङ्निर्गुणत्वादनाशिषः २० योयोमयिपरे
धर्मःकल्प्यतेनिष्फलायचेत् तदायासोनिरर्थःस्याद्भयादेरिवसत्तम २१ ॥ ऽऽ ॥

इयंधर्मःसम्यग्व्यवसितोनिश्चितः नतुमन्वादिमुखेनकथंचित् २० किंचयोयइति अयमर्थः किंव
क्तव्यं मद्धर्मस्यनध्वंसइति यतोलौकिकोपियोयोनिरर्थोव्यर्थआयासः सोपिमयिपरेनिष्फलायचेत्क
ल्प्यतेनिष्कामतयाऽर्प्यतेश्चेत्तर्हिधर्मएवस्यात् निरर्थायासेदृष्टांतः यथाभयशोकादेर्हेतोःपलाय
ताआक्रंदनादिक्लेशस्तद्वत् २१

भा०ए० कृतकृत्यतमाह मर्त्यइत्ति यदात्यक्तसमस्तकर्मासन्मे निवेदितात्माभवति तदाऽसौमे विचिकीर्षितः विशि
१५६ ष्टकर्तुमिष्टोभवतिततस्तुअमृतत्वंमोक्षंप्रतिपद्यमानोमयात्मभूयायमदैक्यायेतियावत्कल्पतेयो
ग्योभवतिवैध्रुवं ३४ आदर्शितोयोगमार्गोयस्मैसः ३५ प्रणयेनावघूर्णं क्षुभितंचित्तंधैर्येणविष्ट

मर्त्योयदात्यक्तसमस्तकर्मानिवेदितात्माविचिकीर्षितोमे तदामृतत्वंप्रतिपद्यमानो
मयात्मभूयायचकल्पतेवै ॥ ३४ ॥ श्रीशुकउवाच ॥ सएवमादर्शितयोगमार्गस्तदोत्तमश्लो
कवचोनिशम्य बद्धांजलिःप्रीत्युपरुद्धकंठोनकिंचिदूचेऽश्रुपरिप्लुताक्षः ३५ विष्टभ्यचि
त्तंप्रणयावघूर्णंधैर्येणराजन्बहुमन्यमानः कृतांजलिःप्राहयदुप्रवीरंशीर्ष्णास्पृशंस्त
च्चरणारविंदं ३६ ॥ उद्धवउवाच ॥ विद्रावितोमोहमहांधकारोयआश्रितोमेतवसन्निधानात् विभा
वसोःकिंनुसमीपगस्यशीतंतमोभीःप्रभवंत्यजाद्य ३७ प्रत्यर्पितोमेभवतानुकंपिनाभृत्यायविज्ञान
मयःप्रदीपः हित्वाकृतज्ञस्तवपादमूलंकोन्यंसमीयाच्छरणंत्वदीयं ३८

स ५ भ्यबहुमन्यमानःआत्मानंकृतार्थंमन्यमानः ३६ मयायत्राश्रितःआसीत्सतवसान्निधानेनैवविद्रावितःप्रभ
वंतिकिंतुवायेसमर्थाभवंति अजाद्य ब्रह्मणोपिजनक ३७ किंच यद्यपितवसन्निधानादेवगतः तथाप्यनुकंपिना
भवताविज्ञानमयःप्रदीपश्चप्रत्यर्पितः स्वमाययाऽपहृतःपुनःसमर्पितः अतस्तवकृतज्ञस्यत्वयाकृतमनुग्र

समधीयीतउद्वेःपठेत् परमंशुचि अन्येषामपि शोधकं पूयेतशुद्धोत् २७ २८ सम्यग्ज्ञानाद्वत्पत्तौपुनरुपदेशा
मीत्याशयेनपृच्छति अपीति अपिकिं २९ उपधारितमाकलय्याह नैतदिति शठायकंचकाय ३०म्
द्राणांयोषितांचयदिभक्तिःस्यात् तर्हिब्रूयात् ३१ एतस्यज्ञानेचपुमान्कृतार्थोभवतीत्याह नैतदिति अत्र

यएतत्समधीयीतपवित्रंपरमंशुचिः सपूयेताहरहर्मांज्ञानदीपेनदर्शयन् २७ यएतच्छ्रद्ध
यानित्यमव्यग्रःशृणुयान्नरः मयिभक्तिंपरांकुर्वन्कर्मभिर्नसबध्यते २८ अप्युद्धवत्व
याब्रह्मसखेसमुपधारितं अपितेविगतोमोहःशोकश्चासौमनोभवः २९ नैतत्त्वयादांभि
कायनास्तिकायशठायच अशुश्रूषोरभक्तायदुर्विनीतायदीयतां ३० एतैर्दोषैर्विहीनाय
ब्रह्मण्यायप्रियायच साधवेशुचयेब्रूयाद्भक्तिःस्याच्छूद्रयोषितां ३१ नैतद्विज्ञायजिज्ञा
सोर्ज्ञातव्यमवशिष्यते पीत्वापीयूषममृतंपातव्यंनावशिष्यते ३२ ज्ञानेकर्मणियोगेच
वार्त्तायांदंडधारणे यावानर्थोनृणांतात तावांस्तेहंचतुर्विधः ३३

दृष्टांतमाह पीत्वेति पीयूषंस्वादु ३२ ननुसंतिबहूनिज्ञेयानितत्साधनानि सत्यं सत्यंभक्तानांभक्तस्यतुस
र्वमहमेव अतोमदेकशरणोभवेत्याह ज्ञानइति ज्ञानादौयावान् धर्मादिलक्षणश्चतुर्विधोऽर्थः तावांस्त
वोऽपितेःहमेवतत्रज्ञानेमोक्षः कर्मणिविहितंधर्मः स्वाभाविकेतुकामः योगेत्वणिमादिसिद्धयः वार्त्तायां

[illegible] ३३

भा० ए०
१५७

हरिमेधसा संसारं हरति मेधा यस्य तेन श्रीकृष्णेन अद्वंद्वपरोऽपि सुखदुःखादिमुक्तोऽपि निर्गमनसमये ४७ किंच
सुदुस्त्यजः स्नेहो यस्मिन् तेन वियोगात्कातरो भीतः अत एव तं परिहातुमशक्नुवन्नातुरो विक्लवः सन् कृच्छ्रं क
ष्टं ययौ प्राप ततश्च भर्तृपादुके तेनैव कृपया दत्ते मूर्ध्नि बिभ्रत् अतिनिर्बंधरूपया तदाज्ञया पुनः पुनर्नमस्कृत्य य
यौ अत्र च पृष्ठतोऽनुगमं भर्तृपादविश्लेषणात्तस्मादित्यादि तृतीयस्कंधोपक्रमोक्तानुसारेण बदरिकाश्रमं ग

श्रीशुक उवाच॥ स एवमुक्तो हरिमेधसोद्धवः प्रदक्षिणं तं परिसृत्य पादयोः शिरो निधाया
श्रुकलाभिरार्द्रधीर्न्यषिंचदद्वंद्वपरोऽप्युपक्रमे ४७ सुदुस्त्यजस्नेहवियोगकातरो न श
क्नुवंस्तं परिहातुमातुरः कृच्छ्रं ययौ मूर्द्धनि भर्तृपादुके बिभ्रन्नमस्कृत्य ययौ पुनः पुनः ४८
ततस्तमंतर्हृदि संनिवेश्य गतो महाभागवतो विशालां यथोपदिष्टां जगदेकबंधुना तपः समा
स्थाय हरेरगाद्गतिं ४९

छन् भगवतः प्रभासयात्रामुपश्रुत्य शनैः पृष्ठतो गतः सन् उपसंहृतनिजकुलं भगवंतमेकांते दृ
ष्ट्वा तत्कालप्राप्तेन मैत्रेयेण सह पुनः कृपया भगवतोपदिष्टं तत्त्वमाकलय्य तदाज्ञातो यया विति द्रष्ट
वां ४८ विशालां बदरिकाश्रमं गतः सन् हरेर्गतिमगात् कथंभूतां तेन जगदेकबंधुना यथोपदिष्टां त
दाश्रमतत्त्वं प्रतिपद्यमानो मया त्वमस्यायचकल्पते वै अनिरुद्ध्यगतीस्ति त्वो मामेष्यसि ततः परमित्येवमुक्तं

१५७

किंच दशार्हादिषु त्वया यः स्वमायया स्नेहपाशः प्रसारितः स त्वयैवात्मतत्त्वज्ञानशस्त्रेणैव कृत्तः छिन्नः ३९ एवं यद्यपि त्वया
बद्धं कृत्तं तथाप्येतावन्मात्रार्थये इत्याह नमोस्त्विति अनुशाधि अनुशिक्षय अनुशासनीयमाह यथेति मुक्तावप्य
नपायिनी ४० तदुक्तमोमित्यंगीकृत्य तथापि मयादिष्टो लोकसंग्रहार्थमेतावत्कुर्वित्याह गच्छेति त्रिभिः स्नाना

वृक्णश्चमेसुदृढःस्नेहपाशो दाशार्हवृष्ण्यंधकसात्वतेषु प्रसारितः सृष्टिविवृद्धये त्वया स्वमा
यया ह्यात्मसुबोधहेतिना ३९ नमोस्तु ते महायोगिन्प्रपन्नमनुशाधि मां यथा त्वच्चरणां
भोजे रतिः स्यादनपायिनी ४० श्रीभगवानुवाच गच्छोद्धव मयादिष्टो बदर्याख्यं ममाश्रमं तत्र म
त्पादतीर्थोदे स्नानोपस्पर्शनैः शुचिः ईक्षयालकनंदाया विधूताशेषकल्मषः वसानो वल्क
लान्यंग वन्यभुक् सुखनिस्पृहः तितिक्षुर्द्वंद्वमात्राणां सुशीलः संयतेंद्रियः शांतः समाहित
धिया ज्ञानविज्ञानसंयुतः मत्तोऽनुशिक्षितं यत्ते विविक्तमनुभावयन् मय्यावेशितवाक्चि
त्तो मद्धर्मनिरतो भव अतिव्रज्य गतीस्तिस्रो मामेष्यसि ततः परं ४१

दिः पूर्वमेव मत्पादतीर्थोदकभूतायाः अलकनंदाया ईक्षया वसानः परिदधानः द्वंद्वमात्राणां शीतो
ष्णादिविषयाणां सुशीलः आर्यवादिस्वभावः तेन त्वया विविक्तं सुविचारितम् तिस्रः त्रिगुणात्मिका गती
रतिक्रम्य ४१

ब्रह्मशापोपसंसृष्टे कुले सति अयंभावः भगवति न हि शापः प्रभवति यादवत्वानुकरणाच्च सोपि कथंचिन्मान्यः
अतः किमकरोदिति तदेतदुक्तं कथमत्यजदिति सर्वनेत्राणामिति सर्वेन्द्रियोपलक्षणं २ तत्प्रपंचयति प्रत्या
हर्तुमिति यस्मिन्रूपे लग्नं नयनं परावर्तयितुमबला न शेकुः यच्च कर्णरंध्रेण प्रविष्टं सतामात्मनि लग्नं लिखितमि

ब्रह्मशापोपसंसृष्टे स्वकुले यादवर्षभः प्रेयसीं सर्वनेत्राणां तनुं स कथमत्यजत् २ प्रत्याहर्तुं नय
नमबला यत्र लग्नं न शेकुः कर्णाविष्टं न सरति ततो यत्सतामात्मलग्नं यच्छ्रीर्वाचां जनयति रतिं कीर्त्य
मानाकवीनां दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्साम्यमीयुः ३ ऋषिरुवाच दिवि भुव्यंतरिक्षे च म
होत्पातान्समुत्थितान् दृष्ट्वासीनान्सुधर्मायां कृष्णः प्राह यदूनिदं ४ श्रीभगवानुवाच एते घो
रा महोत्पाता ह्य वेत्या यमकेतवः मुहूर्तमपि न स्थेयमत्र नो यदुपुंगवाः ५

वतिष्ठति ततो न सरति न निर्गच्छति यस्य श्रीः शोभा संकीर्त्यमाना कवीनां वाचां रतिमुल्लासविशेषं जनयति तेषां मा
नेजगतां तृप्तां जनयतीति किंनु वक्तव्यं यच्च विश्वरूपं जिष्णोरर्जुनस्य रथे स्थितं दृष्ट्वा युधि मृतास्तत्साम्यं सारू
प्यमीयुः प्राप्ताः तत्केन रूपेणात्यजदित्यन्वयः ३ दिवि सूर्यपरिवेषादीन् भुवि भूकंपादीन् अंतरिक्षे दिग्दाहा
दीन् महोत्पातान् स्वयमेवोत्पादितत्वादस्त्यैर्दुष्प्रतिकारान् ४ यमस्य केतवो ध्वजा इव मृत्युसूचका इत्यर्थः नो
स्माभिः ५

आनंदसमुद्रोभगवद्भक्तिमार्गस्तस्मिन्संभृतमेकीकृतं एतद्यः सछ्रद्धयासेव्य ईषदपिसेवित्वावर्तेतेसवि
मुच्यत इतिकिंवक्तव्यंतत्संगेनजगदपिविमुच्यतइत्यर्थः ४८ एवंकृतोपदेशंजगद्गुरुं प्रणमति भवभय
मितिभवःसंसारःभयंचजरारोगादिनिमित्तंतदुभयंनिवृत्तानांप्रवृत्तानांचभृत्यवर्गाणांयथायोग्यमपहंतुं
योऽमृतद्वयमुपजह्रेउद्धृतवान् तदेवाह वेदसारमेकं तत्रज्ञानविज्ञानरूपंचतत्सारंश्रेष्ठंच भृंगवत्तरेभ्य

नेद१ यएतदांसमुद्रसंभृतंज्ञानामृतंभागवताय भाषितं कृष्णेनयोगेश्वरसेवितांघ्रिणासछ्रद्धयासेव्य
जगद्विमुच्यते ४८ भवभयमपहंतुंज्ञानविज्ञानसारं निगमकृदुपजह्रेभृंगवद्वेदसारं अ
मृतमुदधितश्चापाययद्भृत्यवर्गान्पुरुषमृषभमाद्यंकृष्णसंज्ञंनतोस्मि ४९॥इतिश्रीमद्भाग
वतेमहापुराणेएकादशस्कंधेश्रीभगवदुद्धवसंवादेएकोनत्रिंशोध्यायः॥२९॥राजोवाच॥ततोम
हाभागवतउद्धवेनिर्गतेवनं द्वारवत्यांकिमकरोद्भगवान्भूतभावनः॥१॥

णिययापुष्पमकोपयन्नेवामृतमुपहरति तथायंस्वकृतवेदानुसारेणैवउदधितश्चैकं तच्चोभयंयथायथंभृ
त्यवर्गानपाययत् तंनतोस्मि ४९ येनानुकंपितंविश्वमुद्धवप्रश्ननिर्णयैः तंवंदेपरमानंदंश्रीकृष्णंनररूपिणं
इतिश्रीएकादशेएकोनत्रिंशः॥२९॥त्रिंशेतुप्रागुपदिष्टप्रमौसलच्छलतोहरिः स्वधामगंतुमन्विच्छन्संजहारनि
जंकुलं विप्रशापपुराघोरमुपदिष्टंप्रहिमौसलं कथावसानेतत्रैवविशेषंपरिपृच्छति ततइतित्रिभिः॥१॥

भा०ए० ततोयुयुधुरुञ्च १३ पतंत्यइतस्ततश्चलंत्यःपताकायेषुतैरथादिभिर्मिथःसमेत्यन्यहन् न्यघ्नन्नित्यर्थः
१५९ दद्भिःदंतैरिव १४ मिथःसमेत्येत्यस्यप्रपंचः प्रद्युम्नेत्यादिचतुर्भिः गदौश्रीकृष्णस्यभ्रातैकःपुत्रश्च

युयुधुःक्रोधसंरब्धावेलायामाततायिनः धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः १३ प
तत्पताकैरथकुंजरादिभिःखरोष्ट्रगोभिर्महिषैर्नरैरपि मिथस्समेत्याश्वतरैःसुदुर्मदा
न्यहन्शरैर्दद्भिरिवद्विपावने १४ प्रद्युम्नसांबौयुधिरूढमत्सरावक्रूरभोजावनिरुद्धसा
त्यकी सुभद्रसंग्रामजितौसुदारुणौगदौसुमित्रासुरथौसमीयतुः १५ अन्येचयेवैनिष
ठोल्मुकादयःसहस्रजिच्छतजिद्भानुमुख्याः अन्योन्यमासाद्यमदांधकारिताजघ्नुर्मु
कुंदेनविमोहिताभृशं १६ दाशार्हवृष्ण्यंधकभोजसात्वतामध्वर्बुदामाथुरशूरसेनाः वि
सर्जनाःकुकुराःकुंतयश्चमिथस्तुजघ्नुःसुविसृज्यसौहृदम् १७ ॥ ऽऽ ॥ ऽऽ

परस्तौ सुमित्रासुरथाविति दैर्घ्यमार्षम् अस्सुरथनामा वा कश्चित् १५ मदांधेनमदतमसावला
त्कारिताः १६ दाशार्हादयोनवतत्तद्वंश्याः अर्बुदाःमाथुराःशूरसेनाश्चतत्तद्देशीयाः १७ ॥ ऽऽ॥

प्रत्यक्पश्चिमवाहिनी ६ अभिषिच्य स्नात्वा ब्राह्मणांश्च तैः कृतशांतिकाः संतो गवादिभिः पूजयिष्यामः ७ वि
धिः प्रकारः मंगलायनं च किंच देवद्विजगवां पूजा भवतुद्भवहेतुः देवलोके परम उद्भवो भविष्यतीति भावः ८

स्त्रियो बालाश्च वृद्धाश्च शंखोद्धारं व्रजंत्वितः वयं प्रभासं यास्यामो यत्र प्रत्यक्सरस्वती ६ तत्रा
भिषिच्य शुचय उपोष्य सुसमाहिताः देवताः पूजयिष्यामः स्नपनालेपनार्हणैः ब्राह्मणांश्च महा
भागान्कृतस्वस्त्ययना वयं गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ७ विधिरेष ह्यरिष्टघ्नो मंग
लायनमुत्तमं देवद्विजगवां पूजा भूतेषु परमो भवः ८ इति सर्वे समाकर्ण्य यदुवृद्धा मधुद्विषः
तथेति नौभिरुत्तीर्य्य प्रभासं प्रययू रथैः ९ तस्मिन्भगवतादिष्टं यदुदेवेन यादवाः चक्रुः परम
या भक्त्या सर्वश्रेयोपबृंहितं १० ततस्तस्मिन्महापानं पपुर्मैरेयकं मधु दिष्टविभ्रंशितधि
यो यद्द्रवैर्भ्रश्यते मतिः ११ महापानाभिमत्तानां वीराणां दृप्तचेतसां कृष्णमायाविमूढानां संघर्ष
स्सुमहानभूत् १२

मधुद्विषो वाक्यमाकर्ण्य तथात्यभिनंद्य उत्तीर्य्य समुद्रं ९ सर्वश्रेयोपबृंहितमित्यत्र सं
धिरार्षः भगवतानुक्तैरपि सर्वैः श्रेयोभिः सहितं चक्रुः १० पीयत इति पानं मैरेयकं मदिराविशेषं मधुरसं
दिष्टेन दैवेन विभ्रंसिता धियः नह्यन्यथा तस्मिन्स्थाने तदुचितमिति भावः यस्य द्रवैः रसैः ११ कृष्णमा

भा०ए० धरोपस्थे भूतले १ भ्राजिष्णुरूपं २ तद्देवानुवर्णयति श्रीवत्सांकमिति चतुर्भिः ३ सुंदरस्मितं वक्त्राब्जं यस्मि
१६० न् पुंडरीकवदभिरामे सुंदरे अक्षिणी यस्मिंस्तं ४ वनमालया परीतान्यंगानि यस्मिंस्तं निजायुधैश्च परीतांगं

रामनिर्याणमालोक्य भगवान्देवकीसुतः निषसाद धरोपस्थे तूष्णीमासाद्य पिप्पलं १ वि
भ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया दिशो वितिमिराः कुर्वन्विधूम इव पावकः २ श्रीव
त्सांकं घनश्यामं तप्तहाटकवर्चसा कौशेयांबरयुग्मेन परिवीतं सुमंगलं ३ सुंदरस्मित
वक्त्राब्जं नीलकुंतलमंडितं पुंडरीकाभिरामाक्षं स्फुरन्मकरकुंडलं ४ कटिसूत्रब्रह्मसूत्र
किरीटकटकांगदैः हारनूपुरमुद्राभिः कौस्तुभेन विराजितं ५ वनमालापरीतांगं मूर्ति
मद्भिर्निजायुधैः कृत्वोरौ दक्षिणे पादमासीनं पंकजारुणं २५ मुसलावशेषायःखंडकृते
षुर्लुब्धको जरा मृगास्याकारं चरणं विव्याध मृगशंकया २६ चतुर्भुजं तं पुरुषं दृष्ट्वाऽस्मिन्
कृतकिल्बिषः भीतः पपात शिरसा पादयोरसुरद्विषः २७ अजानता कृतमिदं पापेन मधु
सूदन क्षंतुमर्हसि पापस्य उत्तमश्लोक मेऽनघ २८

पंकजारुणं वामपादं दक्षिणे ऊरौ कृत्वा आसीनं रूपं बिभ्रत् २५ जरानामकश्चिल्लुब्धको मृगयुः मृगस्यास्यमिवा कारो यस्य तं चरणं २६ २७ २८

१६०

भ्रातृभिश्चेति भ्रात्रादिशब्दानां सप्रतियोगिवाचित्वात् भ्रातरो मातुला इत्यादि ज्ञेयं मित्रैश्च मित्राणि च अहन् हत
वंतः १८ धन्वसु धनुःषु जह्रुः जगृहुः १९ परिघा लोहदंडाः भृताः धृताः तं च श्रीकृष्णमपि प्रत्यनीकं प्रतिप

पुत्रा अयुध्यन् पितृभिर्भ्रातृभिश्च स्वस्रीयदौहित्रपितृव्यमातुलैः मित्राणि मित्रैः सुहृदः सुहृ
द्भिर्ज्ञातींस्त्वहन् ज्ञातय एव मूढाः १८ शरेषु हीयमानेषु भज्यमानेषु धन्वसु शस्त्रेषु क्षीयमाणे
कृ ३
षु मुष्टिभिर्जह्रुरेरकाः १९ ता वज्रकल्पा ह्यभवन् परिघा मुष्टिना भृताः जघ्नुर्द्विषस्तैः कृष्णेन
वार्यमाणास्तु तं च ते प्रत्यनीकं मन्यमाना बलभद्रं च मोहिताः हंतुं कृतधियो राजन्नापन्ना
आततायिनः २० अथ तावपि संक्रुद्धावुद्यम्य कुरुनंदन एरकामुष्टिपरिघौ चरंतौ जघ्नतुर्युधि
२१ ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनां स्पर्द्धाक्रोधः क्षयं निन्ये वैणवोऽग्निर्यथा वनं २२
एवं नष्टेषु सर्वेषु कुलेषु स्वेषु केशवः अवतारितो भुवो भार इति मेनेऽवशेषितः २३ रामः समु
द्रवेलायां योगमास्थाय पौरुषं तत्याज लोकं मानुष्यं संयोज्यात्मानमात्मनि २४

द्यं २० एरकामुष्टिरूपौ परिघावुद्यम्य २१ स्पर्द्धानिमित्तः क्रोधः कुलक्षयं निन्ये २२ २३ पौरुषं योगं परमपुरु
षध्यानलक्षणं तमेवाह संयोज्येति मानुष्यं लोकं मनुष्यरूपतां वा २४ ॥ ss ॥ राम ॥ ss ॥

भा० ए० ४६ उद्वीक्षमाणस्य सूतस्य सतः ४७ ४८ निर्याणं योगमार्गेण मद्दशामिति इच्छाशरीराभिप्रायेण ४९ ५० अवि
१६१ ताः रक्षमाणाः इंद्रप्रस्थं गमिष्यथेति ब्रूहीति पूर्वेणान्वयः ५१ यन्मायारचनामेतां विज्ञायेति निज[illegible] श्रीमू

अपश्यतस्तच्चरणांबुजं प्रभो दृष्टिः प्रणष्टा तमसि प्रविष्टा दिशो न जाने न लभे च शांतिं यथा निशायामु या १
डुपे प्रणष्टे ४६ इति ब्रुवति सूते वै रथो गारुडलांछनः खमुत्पपात राजेंद्र साश्वध्वज उदीक्षतः
४७ तमन्वगच्छन्दिव्यानि विष्णुप्रहरणानि च तेनातिविस्मितात्मानं सूतमाह जनार्दनः ४८
गच्छ द्वारवतीं सूत ज्ञातीनां निधनं मिथः संकर्षणस्य निर्याणं बंधुभ्यो ब्रूहि मद्दशां ४९
द्वारकायां च न स्थेयं भवद्भिश्च स्वबंधुभिः मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ५०
स्वं स्वं परिग्रहं सर्वमादाय पितरौ च नः अर्जुनेनाविताः सर्व इंद्रप्रस्थं गमिष्यथ ५१॥
त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः मन्मायारचनामेतां विज्ञायोपशमं व्रज ५२
इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनः पुनः तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीं ५३
इति श्रीमद्भागवते महापुराणे एकादशस्कंधे त्रिंशत्तमोऽध्यायः ॥३०॥

र्तैरंतर्हितत्वाद्दृष्ट्या शोकं मा कुर्वित्यर्थः ५२ कुलस्य विनष्टत्वाद्दुर्मनाः ५३॥ इति श्री म का दशे त्रिंशत्तम

१६१

२९ ३० ब्रह्मशापकृतम् तत्रत्तवापराधइतिचेदत्तआह यस्यतवात्मयोगचरितंस्वाधीनमुपायारचितंविरिं
च्यः अस्यतनयारुद्रादयश्च येचान्येगिरांपतयोवेदद्रष्टारस्तेपिनविदुः तस्यते अचिंत्यमायायस्येति ब्रह्म

स ४

यस्यानुस्मरणंनृणामज्ञानध्वांतनाशनं वदंतितस्यतेविष्णोमयाऽसाधुकृतंप्रभो २९ त
न्माम्युज्जहिवैकुंठपापानंमृगलुब्धकं यथापुनरहंत्वेवंनकुर्य्यांसदतिक्रमं ३० यस्यात्म
योगरचितंनविदुर्विरिंच्योरुद्रादयोस्यतनयाःपतयोगिरांये॥ त्वन्माययापिहितदृष्टयएत
दंजः किंतस्यतेवयमसद्गतयोगृणीमः ३१ श्रीभगवानुवाच॥ माभैर्जरेत्वमुत्तिष्ठकामएषकृ
तोहिमे याहित्वंमदनुज्ञातःस्वर्गंसुकृतिनांपदं ३२ इत्यादिष्टोभगवताकृष्णेनेच्छाशरी
रिणा त्रिःपरिक्रम्यतंनत्वाविमानेनदिवंययौ ३३ दारुकःकृष्णपदवीमन्विच्छन्नधिग
म्यतां वायुंतुलसिकामोदमाघ्रायाभिमुखंययौ ३४ तंतत्रतिग्मद्युभिरायुधैर्वृतंह्यश्व
त्थमूलेकृतकेतनंपतिं स्नेहप्लुतात्मानिपपातपादयोरथादवप्लुत्यसवाष्पलोचनः ३५

शापादिंजस्ता असद्गतयः पापयोवयंकिंगृणीमः कथंवर्णयाम अतस्तदास्तां आशुमांजहीतिभावः ३१ ३२ इ
च्छाशरीरेणेत्यस्यायंभावः शुद्धसत्वमयींनिजांश्रीमूर्तिंमर्त्यधिय मत्र्यातिकृत्या एवंविडंबनमात्रमिति एतदेव स्फुटी

योगिनामिव स्वच्छंदमृत्युमंत्रं वारयति लोकाभिराममिति अयमर्थः योगिनो हि स्वच्छंदमृत्यवः स्वतनु
माग्नेय्या योगधारणया दग्ध्वा लोकांतरं प्रविशंति भगवांस्तु न तथा किंतु दग्ध्वैव स्वतनुसहित एव स्वकं धा
म वैकुंठाख्यमविशत् तत्र हेतुः लोकानामभिरामः अभितो रमणं स्थितिर्यस्यां तां जगदाश्रयत्वेन जग
तोपि दाहप्रसंगादित्यर्थः किंच धारणाया ध्यानस्य च मंगलं शोभनं विषयं इतरथा तयोर्निर्विषय

लोकाभिरामां स्वतनुं धारणाध्यानमंगलं योगधारणयाग्नेय्याऽदग्ध्वा धामाविशत्स्व
कं ६ दिवि दुंदुभयो नेदुः पेतुः सुमनसश्च खात् सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानु तं
ययुः ७

त्वं स्यात् इह प्रपन्ने चाद्याप्युपासकानां तथैव तद्रूपसाक्षात्कारः तत्फलप्राप्तिश्चेति भावः इच्छाशरीराणि
प्रायेणवायव्याश्रुतमेवास्तु अत्रापि तु लोकाभिराममित्यादिविशेषणानामानर्थक्यप्रसंगात् दग्ध्वा
विरोध्यनिगत इत्येव सांप्रतं ६ तदा स्वमेव लोकमाभिष्पतीति संभ्रमे एव देवादिकृतः सर्वतो दुंदुभिनाद
पुष्पवर्षादिमहोत्सवोऽभवदित्याह दिवीति भूमेः सकाशात् श्रीकृष्णमनुययुः ७ ॥ ७ ॥

एकत्रिंशेस्कंधामजगाममभगवानितः तमेवान्वययुःप्रीत्याव सुदेवादयस्ततः देवान्यदून्विधाया
दोभ्यःयोदेवान्विधायच श्रीहंसःस्वेछयाधामस्वतन्वैवसमाविशत् मुनयःसनकादयः प्रजेश्वराम
रीच्यादयः द्विजाःगरुडलोकवासिनःपक्षिणः मैत्रेयादयोवा भगवतोनिर्याणंद्रष्टुकामाःसंतः पर

श्रीशुकउवाच॥ अथतत्रागमद्ब्रह्माभवान्याचसमंभवः महेंद्रप्रमुखादेवामुनयःसुप्रजे
श्वराः पितरःसिद्धगंधर्वाविद्याधरमहोरगाः चारणायक्षरक्षांसिकिन्नराप्सरसो
द्विजाः द्रष्टुकामाभगवतोनिर्याणंपरमोत्सुकाः १ गायंतश्चगृणंतश्चशौरेःकर्माणि
जन्मच ववृषुःपुष्पवर्षाणिविमानावलिभिर्नभः कुर्वंतःसंकुलंराजन्भक्त्यापरमया
युताः २ भगवान्पितामहंवीक्ष्यविभूतीरात्मनोविभुः संयोज्यात्मनिचात्मानंपद्मनेत्रेन्यमी
लयत् ३

मोत्सुकास्तत्रागमन् १ तेषामोत्सुक्यहेतुंमहोत्सवंमाह सार्द्धेन गायंतश्चेति २
विभूतीः रुद्रादींश्च पद्म नेत्रेन्यमीलयदित्यत्रायंभावः एवंब्रह्मादिभिःस्वलोकांल्लोकपालान्नःपाहि वैकुं
ठकिंकरानितिप्रार्थितस्तादिदानींचस्वंस्वंलोकंप्रतिनेतुमागत्वाद्दृक्षुदाक्षिण्यात्तान्वंचयितुंसमाधि स्थितिंकुर्वन्नेत्रेन्यमीलयदिति ३

भा० द० नपुनरन्यथामंतव्यं यतोऽस्मिन्नेवावतारेतत्प्रभावोनिरतिशयोदृष्टइत्याह मर्त्त्येनेति यमेनस्वलोकंप्रतिनी
१६३ तंगुरुसुतं मर्त्त्येनतेनैवशरीरेणाप्यानीतवान् शरदः शरणागतरक्षकः त्वांचब्रह्मास्त्रदग्धंयोरक्षितवान् य
श्चांतकानामंतकमपिईशंश्रीरुद्रंबाणसंग्रामेजितवान् योमृगयुंलुब्धकं स्वःस्वर्गंअनयत् निन्ये असौस्वा
वनेस्वरक्षणेअनीशः असमर्थः किं ९ ननुयदिसमर्थस्तर्हिकंचित्कालमत्रैवतेनवपुषाकिंनातिष्ठत्तत्राह

मर्त्त्येनयोगुरुसुतंयमलोकनीतंत्वांचानयच्छरणदःपरमास्त्रदग्धं जिग्येंऽतकां
तकमपीशमसावनीशः किंस्वावनेस्वरनयन्मृगयुंसदेहं १० तथाप्यशेषस्थितिसंभ
वाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् नैच्छत्प्रणेतुंवपुरत्रशेषितंमर्त्त्येनकिंस्वस्थ
गतिंप्रदर्शयन् ११

तथापीति यद्यप्युक्तप्रकारेणाशेषस्यजगतःस्थित्यादिषुअनन्यहेतुनिरपेक्षएवकारणंस्वयं यद्यस्मा
दशेषशक्तिधृक् यद्यपियादवान्संहृत्यनिजंवपुःअत्रशेषितः प्रणेतुंकर्तुंनैच्छत् किंतुस्वमेवलोकम
नयत् तत्रहेतुः मर्त्त्येनदेहेनकिं नकिंचित्कार्यमिति स्वस्थानामात्मनिष्ठानांदिव्यगतिमेवप्रकर्षेणद
र्शयन् अन्यथातेऽपिदिव्यांगतिमनादृत्ययोगबलेनदेहसिद्धिंविधायाऽत्रैवरंतुंयत्नेरन् तस्माद्दिते [illegible] स्कंधः ९०

१६३

तदा श्रीकृष्णेऽन्तर्हिते सति कुतो गत इति वितर्कयन्तोऽपि ब्रह्ममुख्या देवादयः स्वधामनि विशन्तं श्रीकृष्णं न द
दृशुः तत्र हेतुः अविज्ञातगतिमिति क्वचित्क्वचिद्ददृशुश्च ततोऽतिविस्मिता बभूवुरित्यर्थः ६ अवि
ज्ञातगतित्वं दृष्टान्तेन स्पष्टयति सौदामिन्या गतिर्यथा मर्त्यैर्न लक्ष्यते तथाभ्रमंडलं हित्वा गच्छतः श्रीकृष्ण
स्य देवैरपि न लक्ष्यते किंतु तत्पार्षदैरेवेत्यर्थः ७ ८ अभिप्रायापरिज्ञानतः प्रथमं क्लिष्टदृष्टान्तेन स्पष्टमु

देवादयो ब्रह्ममुख्या न विशन्तं स्वधामनि अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ६ सौ
दामिन्या यथाकाशे यान्त्या हित्वाभ्रमंडलं गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ७ ब्रह्मरुद्रा
दयस्ते तु दृष्ट्वा योगगतिं हरेः विस्मितास्तां प्रशंसन्तः स्वं स्वं लोकं ययुस्तदा ८ राजन् परस्य तनुभृ
ज्जननाप्ययेहा मायाविडंबनमवेहि यथा नटस्य सृष्ट्वात्मनेदमनुविश्य विहृत्य चान्ते संहृत्य
चात्ममहिनोपरतः स आस्ते ९

क्लिष्टदृष्टं दृष्ट्वा पुनस्तमेवार्थं प्रपंचयति राजन्निति त्रिभिः परस्य सर्वकारणस्य तनुभृत्सु यादवादिषु ज
ये २ ननाप्ययेहाः आविर्भावतिरोभावचेष्टाः मायया अनुकरणमात्रमवेहि नटो यथाऽविकृत एव नानारूपैर्ज
न्मादीन् विडंबयति तद्वत् आस्तां तावद्यादवादिषु जन्मादिशंका यावता विश्वसर्गनिरोधादिष्वप्यसाववि
कृत एवास्ते इत्याह सृष्ट्वेति आत्मना स्वयमेवेदं जगत्सृष्ट्वा अंतर्यामित्वेनानुविश्य आत्ममहिनास्

भा० ए० ३१ १७ सदुक्तिभिः सत्योः वितथयाउक्तयोयेषु तैः नाहंप्रकाशः सर्वस्ययोगमायासमावृतः मूढोऽयंनाभि

नुपगृह्यपतींस्तातचितामारुरुहुःस्त्रियः रामपत्न्यश्चतद्देहमुपगृह्याग्निमाविशन्
वसुदेवपत्न्यस्तद्गात्रंप्रद्युम्नादीन्हरेःस्नुषाः १६ कृष्णपत्न्योविशन्नग्निंरुक्मिण्याद्या
स्तदात्मिकाः १७ अर्ज्जुनःप्रेयसःसख्युःकृष्णस्यविरहातुरः आत्मानंसांत्वयामास
कृष्णगीतैःसदुक्तिभिः १८ बंधूनांनष्टगोत्राणामर्ज्जुनःसांपरायिकं हतानांका
रयामासयथावदनुपूर्वशः १९ द्वारकांहरिणात्यक्तांसमुद्रो[illegible]प्लावयत्क्ष
णात् वर्ज्जयित्वामहाराजश्रीमद्भगवदालयं नित्यंसंनिहितस्तत्रभगवान्म
धुसूदनः स्मृत्वाशेषाशुभहरंसर्वमंगलमंगलं २० स्त्रीबालवृद्धानादायहत
शेषान्धनंजयः इंद्रप्रस्थंसमावेश्यवज्रंतत्राभ्यषेचयत् २१ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ

जानाति लोकोमामजमव्ययमित्यादिभिः १८ नष्टगोत्राणां नष्टसंततीनां सांपरायिकं पिंडोद

॥ २१ २० १९ १८ क्षि

१६४

एतांउक्तप्रकारांपदवीम् गतिं १२ तदेवंभगवतास्वदेहंगच्छतावसुदेवादीनामपितत्प्राप्तये

यएतांप्रातरुत्थायकृष्णस्यपदवींपरां प्रयतःकीर्तयेद्भक्त्यातामेवाप्नोत्य
नुत्तमां १२ दारुकोद्वारकामेत्यवसुदेवोग्रसेनयोः पतित्वाचरणावस्रैर्न्यषिं
चत्कृष्णविच्युतः कथयामासनिधनंवृष्णीनांकृत्स्नशोनृप १३ तच्छ्रुत्वोद्वि
ग्नहृदयाजनाःशोकविमूर्च्छिताः तत्रस्मत्वरिताजग्मुःकृष्णविश्लेषविह्वलाः
व्यसवःशेरतेयत्रज्ञातयोघ्नंतआननं १४ देवकीरोहिणीचैववसुदेवस्तथा
सुतौ कृष्णरामावपश्यंतःशोकार्त्ताविजहुःस्मृतिं प्राणांश्चविजहुस्तत्रभगव
द्विरहातुराः १५

यउपायश्चिंतितः आसीत् तमाह दारुकइत्यादिना १३ १४ कृष्णरामौसुतावपश्यंतः १५॥

भा॰ ए॰ २२ आदित आरभ्य श्रीकृष्णचरितकीर्त्तनस्य फलमाह यएतदिति द्वाभ्यां २३ संतमानि परममंगला
१६५ नि परमहंसगत्तौ श्रीकृष्णे २४ एवमेकादशस्कन्धभावार्थस्य प्रदीपिका स्वाज्ञानध्वांतभीतेन

श्रुत्वा सुहृद्वधं राजन्नर्जुनात्ते पितामहाः त्वां तु वंशधरं कृत्वा जग्मुः सर्वे महापथं २२ यए
तद्देवदेवस्य विष्णोः कर्माणि जन्म च कीर्त्तयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते २३ इ
त्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च संतमानि अन्यत्र चेह च श्रु
तानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत ॥२४॥ इति श्रीमद्भागवते महापुरा
णे पारमहंस्यां संहितायां वैयासिक्यां एकादशस्कंधे नाम एकत्रिंशतितमोध्यायः ॥३१॥

श्रीधरेण प्रकाशिता इति श्रीधरस्वामिविरचितायां भावार्थदीपिकायां एकादशस्कंध संबंधि
न्यां एकत्रिंशतितमोध्यायः ॥३१॥ शुभमस्तु ॥ शुभं भूयात् ॥ ॥ ॥ ॐ नमो भगवते परमात्मने ११

इति

एकादशस्कन्धः

Ekadashaskandhah

स्कंधः ११